ॐ

# प्रेमदर्शनम्

## देवर्षिनारदविरचितानि भक्तिसूत्राणि





व्याख्याकारः

हनुमानप्रसादपोद्दारः

अनुवादिका

राधा

मूल्यम् ७५ नया-पैसाः

ॐ

# प्रेमदर्शनम्

## देवर्षिनारदविरचितानि भक्तिसूत्राणि



व्याख्याकारः
हनुमानप्रसादपोद्दारः

अनुवादिका
राधा

मुद्रकः प्रकाशकश्च
मोतीलालजालानः
( गीताप्रेस, गोरखपुर )



सं० २०२१ प्रथमं संस्करणम् ५,०००



प्राप्तिस्थानम्—
गीताप्रेस, पो० गीताप्रेस ( गोरखपुर )

श्रीराधाकृष्णाभ्यां नमः

# विषयानुक्रमणिका

# भक्तिसूत्रकारस्य देवर्षेर्नारदस्य परिचयः

**वीणां क्वणयन् महतीं राधागोविन्दयोर्गुणान् गायन्।**
**वर्षीयान् देवर्षिर्वर्षतु हृदि मे हरिप्रेम ॥**

भक्तिमहोडुपेन संसारपारावारपारदो विविधविद्याविशारदो देवर्षिर्नारदस्तादृशेष्वसादृश्येषु समुद्धारककारकमहापुरुषेष्वन्यतमो धन्यतमो महामहिममहर्षिरस्ति, ये जगति सगतिकागतिकानां जागतिकानां जीवनिकायानामभितोभावेनाभ्युदयस्य विशेषतो निःशेषनिःश्रेयसस्य च निर्वर्तनाय त्रिभुवनपालनपरायणो नारायण इव समये समये समवतरन्ति । वागतीतसौभगवतो भगवतो विलसत्तमायाः सत्तमाया लोकपावनतमाया मङ्गलशीलाया लीलायाः कृते रङ्गभूमेर्निर्माणं लीलावितानाय तदनुरूपाणामुपयोगिनामुपकरणानां संग्रहणं लीलाविलासोल्लासे सर्वथा साहाय्यसम्पादनं चेत्यादीनि तेषामनिकृत्या निष्पाद्यानि कृत्यानि सन्ति स्वाभाविकानि सुभविकानि । ईदृशा महापुरुषा मुक्ता अपि मुक्तिमनङ्गीकृत्य विश्वस्मिन्नस्मिन्नपहततमसोऽसमशोभासौभाग्यविलसिता विगलितराजसभावतया विराजमाना मानातीतसत्त्वशालिनः प्रभवन्त्यलभ्यानपि भव्यानि भावयितुं भूतानाम् । सम्मान्यानामेषां सामान्यतोऽविरतमेवार्यकार्यमनिवार्यं चाचल्यते, परंतु परमानन्दकंदस्य मुकुन्दस्य कस्यापि शिष्टजनेष्टस्य विशिष्टस्यावतारस्य समभ्यर्हणीये समये तेषां तन्निरवशेषं कार्यं विशेषतो वरीवृध्यतेतरामनवरतम् । अमीषामीशानुग्रहभाजां मङ्गलमयं जीवनं भङ्गुरस्यापि भवस्य कृतेऽभङ्गुरमङ्गलरङ्गप्रसङ्गसंगमनार्थमेव सम्भवति सार्थकम् । अविद्याहंताममतादिदोषतः क्रोशतोऽपि दूरे विद्यमानाः समाना अप्यसमाना इमे महात्मानो

निखिलजगन्नियन्त्रिणो यन्त्रिणो जगदीशस्य हस्तन्यस्तानि यन्त्राणीव कार्यं कुर्वाणाः शश्वत् सुप्रतितिष्ठन्ति । तत्रभवद्भिः सद्भिर्विहितानि जनहितानि तानि तान्यनल्पानि कर्माणि भगवत्संकल्पकल्पिततया तत्सम्बन्धीन्येवानुसंधानतः समवधार्यन्ते । एवंविधेष्वेव महामहनीयेषु समग्रेष्वग्रे परिगणनीयोऽगण्यगुणगौरवशाली ग्रन्थकारोऽयमस्माकं देवर्षिवरेण्यस्तपोधनो नारदः शारदादिसंस्तुतभागधेयोऽवधेयः ।

भक्तिशास्त्रप्रणेतायं सचेता महाभागो मुनिर्नेता दिविषदां जेता बहिरन्तःकरणानां विजेतारिषड्वर्गस्यापवर्गस्य चाध्येताध्यापयिता च सकलानां विद्यानामुच्छेत्ता च रविरिवाच्छेद्यसंदेहमन्देहदेहस्य भेत्ता चापि भूरिशो दुरितभारस्य भगवानिव विभाति विभातिरेकेण । युगे युगे चास्य स्थितिः संयुगे संयुगे चास्योपस्थितिरनुश्रूयते । सत्यापितं विख्यापितं सत्यात्मनानेन सता सत्ययुगम्, त्राता पवित्रिता च त्रेता तीर्थपादेनैतेन, पावितं चापरं युगं द्वापरमिति विदितं कृपापरतया । सकलेऽस्मिन् कलेरपि काले यथावसरमधिकारिणो जनाः समनुगृह्यन्ते समनुगताः सन्तः कृपालुनानेन किल कृपालवेन । लोकं लोकमयं महात्मा निजालोकेनालोकयति । शास्त्रेष्वपि शास्तृतयायं श्रुतिसरणिमाश्रयति । समायां समज्यायां समाजेषु चैव मुनीशः समिज्यते वीज्यतेऽपि चामरेण चामरपतिना । अयं वैकुण्ठेऽप्यकुण्ठितगतिः, ब्रह्मलोकेऽपि ब्रह्मैव लोक्यते तत्र वसद्भिः सद्भिः, शूलिनो निवासे कैलासेऽपि लास्यमातनोति कैटभारिकीर्तिकीर्तनरतः । पातालमप्ययं पातालम्, व्याहृतिलोकानां च पदवी न दवीयसी पादयोरमुष्य महामुनेः । वेदेऽप्ययं वेद्यते, स्मृतावपि स्मर्यते, पुराणेष्वपि परिवर्ण्यते, संहितास्वपि संनिधीयते, ज्योतिःशास्त्रेऽपि ज्योतिरिव नभसि

समुद्द्योतते, संगीतेऽपि निपुणः संगीयते तथा चैवमेव सकलासु कलासु कौशलमेतस्य साकल्येनाकल्यते। किं बहुना ह्यानवद्यगद्यपद्य-संवलितललितोचितसंनिवेशवैवमनोहरेषु श्रव्यतया सम्भाव्येषु काव्येषु चार्चनीयचरणस्य देवर्षे रसप्रवणा चारुचर्चा चर्वणागोचरता-मानीयते। योगशक्त्या समासादितमनोजवगतिरयं कुतः कुत्र न गन्तुं शक्नुयात् ? क्वापि न प्रतिहन्यतेऽमुष्य गतिः केनापि प्रतिरोधहेतुनेति न केषां विदितचरम्। अणिमाद्याः सिद्धयोऽपि मुनेरस्य चरणपरिचर्या-त्मिकां जीवनचर्यामङ्गीकृत्यात्मानं कृतार्थयितुं कामयन्ते संततमत्यन्तम्। कमलालयालालिताङ्घ्रियुगलो भगवान् पङ्केरुहनयनो निजाङ्के क्रीडनशीलं सलीलं शिशुमिवारदं लालयति नारदम्। गिरिजासङ्गैकशृङ्गारी गिरीशोऽ-प्येनं गुरुतरस्नेहेन समनुगृह्णाति गृहागतं स्वागतपुरस्सरम्। पाटित-प्राणिवक्षसो राक्षसा अपि साक्षात्कारमुपागतमेतं सुवर्चसमर्चयन्ति मुनिवरं वरं विश्वासमपि रक्षन्ति सादरभरममुष्मिन्। बलारातेर्बलेश्वो-भयोरपि राजन्त्यां राजधान्यामन्तःपुरे चाविशेषेणाभ्यर्हणामभ्युपैति गुरुरिव गरीयोगुणगौरवोदधिरयं मुनिवरः।

क्वचिदयं सदयं वाल्मीकिव्यासप्रभृतीन् महामतीनपि ज्ञानमुप-दिशन् दशोरतिथिर्भवति। क्वचिच्च पक्षयोर्द्वयोः परां कोटिमाटी-कमानमुत्कटकलहकृपीटयोनिं प्रज्वलय्य प्रवृद्धक्रोधोत्थापिताप्रतिरुद्ध-युद्धकोलाहलाकलनकुतूहली दूरे दर्शकतयावस्थितोऽक्षिलक्ष्यीक्रियते। वस्तुतस्त्वयं न स्वार्थवासनावासितान्तःकरणः सन् कमपि कार्य-प्रकरं प्रकरोति। येन जगतो मङ्गलमङ्गलग्नमिव सम्भावयति, भगवतो लीलायाः कमपि लास्यविलासमुल्लासयितुमवसरं लातुं पारयते तस्मिन्नेव समारम्भे ससंरम्भमदम्भेन प्रवर्तते। एतत्कर्तृकं विवादो-

द्रावनं कलहोत्थापनं वा लोकहितार्थं भगवल्लीलासाधनार्थमेव च भूयोभूयो बोभूयते। यत एतस्य सकलैवेष्टा चेष्टा भागवतीमेव समीहामिहाभिव्यनक्तितमां सत्तमाम्। नूनमयं नारदो मुनिर्भगवतो मनोरूप एवेति महतामभिमतं मतं मन्तव्यम्।

केचित् कृतिनस्त्वेवमनुयुञ्जते यन्निगमनावगमकेषु निगमेषु ज्ञानमागमयत्स्वागमेषु सर्गादिपञ्चप्राणेषु पुराणेषु च परिवर्ण्यमाना नारदाभिधाना नानाविधा व्यक्तयो व्यक्तयोगा विलसन्तीति नाव्यक्तं विदितवेदितव्यानां विदुषाम्। तेष्वधो निर्दिश्यमानाः सप्त सप्तसप्तिसमधामानो महात्मानः प्रधानाः। तत्र निर्जरज्येष्ठस्य परमेष्ठिनो मानसपुत्रतयेहामुत्र च परां प्रख्यातिमुपागतः प्रथमः। सुपर्वतपस्विनः पर्वतस्यातुलो मातुलो द्वितीयः। सप्तर्षिवरिष्ठस्य वशिष्ठस्य वशिष्ठस्य मुनेः पत्न्याः पातिव्रत्यमेवानुरुन्धत्या अरुन्धत्या बन्धुरो बन्धुः सत्यवत्याः सत्यवत्याख्यायाः स्त्रियः स्वामी वा तृतीयः। कलहालोकनकुतूहलीत्याकर्ण्यमानः कोऽपि कर्णेजपस्तुरीयः। वैश्रवणसभासभासत्तया श्रवणाभ्यां विश्रूयमाणः पञ्चमः। दाशरथे राघवेन्द्रस्य भगवतः सभां सभाजयतामष्टानामिष्टानां धर्मशास्त्रिणामन्यतमः कतमो विपश्चिदपश्चिमः षष्ठः। तेजसारिजनमेजयतो जयतो जनमेजयस्य नागयज्ञमागतः कोऽपि महाभागः सदस्यः सप्तमः। एतेषु कतमोऽयं धन्यतमभक्तिप्रसूनग्रन्थनकुशलो ग्रन्थकार इति।

अनुयोक्तॄनिमान् समान् वयं समानविनयं विनिवेदयामो यन्मृत्योरगोचरोऽयं निगमागमादिगवीगोचरो वर्षीयान् देवर्षिर्मर्त्येष्वमर्त्येष्वपि च संचरणशीललीलतयैक एव बहुत्र बहुषु च वैभिन्न्येन विलसितेषु तेषु तेषु देशकालेषु सम्भावितसमुपस्थितिक इति संभावनापुरस्सरं वक्तुं

शक्यते । पुराणाद्यनुशीलनशीला विद्याविलासिनो विपश्चितस्तु नेह मनागपि विप्रतिपद्यन्ते विचिकित्साचिकित्सापटवः । वस्तुतो नारदाभिधयैकोऽनेकशो वा व्यक्तयस्त्रिलोकीमालोकयन्नालोकेन निजेनेति विवादस्य तद्विषयकविनिर्णयस्य वा नायमवसरोऽवसरणीयः । वयमिह तमेव चारुविचारदं नारदं विवक्षाकक्षामानीय सम्यगीक्षया वीक्षामहे येन युगे युगे कल्पे कल्पे च भगवत्संकल्पेनैवानल्पान्यवार्याणि चार्याणि कार्याणि साधु साधितानि सद्रितानि साध्यन्ते च सम्प्रति, साधयिष्यन्ते चाप्यायतौ । अधुना मधुना पूरितानीव प्रियतराणि तदीयानि तान्येव सुकृतानि कृतानि निबन्धेऽस्मिन्निबद्धयन्ते यानि भक्त्यैव भूरिभावेन सम्बद्धयन्ते । वस्तुतो भक्तेः प्रसारणमेवाप्रतारणं भवतारणं भक्तिविद्याविशारदस्य नारदस्य भगवदाभिमुख्यं प्रददन्मुख्यं कार्यमस्ति, यदार्यैरखिलैरमर्यादापर्यवसितं लसितं सर्वतः प्रसार्यममात्सर्येण । पाण्डित्यमण्डितविबुधमण्डलीकोऽयं मुनिमण्डलेश्वरो भक्तेरेवाकाण्डताण्डवप्रकाण्डमखण्डब्रह्माण्डमण्डलेऽनवरतं निर्वर्तयितुं कामयमानः कामयमानो नावलोक्यते स्वेष्टां चेष्टां तदर्थमत्यर्थम् । नाम्नानिम्नमहिम्ना च महतीं स्वरग्रामप्रपञ्चिकां विपञ्चिकां निजामुदञ्चयन् क्वणयंश्च मुकुन्दस्य कुन्देन्दुधवलं यशः, सुधासोदरमधुमोदरङ्गप्रदं मङ्गलायतनं दामोदरस्य नाम,निरस्तसाम्यातिशयरामणीयकनिधानतयाभिरम्यममन्दानन्दसंदोहमयं तदीयं धन्यधन्यं धाम, हरिमनोरमाया रमाया अपि मनोऽभिरामं कमनीयगुणैरकामानामात्मारामाणामपि काम्यं मधुरिपोरप्रतिरूपं रूपं लीलां चाप्यघविध्वंसनशीलामघारेर्मधुमधुरां ललितललामां कामं गायं गायं विचरंश्चरमचरं च जगत् पावयति भावयति भाग्यभाजां नरमणीनां रमणीनां च मनो मनोरमं भगवदभिमुखं सुखम् । भगवतो

भागवतानां चादरणीये वरणीये श्रीमद्भागवतेऽनेन भगवता नारदेन स्वयमेव कल्पद्रुयाकलितस्य ललितस्य निजजीवनवृत्तनिबन्धनेतिवृत्तस्य यद् वर्णनं वर्तयामासे समासेन तदेवेह गद्ये निगद्यते ।

वासवानुजकलया वासव्या लाल्यतामुपगतस्तपःपारावारपारदृश्वा पाराशर्यो वैशम्पायनगुरुः कृष्णद्वैपायनो मुनिर्महन्महितं लोकहितं ध्यात्वैकमेव वेदं व्यासयामास समासादयामास च ततो व्यासपदवीमदवीयसीम् । तदन्वितिहासपुराणाभिधं च पञ्चमं वेदानां वेदमाम्नायाभिप्रायप्रपञ्चनलक्षणमलक्षयल्लक्षशः श्लोकराशिभिरुद्भासमानमसमानम् । स्त्रीशूद्रद्विजबन्धूनां श्रुतिर्न श्रुतिगोचरेति तेषामप्यशेषाणां निःश्रेयसाय कृपापारवश्येन प्रणीय प्रावर्तयन्महाभारतमधिभारतम् । एवमनारतं भूतानां भव्ये भव्ये प्रवर्तमानस्यापि तस्य मानसं यदा न संतोषकोषमापेदे तदासावासांचक्रे स्रोतस्विन्याः सरस्वत्याः प्रविविक्ते प्रत्यक्तटे शम्याप्रासाश्रमसन्निधानेऽशम्याधिमधिवहन् समाधिभङ्गकरम् । आलोचितं च तत्कालोचितं तेन चित्तेन—अहो ! धृतव्रतेन मया समयाभिरतेन सता छन्दांसि गुरवोऽग्नयश्च सम्मानिता मानितामपहाय निर्व्यलीकभावेन स्वभावेनैव समेषामेषामनुशासनमासादितं सम्भृतं च सादरं शिरसा । भारतव्यपदेशेन देशे वेदार्थ एवावेदितस्तथापि नात्मा मे प्रसीदत्यपि तु विषीदत्येवाधिकाधिकमधुनाधन्यतामिवात्मनो मन्यमानः । नूनमेवेह केनापि कारणेन भवितव्यम् । प्रायेण न मया श्रीवल्लभवल्लभा भगवत्परमपरमहंसप्रिया भाग्यवतां धनरूपा निरूपिता भागवता धर्माः; एतदेव कारणं कच्चिन्मदसंतोषदोषस्य ?

एवमालोचनशोचनायासमासादयतो व्यासस्याश्रमाभ्याशमभ्युपेत्य



तत्कालमेव लोचनगोचरतामवापापहतपाप्मा वृन्दारकवृन्दवन्द्यपादार-

विन्दोऽरविन्दनाभदयितो देवर्षिः करुणावर्षी वर्षीयान् । तमागतमभिज्ञाय सहसा प्रत्युत्थाय विज्ञाय मुनये विनिवेदितस्वागतवादाभिनन्दनः सत्यवतीनन्दनः शुभासने समासीनाय तस्मै समुपहृतसमभ्यर्हणो गतगर्हणो व्यासः सपर्यापर्यायेण सुपर्वपूज्यं पूजयांचक्रे चक्रपाणि प्रियं नारदं सादरभरम् ।

तदनु मन्दस्मितविनिन्दितशरदिन्दुः सुन्दराननः स चतुराननसुतः सुरर्षिः सम्भृतगोविन्दचरणारविन्दो मन्दं मन्दमावभाषे—'पाराशर्य ! साश्चर्यं स्मर्यसे मनीषिभिः । महाभाग ! श्लाघनीयभागधेयोऽसि । कस्त्वदृते महाभारते महाभारतप्रणेता ? अद्भुतमिदं ते कर्म शर्मप्रदम् ! जिज्ञासितमधीतं भवता सनातनं ब्रह्म । सम्पन्ना ते समीहासम्पत् । विदितं वेदितव्यमायुष्मता विहितं च विधातव्यम् । तथापि महर्षे ! हर्षेण शून्य इवावलोक्यसे । समृद्धार्थोऽप्यसमृद्धार्थमिवात्मानं मन्यमानः प्रतीयसे ।' व्यासो व्याहरद् 'भगवन्नस्त्येव मे सर्वमिदं यद् भगवताभिहितं तथापि नात्मा मे परितुष्यते । तत् किम्मूलमित्यगाधबोधं भगवन्तमेवाहं पृच्छामि; विचक्ष्व चक्षणीयम् ।' नारदो न्यगादीत्—मुनिवर्यावर्जनीयस्य वर्जनमर्जनीयस्य चानर्जनं ते विषादमूलमध्यवस्यामि । सर्वतः समुदितमपि भवतानुदितप्रायं भगवतः समुज्ज्वलं यशः । येनासौ भगवानेव न तुष्येत्तुषीभूतं तदखिलं दर्शनं खिलमदर्शनं चाहं मन्ये । स्वोपनिबद्धेषु ग्रन्थेषु यथान्ये धर्मप्रभृतयोऽर्थाः पुरुषार्था वा प्रतिपादिता न तथा भवता भवतापहरस्य सर्वासुदेवस्य वासुदेवस्य महिमोपवर्णितो नापि च तथावितथात्मनः कीर्तनीयकीर्तेः केशवस्य कीर्तनं कृतम् । कोमलकान्तपदावलिवलिता ललितोक्तिविलासाभिनिवेशबन्धुरा प्रतीयमानलक्षणलावण्यलसिता सगुणा

सालंकारा सरसाभिव्यञ्जनं भावविभ्रमं बिभ्रती च कविभारती चेन्नरकिंनर कान्तं नरकान्तकस्य जगत्पवित्रं यशो न प्रगृणीत तर्हि तामहितां काकतीर्थोपमां मत्वा न कामयन्ते परमहंसा मानसायना रसायनावगाहनरसिकाः । शिथिलापि च रचना मिथिलाधिपस्य जामातुरुज्ज्वलानि यशांसि नामानि च निरूपयन्ती कस्य कस्य नाकर्षयति सहृदयस्य हृदयम् ? यतस्तां 'शृण्वन्ति गायन्ति गृणन्ति साधवः ।' निरञ्जनं नैष्कर्म्यं ज्ञानमप्यच्युतभाववर्जितं चेन्न शोभते। अतो भवव्याधिनाशाय समाधिना तद्विचेष्टितमनुस्मर । महानुभवेन भवता भवाभ्युदयाय महानुभावाभ्युदयोऽधि गण्यताम् । उत्तमश्लोकगुणानुवर्णनमेव पुंसस्तपसः श्रुतस्येष्टस्य सूक्तस्य बुद्धिदत्तयोश्चाविच्युतोऽर्थः कविभिर्निरूपितः ।

मदीयं प्राक्तनजन्मवृत्तमितिवृत्तं श्रवणवृत्तौ संचार्य विचार्यतां यद् गोविन्दगुणानुवादश्रवणेनाहं कस्मात् कः संवृत्तः ? क आसं कः संजातः ? समुन्नतेः कामप्यनिर्वचनीयां भूमिकां समासाद्यासाध्यं साधितवानस्मि । मद्वृत्तान्तसमाकर्णने कौतूहलं चेदाकर्ण्यतामविहितेनाव्यवहितेन च मनसा ।

पुरा पुरातने भवेऽभवमहं वेदवादिनां विप्राणां कस्याश्चन दास्यास्तनुजो मनुजः । तदानीं बालोऽप्यहं समुज्झिताखिलबालोचितचापलतया तया दास्या दास्याय नियोजितोऽजितप्रियाणां प्रावृषि निर्विविक्षतां भिक्षुतां वृतवतां व्रतवतां सताम् । ते च महानुभावाः शान्ते दान्तेऽनाकलितक्रीडनकेऽजीवजनकेऽनुशासनवर्तिनि मितं भाषमाणेऽमितं शुश्रूषमाणे च मयि दासे दासेरकेऽतुल्यां दयामदर्शयंस्तुल्यदर्शना अपि गुणैकपक्षपातितया । तैरनुमोदितो मोदितोऽहं सकृदुच्छिष्टलेपान्

सुज्ञानो निरस्तसमस्तकिल्बिषविषः समजनिषि। एवं प्रवृत्तस्य सुवृत्तस्य मे विनीतं चित्तं निर्मलतां नीतम् । ततस्तेषामेव तादृशे ध्यानभजन-पूजनादिलक्षणे धर्मे क्षणे क्षणे निहितेक्षणचित्ततया तत्रैव ममाप्य-चिरादभिरुची रुचिरा चिराय समजायत । तत्रान्वहं प्रगायतां तेषा-मनुकम्पया सुमनोमनोहराः कृष्णकथाः सतृष्णमहमश्रृणवम् । ताः श्रद्धयानुपदं विश्रृण्वतो मम तस्मिन् प्रियश्रवसि प्रेयसि परा प्रीतिः प्रादुरभूत् । निश्चलतामिता मतिश्च न ततः कदापि स्खलनमवाप्ता तया च सुमत्याहमेतत् सदसदात्मकं वैरिञ्चप्रपञ्चजातं मायातीते विशुद्धे परब्रह्मणि परिकल्पितमुपकल्पयामि । प्रावृषि शरदि चानुसवं श्रवणाभ्यां हरिकथावृत्तिं वर्तयतो ममाभ्यन्तरे रजस्तमोभारहारिणी हरिभक्तिराविरभूत् ।

चातुर्मास्यावसाने ततो गन्तुकामा अपहतपाप्मानोऽदीना दीनानु-कम्पिनस्ते महात्मानो मां साक्षाद् भगवतोदितं गुह्यतमं ज्ञानमुपादिशन्, येनाहं भगवतस्तं मायानुभावमविदं येन यान्ति जनास्तदीयं परमं पदं परव्योमाभिधानम् । मम विज्ञानादेष्टृषु भिक्षुषु ततः प्रदेशाद् देशान्तरं गतवत्सु सत्सु यद् वृत्तं वृत्तं तदवधार्यताम् । मय्यनन्यगतावात्मज एकात्मजा मे जननीशवर्तिनी दारुमयी योषेवास्वतन्त्राकल्पा च सती सती मद्योगक्षेममभीप्सन्ती परं स्नेहानुबन्धनं चक्रे । अहमपि तामेवापेक्षमाणो दिग्देशकालसमवेक्षणेऽप्यक्षमस्तस्मिन्नेव ब्रह्मकुले निराकुलो न्यवसम् । एकदा गाढान्धकारायां रजन्यां गां दोग्धुं गेहान्निर्गताऽऽत्मजवत्सला दैवाधीना दीना मे जननी पथि पदा स्पृष्टेन कालसर्पेण दष्टा नष्टा पञ्चत्वमवाप पञ्चहायनमसहायं विहाय मां बालकम् । तदपि [illegible]

मेव मन्यमानः सुरसंचारैरासप्रतिष्ठां प्रातिष्ठमुत्तरां काष्ठाम्। तत्र विविधाञ्जनपदान् पुरग्रामव्रजाकरान् वनान्युपवनानि निलिम्पनिषेविता नलिनीश्च दर्शं दर्शमुल्लङ्घ्योल्लङ्घ्यैक एवाग्रतो गच्छन्नहमद्राक्षमक्षिभ्यामेकमक्षुद्रवृक्षावलीगहनं विशालमपि सशालं रसालतमालतालादिद्रुमजालजटिलं भयावहं जङ्गलममङ्गलाकारम्। तत्र परिश्रान्तेन्द्रियात्मा तृट्परीतः क्षुधाक्षीणोऽहं नद्या ह्रदेऽम्बुपानावगाहनोपस्पर्शनैः शनैर्निर्गलितश्रमः संवृत्तः। ततश्च तस्मिन्नशरणशरण्येऽरण्ये विजनेऽश्वत्थोपस्थ आस्थित आत्मनाऽऽत्मानमात्मस्थमचिन्तयं यथाश्रुतस्वरूपमप्रतिरूपम्। भावाभिभूतेन चेतसा भगवतः पादाम्भोजं भावयतोऽकुण्ठोत्कण्ठागलदश्रुकलाकलापाकलितलोचनयुगलस्य संरुद्धगलस्य मम हृदि सदने शनैः श्रीहरिराविरभवत्। सत्तम! तस्मिन् क्षणे प्रेमातिभरनिर्भिन्नपुलकाङ्गोऽतिनिर्वृतोऽहमानन्दसम्प्लवे सम्प्लवन्निलीनो नोभयमभावयं भवमभवं चात्मानम्। एतस्मिन्नेव काले प्रालेयांशुसहस्रतोऽतिशयसुन्दरमिन्दिरामन्दिरस्य नरकान्तकस्य मनःकान्तं तद्रूपमलुप्यतैकपदेऽन्तर्धानेन। तदपश्यन्नश्यद्धृतिर्वैक्लव्याद् दुर्मना इवाहं सहसा समुत्थितः। भूयोऽपि तदेव रूपमरूप्यं निरूपयितुं यतमानमानसोऽहं हृदि मनः प्रणिधाय ध्यानमारब्धवान्। किंतु न पुनस्तद्दर्शनसौभाग्यभागभवमवितृप्त इवातुरः समजनिषि च सत्वरम्।

एवं विजने वने यतनायत्तं मामवेक्ष्य गिरामगोचरोऽद्भुतसौभगः स भगवान् गम्भीरया नभोवाचा शुचः प्रशमयन्निवोवाच—'हन्त! भो बालचक्रवालभालमणे! न पुनरिहास्मिञ्जन्मनि भवान् मां द्रष्टुमर्हति द्रष्टुमनर्हम्, यतोऽविपक्वकषायाणां कुयोगिनामहं दुर्दर्शः सुदर्शनोऽपि यदेतदसुलभमप्रतिरूपं रूपं सकृद् ध्यानगोचरतामानीतं तत्ते कामाय—

तत्रानुरागोद्वर्धनायेति मनसि निधातव्यम्, यतो यत्कामो ममानुगतः साधुसाधनरतः साधुर्मन्मनोऽभिरामः सञ्छनैः शनैः सकलाँल्लौकिकान् कामान् यातयामानिवोद्वान्तं वान्तमिव वा मत्वा नितान्तं मुञ्चति। बालकेन त्वया विहितेनाल्पकालिकेनाप्यभङ्गफलेन सत्सङ्गेन मयि ते दृढा प्राणपरिवृढा च भक्तिः संजाता। यातासि त्वमतो हित्वा किल कालकवलकलात्मकमवद्यमिदं कलेवरं वरं लोकम्, ग्रहीष्यसि च तत्र मत्पार्षदविग्रहमनुग्रहमयमनवद्यं हृद्यं च। निबद्धेयमयि! मयि मतिः कदापि शापतापितापि न ते विपतस्यते। जन्मान्तरे कल्पान्तरे वा प्रजासर्गस्य संचरे प्रतिसंचरे च मदनुग्रहेण ते पुरातनी स्मृतिर्न कदाचिद् विस्मृतिगर्भे विलीना भविष्यति भविष्यति काल इति भाले लिखितमिवाभेद्यं वेद्यम्।'

एतावदुक्त्वा नभोलिङ्गमलिङ्गमनीशमपीशं तथाभूतमपि तन्महद् भूतमद्भुतं ब्रह्म ( श्रीकृष्णापराभिधानम् ) व्यरमद् वचोव्यापारादारात्। तदनु तदनुकम्पितश्चाहं गुरुतां गतानां गरीयसे महतामपि महीयसे परमात्मने तस्मै धरण्यां धृतेन मूर्ध्ना नमोविधानं व्यदधाम्। ततः प्रभृत्येव परित्यक्तत्रपोऽपगतस्पृहोऽहमनन्तस्य तस्य गुह्यतमा मङ्गलधामाभिरामा नामावलीर्लीलाश्च ललितललामाः स्मरन् समुदीरयन् संतुष्टमना विमुष्टमदो गां द्यां च परितः पर्यटनचर्यावर्यामवृणवममत्सरोऽमितवत्सराणां कृते। एवमन्यत्रासक्तस्य केवलश्रीकृष्णासक्तमतेरनुरक्तस्य तच्चरणयोरमलात्मनो मनुजस्य मे कलेवरं तत्कवलयितुं कालः काले प्रादुरभूद् विद्युतो द्योतनविलास इव लास्यमुल्लासयन्। समायाते भाग्यवत्यां भागवत्यां तनौ समावेशावसरे वरे शान्तप्रारब्धकर्मणो मर्त्यधर्मगो मम पाञ्चभौतिकं शरीरं पञ्चतामुपेप्यन्न्यपतत्। पर्यवसिते कल्पे शेषतल्पे प्रलयमहार्णवाम्भसि शयाने जलशायिनि तदन्तः

सबीजां सृष्टिमिमां समां समाहृत्य शिशयिषोरात्मयोनेर्निःश्वासेन सहाहमपि प्राविशम् । ततश्च प्रलयावसाने सहस्रयुगपर्यवसाने समुत्थितस्य वीतनिद्रस्य सिसृक्षतः परमेष्ठिनः प्राणेभ्यो मरीचि-प्रभृतिभिः सार्धमहमपि प्रादुरभवम् ।

तत आरभ्यानवरतमविच्छिन्नं भगवद्भजनलक्षणमात्मनो जीवन-व्रतं सविभ्रमं बिभ्रदहं महाविष्णोरनुकम्पयाकम्पितमतिरप्रतिहतगतिश्चा-न्तर्बहिरप्यवलोकितुं कुतुकेन त्रिलोकीं पर्यटामि प्रकटमप्रकटं च । भगवतैव मह्यं प्रसादरूपेणोपायनीकृतां स्वरब्रह्मविभूषितां रागप्रवीणां वीणां मूर्छयित्वा गायं गायमुरुगायगाथां याथातथ्येन विचरामि चिराद् विश्वतो-गतिः । मधुमधुरां रुचिररुचिरां स्वीयां श्रीलीलां प्रगायतो मे सदायमाहूत इव माधवोऽघमोचनो मनोलोचनगोचरतामवतरति त्वरितम् । भूयो भूयो भूयसां भोगानामायोगं भोगं च विधातुमातुरचित्तानां विषयासङ्गरङ्गिणां रागिणां जनानां कृते तु हरिचर्यानुवर्णनलक्षणा परिचर्यैव भवाम्भोधेस्तरणाय तरणितल्लजारूपा निरूपिता । निकामकामोपहतं हतं मनो मनोऽ-भिरामयामायया मुकुन्दसेवया यथाप्रशामं शाम्यति न तथा यम-नियमप्राणायामैर्योगपथप्रथितैः सायामैर्व्यायामैः । अतो गोविन्दगुणगान-मेवानवरतं धार्यमनिवार्यं मे जीवनव्रतमिति सम्भाष्य वासवीसुतं वीणावादनवशीकृतशारदो यादृच्छिको नारदो मुनिस्तमामन्त्र्य रणयन् वीणां प्रणयंश्च भगवद्गुणगानं विहाय मर्त्यभुवं विहायसा वर्त्मनामृतं ब्रह्मधाम प्रति प्रतस्थे ।

महाभारते प्रत्यपादि यदादिकालिको मुनिरयं देवर्षिर्नारदो विविधगुणावलीसमलंकृतत्रिलोकीमप्यलंकरोति निजचारुचरणारविन्द-

परागसमर्पणेन क्षणे क्षणे । एष समस्तव्यस्तवेदतत्त्वज्ञो निखिलवृन्दारकवृन्दवन्दनीयः सेतिहासाशेषपुराणविशेषज्ञः; वेत्तातीतकल्पानल्पवृत्तान्तानां परिच्छेत्ता वाक्यानां छेत्ता संशयराशेरध्येतासाधारणपण्डितश्च शिक्षाकल्पव्याकरणानाम्, धर्मतत्त्ववेत्ता, संगीतकलावैशारद्ये संगीतकीर्तिः मियोविरुद्धविविधविविधवाक्यमीमांसानिपुणः, प्रभावोत्पादकभाषणे पटुः, स्मृतिमान्, नीतिमान्, कविर्ज्ञानी, मेधावी समस्तैः प्रमाणैर्वस्तुविचारे समर्थो वाचस्पतिकल्पानामपि विदुषामनल्पशङ्कायाः समाधाने क्षमः, समधिगतधर्मार्थकाममोक्षतत्त्वो योगबलेन समस्तदिगन्तव्यापिनो भूवलयस्य प्रत्यक्षदर्शी, संधिविग्रहसिद्धान्तवित् सकलसद्गुणाधारो विद्याभाण्डागारोऽपारस्तेजस्वी, परमानन्दनिधिः सदाचारधारकः सर्वभूतानामकारणप्रेमी, अखिलजगन्मण्डलमङ्गलविधाता भक्तेर्महानाचार्यवर्यश्चास्ति ।

तेन विलक्षणलक्षणलक्षिताचार्यचर्य्यासक्षणेन विचक्षणेन कृपापीयूषवर्षिणा सुरर्षिणा देशिकेन्द्रेण सर्वशास्त्रोपदेशदेशनान्तरं सर्वोपरिमहत्त्वं भव्यं भक्तितत्त्वमुपदिदेशेति भक्तिशास्त्रस्यास्य सर्वतोऽधिकः समुत्कर्षप्रकर्षः सुतरां सिद्ध्यतितराम् । तेनैव प्रणीतानां भक्तिविषयकसकलसंशीतिहर्तॄणां चतुरशीतिसूत्राणामुपरि परिष्कृतविचारेण भक्तिभावप्रचारणप्रसारणपरेण सकलजनानां कल्याय कल्याणाय सर्वप्रेरकपरेशप्रेरणया परिचाल्यमानायाः कल्याणपत्रिकायाः सुधीजनसम्भावितेन सम्पादकेन प्रेमभक्तिभावितान्तरात्मना प्रेमपावितात्मना वासुदेवः सर्वमिति परमाभीष्टदृष्टिमवष्टभ्य सर्वदा सर्वत्र सर्वाभिवादनशीलेन सुशीलेन जगन्मङ्गलैषिणा सर्वभूतसुसहृदा परिधृतपरोपकारव्रतेन भगवच्चरणारविन्दमधुव्रतेन भक्तिमता मूर्धन्येन धन्येन परितः प्रसिद्धेन

सिद्धेन सता कृतकृत्येनाकामेनाप्तकामेन महानुभावेन परमोदारेण हनुमत्प्रसादपोद्दारेण सुधिया स्वधिया हिंदीभाषायामेका भासमाना-समाना प्रसन्नगम्भीरा विशदा व्याख्या विरचिता या भक्तेरखिलं तत्त्वं प्रभाकरप्रभा लोकपदार्थजातमिवावदातं प्रकाशयन्ती स्वयमपि प्रकाशते प्रत्यहं प्रीतिमावहन्ती चिरम्भावुकभावुकलोककोककोकनदानाम् । रुचिरविचारचारुरोचिषा रोचमानायै विबुधजनमनोरमायै तस्यै व्याख्यासुन्दर्यै शुचिरुचिरचितं रुचिरमुचितं च सुरभारतीमयं पावनं परिधानं प्रदातुकामा तस्यैव पोद्दारमहोदयस्य सौभाग्यवती भाग्यवती दौहित्री श्रीमती शुभमती राधा प्रेमदर्शनाभिधानायास्तस्या व्याख्यायाः संस्कृतभाषया भासमानमविकलमनुवादं मत्संनिधौ संव्यधादिति ससाधुवादमुच्यते सूच्यते च । क्रमेण महता श्रमेण श्रद्धयोत्साहेन चाहेयेनास्मिन् शुभारम्भे प्रारम्भत एव ससंरम्भं संलग्ना राधा कार्य-मिदं दुष्पूरमपि समपूरयतेति परमसंतोषस्य विषयः । भगवतः परमानन्दकंदस्य नन्दनन्दनस्य परमाह्लादिनी शक्तिः प्राणाराध्या च श्रीराधा तस्याः प्राणवल्लभो भगवाञ्छ्यामसुन्दरो मुकुन्दश्चोभावपि वत्सामिमां वात्सल्यपूर्णेन पूर्णानुग्रहेण संततमनुगृह्णीयातामायातां शरणम् । तयोः प्रियाप्रेयसोः श्रेयसोश्चरणारविन्दयोरस्या वत्साया अपि निरन्तरं निरन्तरायं प्रेम प्रवर्धेततरामुत्तरोत्तरं निरवधिकमधिकमिति सहर्षं सभाजयामि निजदौहित्रीकल्पामनल्पया शुभाशिषा राधामिति शुभम् ।

निवेदयते—

**रामनारायणदत्तशास्त्री**
**साहित्याचार्यः**

श्रीराधामाधवौ शरणम्


# प्राक्कथनम्

भक्तशिरोमणिना मम मातामहेन श्रीमता हनुमानप्रसाद-पोद्दारमहोदयेन हिंदीभाषायां श्रीमन्नारदभक्तिसूत्रस्यैका विस्तृत व्याख्या कृतास्ति । इयं व्याख्या मह्यमत्यन्तमरोचत, अत एव स्वान्तःसुखायाहमिमां भक्तिस्वरूपिणीं व्याख्यासुन्दरीं यथामति निर्मितेन देववाणीमयपरिधानेन विभूषयामि ।

आरम्भतः समाप्तिपर्यन्तमात्मनो मातामहकल्पस्य पण्डित-प्रवरस्य पाण्डेयोपाह्वस्य साहित्याचार्यश्रीश्रीरामनारायणदत्त-शास्त्रिमहोदयस्य संनिधाने समुपविश्यैव मयास्य परिधानस्य निर्माणं विहितम् । मयि काव्यनिर्माणयोग्यताया अभावादेतद्-व्याख्यागताः पद्यांशास्तेनैव महानुभावेनानूदिताः सन्ति ।

नित्यनिकुञ्जेश्वरी वृषभानुनन्दिनी नित्यनिकुञ्जेश्वरो व्रजेन्द्रनन्दनश्च ममैतमगण्यमुपहारं स्वीकरिष्यत एव तथा व्याख्यासुन्दर्या त्वयमुपहारः स्वीकृत एव । अहमिह सर्वेषां चरणेषु वन्दनं विधाय केवलामियतीमेव भिक्षां याचे, यन्मम मतिः श्रीराधाराज्ञ्यां श्रीनन्दनन्दने च सततं संलग्ना भवेत् । इमामा-शिषं दत्त्वैव विश्वरूपः प्रभुरेतां व्याख्यां पठितुमिच्छेच्चेत् पठतु, काचित् त्रुटिर्लक्ष्येत चेत्तां स्वयमेव सुधार्य पठेत्; यतोऽतः परमप्येतस्य ग्रन्थस्य संशोधनाय प्रवृत्तिर्मे जागरिता भविष्यतीति न सम्भाव्यते । अस्तु,

अधुना प्रकृतपरिधाननिर्माणं प्रत्यग्रेसरा भवामि ।





वन्देऽमन्दविभाविभासितभुवं राधामुकुन्दद्वयम् ।

श्रीहरिः

# प्रेमदर्शनम्

## ( देवर्षिनारदरचितभक्तिसूत्राणि )

## प्रेमरूपाया भक्तेः स्वरूपम्

**अथातो भक्तिं व्याख्यास्यामः ॥ १ ॥**

**१—अधुना वयं भक्तेर्व्याख्यां करिष्यामः ।**

अस्य सूत्रस्य 'अथातः' पदाभ्यामिदं प्रतीयते यद् भक्तिमार्गाचार्येण सर्वभूतहितरतेन दयानिधिना देवर्षिनारदेनान्यान्यसिद्धान्तानां व्याख्या तु कृता; अनन्तरं जीवानां कल्याणार्थं परमकल्याणमय्या भक्तेः स्वरूपस्य साधनानां च व्याख्या आरभ्यते। श्रीनारदो वदति—

**सा त्वस्मिन्* परमप्रेमरूपा ॥ २ ॥**

**२—सा ( भक्तिः ) ईश्वरं प्रति परमप्रेमरूपा अस्ति ।**

---

* पाठान्तरम्—'कस्मै' ।

भक्तेर्बहव: प्रकारा वर्णिताः, परंतु नारदेन या भक्तिर्व्याख्यायते, सा प्रेमस्वरूपा अस्ति। भगवन्तं प्रत्यनन्यप्रेम्णः समुद्भव एव भक्तिः। ज्ञानकर्मप्रभृतिसाधनानामाश्रयेण रहिता सर्वतः स्पृहाशून्या च सती चित्तवृत्तिरनन्यभावेन यदा केवले भगवत्येव संलग्ना भवति, जगतः समस्तपदार्थेभ्यः परलोकस्य सकलसुखसामग्रीभ्यश्च विशेषतो मोक्षसुखादपि चित्तं निवृत्य स्वपरमप्रेमास्पदे भगवति संलग्नं भवति, समग्रा ममताऽऽसक्तिश्च समस्तपदार्थेभ्यः सर्वथा निस्सृत्यैकं भगवन्तं प्रत्येव सम्बद्धे भवतस्तदा तां स्थितिं 'अनन्यप्रेम' इति कथयन्ति।

## अमृतस्वरूपा च ॥ ३ ॥

३—तथा अमृतस्वरूपाप्यस्ति।

भगवन्तं प्रत्यनन्यप्रेमैव वस्तुतोऽमृतमस्ति, तत्सर्वतोऽधिकं मधुरमस्ति, तथा येन तत्प्रेमामृतं लभ्यते स तत्पीत्वामृतो भवति। लौकिकी वासनैव मृत्युः। अनन्यप्रेमिणो भक्तस्य हृदये भगवत्प्रेमसम्बन्धिनीमेकां नित्यनवीनां पवित्रवासनां विहायान्या कापि वासनावशिष्यत एव न। अनया परमदुर्लभया वासनयैव स भगवतो मुनिमनोहारिण्या लीलाया एकं साधनं भूत्वा कर्मबन्धनयुक्तजन्ममृत्युचक्रतः सर्वथा मुच्यते। स सदा भगवतः पार्श्वे निवसति भगवांश्च तस्य पार्श्वे। प्रेमिणो भक्तस्य प्रेमास्पदस्य भगवतश्चायं नित्योऽविचलः संयोग एव यथार्थतोऽमृतत्वम्। अतएव भक्तजना मुक्तिमवाञ्छन्तो भक्तिमिच्छन्ति।

एवं संचिन्त्य चित्तेन हरिभक्ता मनीषिणः।
मुक्तिशुक्तिं निरादृत्य भक्तौ लुभ्यन्ति संततम् ॥*

---

* अस बिचारि हरि भगत सयाने। मुक्ति निरादर भगति लुभाने ॥

**यल्लब्ध्वा पुमान् सिद्धो भवति, अमृतो भवति, तृप्तो भवति ॥ ४ ॥**

**४—यत् ( परमप्रेमस्वरूपाममृतरूपां च भक्तिम् ) प्राप्य मनुष्यः सिद्धो भवति, अमरो भवति तथा तृप्तो भवति ।**

येन भगवत्प्रेमामृतं पीतं स एव सिद्धः । सिद्धशब्देनात्राणिमादिसिद्धीः प्राप्तः पुरुषो नाभिप्रेतः । आसां सिद्धीनां तु वार्तैव का, मोक्षरूपां सिद्धिमपि प्रेमी भक्तो नेच्छति । इमाः सिद्धयस्तु तादृशस्य प्रेमिभक्तस्य सेवाया अवसरमन्विच्छन्ति, परंतु स भगवत्प्रेम्णः समक्ष एना अत्यन्तं तुच्छीकृत्य स्वीकरोत्येव न । स्वयं भगवान् ब्रूते—

न पारमेष्ठ्यं न महेन्द्रधिष्ण्यं
न सार्वभौमं न रसाधिपत्यम् ।
न योगसिद्धीरपुनर्भवं वा
मय्यर्पितात्मेच्छति मद्विनान्यत् ॥
( श्रीमद्भा० ११ । १४ । १४ )

'मयि संलग्नचित्ता मम प्रेमिणो भक्ता मां विहाय ब्रह्मणः पदम्, इन्द्रासनं चक्रवर्तिराज्यं लोकान्तराधिपत्यं सकला योगसिद्धीः सायुज्यमोक्षं चेत्यादि किमपि नेच्छन्ति '

एको भक्तः कथयति—

रोमाञ्चेन चमत्कृता तनुरियं भक्त्या मनो नन्दितं
प्रेमाश्रूणि विभूषयन्ति वदनं कण्ठं गिरो गद्गदाः ।
नास्माकं क्षणमात्रमप्यवसरः कृष्णार्चनं कुर्वतां
मुक्तिर्द्वारि चतुर्विधापि किमियं दास्याय लोलायते ॥
( बोधसारे )

१. मदित्यव्ययं कर्मार्थम् ।

'प्रियतमश्रीकृष्णस्य पूजनसमये शरीरं पुलकितं भक्त्या मनः प्रफुल्लं जातम् । प्रेमाश्रुभिर्मुखमलं कृतं गद्गदया गिरा च कण्ठो विभूषितः । साम्प्रतं तु नास्माकं क्षणमात्रमप्यत्रकाशो यद् वयं कमप्यन्यं विषयं स्वीकुर्याम । एतावति सत्यपि सायुज्यप्रभृतयश्चतुर्विधा मुक्तयः कथमस्माकं द्वारि स्थिता दास्यकर्म कर्तुमातुरास्तिष्ठन्तीति न जानीमहे ।'

भक्तो यदि भुक्तिं मुक्तिं च स्वीकुर्यात् तदा ते स्वकीयं परमं सौभाग्यं मन्येते; परंतु नैवं कुर्वन्ति भक्तजनाः ।

हरिभक्तिमहादेव्याः सर्वा मुक्त्यादिसिद्धयः ।
भुक्तयश्चाद्भुतास्तस्याश्चेटिकावदनुव्रताः ॥
( नारदपाञ्चरात्रे )

'मुक्त्यादिसिद्धयो विविधा विलक्षणा भुक्तयश्च दासीवद् हरिभक्तिमहादेव्याः सेवायां संलग्ना भवन्ति ।

( गरुडं प्रति ) काकभुशुण्डिर्भक्तराजः कथयति—

**यथा स्थलं विना तोयं स्थातुं शक्नोति न क्वचित् ।**
**कोऽपि कोटिविधान् काममुपायान् कुरुतात्सदा ॥**
**तथा मोक्षसुखं चापि श्रूयतां पक्षिपुंगव ।**
**त्यक्त्वा भगवतो भक्तिं स्थातुं नान्यत्र शक्नुयात् ॥***

अतोऽत्र 'सिद्धि'शब्दस्य तात्पर्यरूपेण कृतकृत्यता ग्राह्या । भक्तस्यात्मनः कृते कस्यापि वस्तुनोऽभावस्य बोधो न भवति । स प्रियतमस्य भगवतः प्रेमाणमुपलभ्य सर्वथा पूर्णकामो भवति । इयं

---

* जिमि थल बिनु जल रहि न सकाई । कोटि भाँति कोउ करै उपाई ॥
तथा मोच्छ सुख सुनु खगराई । रहि न सकइ हरि भगति बिहाई ॥

पूर्णकामतैव तस्यामृतत्वमस्ति । यावन्मनुष्यः कृतकृत्यः पूर्णकामो वा न भवति, तावत्तस्य पुनः पुनः कर्मवशाद् गमनागमने आपद्येते । पूर्णकामो भक्तः सृष्टौ संहारे चोभयोरपि भगवतो लीलां प्रत्यक्षमनुभूय मृत्युं क्रीडां मन्यते । वस्तुतस्तु तस्य कृते मृत्योरेव मृत्युर्भवति । प्रभुलीलातिरिक्तं मृत्युनामधेयं किमपि भयावहं वस्तु तस्य बोधे विद्यमानं भवत्येव न; अतएव च स तृप्तो भवति । यावत्कालपर्यन्तं जगतः पदार्थानामीश्वरलीलातः पृथक् कापि सत्ता विद्यते तावदेव तान् सुखदान् दुःखदान् वा मत्वा मानवो निरन्तरं नवान् नवान् सुखप्रदान् पदार्थानिच्छन्नतृप्तस्तिष्ठति । यदा सर्वेषां मूलं स्रोतः, सर्वेषां यथार्थं पूर्णं स्वरूपं तस्य कृते समुपलब्धं भवति तदा तान् खण्डितानपूर्णांश्च पदार्थान् प्रति तस्य मन एव न याति । स पूर्णं प्राप्य तृप्तो भवति ।

**यत्प्राप्य न किंचिद् वाञ्छति न शोचति न द्वेष्टि न रमते नोत्साही भवति ॥ ५ ॥**

**५—यस्यां ( प्रेमस्वरूपायां भक्तौ ) प्राप्तायां मनुष्यो न किमपि वस्तु वाञ्छति, न शोकं करोति, न द्वेषं विदधाति, न कस्मिन्नपि वस्तुनि समासज्जते, न च तस्य ( विषयभोगानां प्राप्तौ ) उत्साहो भवति ।**

स प्रेमी भक्तस्तत्परमं महद् वस्तु प्राप्नोति यस्मिन् प्राप्ते सति सकला इच्छा नश्यन्ति । जगतः प्रेमैश्वर्यसौन्दर्यबलयशोज्ञानवैराग्यप्रभृतयः समस्ताः पदार्थाः, येषां कृते भोगिनस्त्यागिनश्च सर्वे मानवाः स्वां स्वां रुचिमनुसृत्य सदा लोलुपा भवन्ति, भगवत्प्रेमरूपदुर्लभपदार्थस्य [illegible] सन्ति । [illegible]

सकलाः पदार्था यद्येकस्मिन् स्थाने एकत्रीक्रियेरन्, तथापि ते सर्वे मिलित्वा यस्य भगवद्रूपमहासागरस्यैकेन शीकरेण सदृशा एव भवन्ति, स भगवान् स्वयं यस्य प्रेम्ण आकर्षणेन सदाऽऽकृष्टो भवति, तस्य समक्षे संसारस्य पदार्थाः कस्यां गणनायां सन्ति ?

श्रीशुकदेवो मुनिः कथयति—

**यस्य भक्तिर्भगवति हरौ निःश्रेयसेश्वरे ।**
**विक्रीडतोऽमृताम्भोधौ किं क्षुद्रैः खातकोदकैः ॥**

( श्रीमद्भा० ६ । १२ । २२ )

'यः परमकल्याणस्वामिनि भगवति श्रीहरौ भक्तिं करोति, सोऽमृतसमुद्रे क्रीडति । गर्ते परिपूर्णेन साधारणेन मलिनेन जलेन सदृशे कस्मिंश्चिदपि भोगे स्वर्गादौ वा तस्य मनो न चलितं भवति ।'

प्रेमामृतसिन्धौ निमग्नो भक्तः कथमन्यपदार्थानामिच्छां कुर्यात् ?

भक्तो यथा भोगमोक्षादीनामिच्छां न करोति, तथैव तेषां विनाशेऽपि न शोचति । भोगानां विनाशं स परमात्मनो लीलां मन्यते, अतः सदा सर्वावस्थायां स आनन्द एव मग्नो भवति । परंतु भगवत्-प्रेमसेवने यदि सायुज्यमोक्षस्य साधने न्यूनताऽऽपद्यते,तदा स तदर्थमपि शोकं न करोति । अपि तु सदेदमेवेच्छति यन्मम भगवद्विषयकोऽनुरागो निरन्तरं वर्धमानो भवेत् काममत्र कियन्त्यपि जन्मानि कथं न धार्याणि भवेयुः ।

**नेच्छामि सद्गतिमहं सुमतिं श्रियं वा**
**सिद्धिं समृद्धिमथवा विपुलां महत्ताम् ।**
**निर्हेतुकानुदिवसं रतिरेधतां मे**
**श्रीराघवेन्द्रपदयोरधिकाधिकं वै ॥***

---

* चहौं न सुगति सुमति संपति कछु, रिधि सिधि बिपुल बड़ाई ।
हेतुरहित अनुरागु रामपद बढ़ौ अनुदिन अधिकाई ॥

एवमेव स कस्मिंश्चिदपि जीवेऽथवा लोकदृष्ट्या प्रतिकूलतया स्वीक्रियमाणे पदार्थे तादृश्यां स्थितौ वा कदापि द्वेषं न करोति। स सर्वेषु जीवेष्वात्मनः प्रभुं तथा सकलेषु पदार्थेषु सर्वस्यां स्थितौ च भगवतो लीलां दर्शं दर्शं क्षणे क्षणे भृशमानन्दमनुभवति।

**पश्यन्ति स्वप्रभुं विश्वं विरुन्ध्युः केन ते सह।***

भक्तस्य मनः प्रभुप्रेम्णि संततमेवं लीनं भवति, यत्क्षणार्धमपि अन्यस्मिन् कस्मिंश्चिदपि पदार्थे न रमते। गोप्य उद्धवं प्रति कथयन्ति—

**नैवाभवन् मनांसीह दशविंशतिधोद्धव।**
**एकमासीद् गतं तत्तु श्यामेन प्रेयसा सह॥**
**को नु तिष्ठति यो हीशमधुनाऽऽराधयेदिह।†**

मन आत्मनः पार्श्वे तिष्ठत्येव न, तदा तदन्यस्मिन् कथं रमताम्? अत एव तु प्रेमिणां भगवतो नाम 'मनश्चोरः' अस्ति।

**चौरो मधुकरास्माकं प्रियोऽसौ श्यामसुन्दरः।**
**हृतं दृक्कोरकैर्वीक्ष्य मनो मधुरमूर्तिना॥‡**

स प्रेमिभक्तस्य चित्तमेवं चातुर्येण चोरयित्वा स्वीयसम्पत्तिं करोति, यत्तदुपरि परेषां दृष्टिरपि कदापि न पतितुं शक्नोति। अन्यः कश्चिद् दृश्येत तदा नु कचित्तस्मिन्नासक्तिः प्रीतिर्वा भवेत्, यत्र तु मनसि

---

* निज प्रभुमय देखहिं जगत, केहि सन करहिं बिरोध॥

† ऊधौ मन न भए दस बीस।
एक हुतौ सो गयौ स्याम सँग, को आराधै ईस॥

‡ मधुकर स्याम हमारे चोर।
मन हर लियौ माधुरी मूरति, निरखि नयन की कोर॥

परस्य कल्पनापि नावकाशं लभते तत्र कस्मिन् कस्यासक्ती रतिर्वा भवेत् ? प्रेममयीभिर्गोपीभिरुच्यते—

श्यामस्तनुः श्यामो मनः श्यामो न्वस्त्यस्माकं धन-
मष्टौ यामानुद्धव नः श्यामेनैव कामोऽस्ति ।
श्यामो हृदि श्यामो जीवे श्यामं विना नास्ति तृप्ति-
रन्धस्येव लकुटमाधारो रामनामास्ति ॥
श्यामो गतिः श्यामो मतिः श्याम एव प्राणपतिः
सुखदातुः श्यामतो हितं स शोभाधामास्ति ।
भ्रान्तोऽभूस्त्वमुद्धवाया धावन् पत्रिकामादाय
योगं कुत्र रक्षेमात्र प्रतिरोम श्यामोऽस्ति[1] ॥

यदैकं प्रियतमं श्रीकृष्णं त्यक्त्वापरस्य मनसि प्रवेश एव निषिद्धोऽस्ति, तदान्यस्य कस्यचित् प्राप्त्यर्थमुत्साहस्तु भवेदेव कथम् ? कश्चित् कंचित् पश्येच्छृणुयात् तदर्थं मनसि लालसोत्पन्ना भवेत् तदा नु तत्प्राप्तये प्रयत्नः क्रियताम् । मनः कस्मिंश्चिद् रमेत तदा नु तदुपलब्ध्यर्थमुत्साहो भवेत् । मनस्तु पूर्वत एव कस्याप्येकस्य वशवर्त्यभूत्, तेन मनस उपरि स्वकीयः पूर्णोऽधिकारः स्थापितः । स्वयं च समागत्य

---

१. स्याम तन, स्याम मन, स्याम है हमारौ धन,
आठौ जाम ऊधौ हमैं स्याम ही सौं काम है ।
स्याम हिए, स्याम जिए, स्याम बिनु नाहिं तिये,
आँधे की सी लाकरी अधार स्याम नाम है ॥
स्याम गति, स्याम मति, स्याम ही है प्रानपति,
स्याम सुखदाई सौं भलाई सोभाधाम है ।
ऊधौ ! तुम भए बौरे, पाती लैकैं आए दौरे,
जोग कहाँ राखैं, यहाँ रोम रोम स्याम है ॥

तस्मिञ्छाश्वतिको वासः कृतः । अन्यस्य कस्यापि कृते कोऽप्यवकाश एव नावशिष्टः । यदि कश्चिदायाति तदा स दूरादेव निवर्तितुं विवशो भवति । किं कुर्यात् ? स्थानमेव नास्ति ।

**रोम्णि रोम्णि रमते हरिः स्थानमेव न मनाक् ।***

मनसोऽनुमतिं विना वराके नयने कं पश्येताम् ? यदि कश्चित् कुत्रापि दृश्यत एव न, तदा तत्प्राप्त्यर्थमुत्साहस्य वार्तैव न वर्तते ।

अपरं च—कस्यापि सुखस्येच्छया मानवस्य मनस्युत्साहो भवति । यदा समस्तसुखानां कोष एवात्मनः पार्श्वे वर्तते तदा क्षुद्रसुखस्योपलब्धये कथमुत्साहो भवेत् ? अत एव प्रेमोत्साहयुक्तेषु भगवत्प्रेमिपुरुषेषु लौकिककार्याणि प्रति—विषयान् प्रति कोऽप्युत्साहो न दृश्यते ।

भगवता स्वयमुक्तम्—

**यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।**
**शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः ॥**

( गीता १२ । १७ )

'यो न कदापि हृष्टो भवति, न द्वेषं करोति, न शोचति, न कामयते तथा यः शुभाशुभानां सर्वेषां परित्यागी स भक्तिमान् पुरुषो मे प्रियः ।'

## यज्ज्ञात्वा मत्तो भवति स्तब्धो भवति आत्मारामो भवति ॥ ६ ॥

---

* रोम रोम हरि रमि रहे, रही न तनिकौ ठौर ।

६—यद् ( यां परमप्रेमरूपां भक्तिम् ) ज्ञात्वा ( प्राप्य ) मानव उन्मत्तो भवति स्तब्धः ( शान्तः ) भवति ( तथा ) आत्मारामः सम्पद्यते ।

भगवत्प्रेम प्रकटीभवदेव मनुष्यमुन्मत्तं करोति । अतः प्रेमी भक्तः सदा प्रेममदेन मत्तः सन्नहर्निशं प्रभोरेव गुणान् गायति, शृणोति तथा चिन्तयंस्तिष्ठति । बहिर्भवानामन्यासां वार्तानां तस्य स्मृतिरेव न भवति । यथोन्मत्तो यथेच्छं प्रलपति करोति च तथैव स प्रेमोन्मत्तोऽपि प्रभुचर्चायामेव लीनस्तिष्ठति । यतस्तस्य मनसे इदमेव रोचते । श्रीमद्भागवत उक्तम्—

शृण्वन् सुभद्राणि रथाङ्गपाणे-
र्जन्मानि कर्माणि च यानि लोके ।
गीतानि नामानि तदर्थकानि
गायन् विलज्जो विचरेदसङ्गः ॥
एवंव्रतः स्वप्रियनामकीर्त्या
जातानुरागो द्रुतचित्त उच्चैः ।
हसत्यथो रोदिति रौति गाय-
त्युन्मादवन्नृत्यति लोकबाह्यः ॥
( ११ । २ । ३९-४० )

'भक्तो भगवतश्चक्रपाणेः कल्याणकारकाणि लोके प्रसिद्धानि च जन्मकर्माणि शृण्वन्, तदनुसारेण निर्धारितानि नामानि लज्जां विहाय गायन् संसारेऽनासक्तो भूत्वा विचरति । एवं व्रतं धारयित्वा स स्वप्रियतमस्य प्रभोर्नामसंकीर्तनेन तं प्रति संजातप्रेमातिरेकेण

द्रुतचित्तः सन्नुन्मत्त इव कदाचिदलौकिकभावेन सखिलखिलशब्दं हसति, कदाचिद् रोदिति, कर्हिचिदाक्रोशति क्रन्दते वा कदाचिदुच्चस्वरेण गातुमारभते क्वचिच्च नर्तने प्रवर्तते ।'

एवमुन्मत्त इवाचरन् प्रेमी भक्त आनन्दनिर्भरो भूत्वा कदाचिन्मौनमालम्बते—शान्तो भूत्वोपविशति । इयं स्तब्धता तस्य पूर्णकामतां परिचाययति । प्रभोर्मूर्तिर्हृदि प्रादुर्भूता तस्या रूपमाधुर्येणानन्दमत्तो भूत्वा भक्तो ध्यानमग्नः संजायते ।

सुतीक्ष्णस्य दशां वर्णयता तत्र भवता गोस्वामितुलसीदासेन कथ्यते—

**मुनिः समुपविष्टोऽसौ मार्गमध्येऽचलाङ्ककः ।**
**तनुः पुलकिता तस्य पनसस्य फलं यथा ॥***

नृत्यं कारं कारं प्रभुमयीभूतस्य भक्तस्यैवमेवावस्था बोभूयते । तस्य चित्तं शरीरं च सर्वथा स्तब्धे—शान्ते भवतः । आत्माऽऽनन्दमयः सम्पद्यते । अयमेवात्मारामः कथ्यते । अस्यामात्मारामस्थितौ विषयतृष्णा तु कुत्राप्यवतिष्ठत एव न—

**न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥**

अन्यस्य कस्यापि ज्ञानं न विद्यते । इदमेव प्रेमाद्वैतं रसाद्वैतं वा । प्रेष्ठेन सह मिलितस्य प्रेमिणः पृथगस्तित्वमेव विलुप्यते ।





* मुनि मग माझ अचल होइ बैसा । पुलक सरीर पनस फल जैसा ॥

## प्रेमण्यनन्यता

**सा न कामयमाना निरोधरूपत्वात् ॥ ७ ॥**

**७—सा ( प्रेमाख्या भक्तिः ) कामनायुक्ता न भवति, यतः सा निरोधरूपास्ति ।**

इयं प्रेमभक्तिः सर्वथा त्यागरूपास्ति । अस्यां धनसंतानकीर्तिस्वर्गादीनां तु वार्तैव का, मोक्षस्यापि कामना न स्थातुं शक्नोति । यस्या भक्तेर्विनिमये किंचिद् याच्यतेऽथवा किंचित्प्राप्तेराशाऽऽकाङ्क्षा वा विद्यते सा भक्तिः कामनायुक्तास्ति । सा स्वार्थस्य व्यापाररूपास्ति । प्रेमभक्तौ तु भक्तः स्वप्रियतमं भगवन्तं तदीयां सेवां च त्यक्त्वान्यत् किमपि वाञ्छत्येव न । श्रीमद्भागवते भगवता कपिलदेवेन कथितं यत् 'मम प्रेमिभक्तजना मम सेवां विहाय सालोक्यसार्ष्टिसामीप्यसारूप्यसायुज्याभिधाः ( पञ्चविधाः ) मुक्तीर्दीयमाना अपि न गृह्णन्ति । यथार्थभक्तेरुदये सति कामना नष्टा भवत्येव । यतः सा भक्तिर्निरोधरूपा—त्यागमयीत्यर्थः ।

स निरोधः किंस्वरूपः ? ( इति चेदुच्यते— )

**निरोधस्तु लोकवेदव्यापारन्यासः ॥ ८ ॥**

**८—लौकिकानां वैदिकानां च ( समस्तानां ) कर्मणां त्यागं निरोधं कथयन्ति ।**

प्रेमभक्त्यामयं कर्मत्यागः स्वत एव भवति। प्रेममत्तो भक्तः स्वप्रियतमं भगवन्तं विहायान्यां कामपि वार्तां जानात्येव न। तस्य मनः सदा श्रीकृष्णाकारं तिष्ठति। तस्य नेत्रयोः समक्षे सदा सर्वत्र प्रियतमस्य भगवतश्छविरेव राजते। वस्त्वन्तरं प्रति तस्य मन एव न याति। श्रीगोप्यो भगवन्तमकथयन्—

चित्तं सुखेन भवतापहृतं गृहेषु
यन्निर्विशत्युत करावपि गृह्यकृत्ये।
पादौ पदं न चलतस्तव पादमूलाद्
यामः कथं व्रजमथो करवाम किं वा॥
(श्रीमद्भा० १०। २९। ३४)

'हे प्रियतम! अस्माकं चित्तमानन्देन गृहकार्येष्वासक्तमासीत्, तत्त्वयापहृतम्। अस्माकं हस्तावपि गृहकार्येषु संलग्नावास्ताम्, तावपि चेष्टाहीनौ जातौ, तथास्माकं पादावपि तव पादपद्मौ त्यक्त्वा पदमप्यपसर्तुं नेच्छतः। अधुना वयं गृहं कथं गच्छेम गत्वापि च किं करवाम?'

जगतश्चित्रस्य चित्तभित्तितो विलुप्ततया स भक्तः किमपि लौकिकं वैदिकं वा (स्मार्तं श्रौतं वा) कार्यं कर्तुं योग्यो न तिष्ठति। अतस्तानि सर्वाणि कर्माणि स्वयमेव परित्यक्तानि भवन्ति। श्रीसुन्दरदासाख्यो महापुरुष एतादृशस्य प्रेमिभक्तस्य दशां वर्णयन् कथयति—

न लज्जते त्रिलोकीतो न वेदोक्तं करोति च।
न भूतप्रेततः शङ्की न भीतो देवयक्षतः॥
नान्यस्याकर्णयेद् वार्तां नान्यामिच्छां व्यनक्त्यसौ।
कथां ब्रूते न चान्यस्य सा भक्तिः प्रेमलक्षणा॥
क्वचित् समुत्थाय हसन् स नृत्यति



क्वचित्पुनः प्रारभते च रोदनम्।

कचित्त्वहो ! गद्गदकण्ठरन्ध्रतो
न चाग्रतस्तस्य वचो विनिस्सरेत् ॥
कचिन्मुदाधिक्यमवाप्य मानसे
स्वरेण वै तारतरेण गायति ।
कदाप्यहो ! मौनविमुद्रिताननः
शून्यान्तरो व्योमनिभः स तिष्ठति ॥
लग्नं हरौ तस्य हि चित्तवित्तकं
स सावधानः कथमत्र तिष्ठतु ।
त्वां सुन्दरो वक्ति शृणुष्व शिष्यक !
सुभक्तिरेषा खलु प्रेमलक्षणा ॥*

## तस्मिन्ननन्यता तद्विरोधिषूदासीनता च ॥ ९ ॥

९—तस्मिन् प्रियतमे भगवत्यनन्यतां तत्प्रतिकूले विषये चौदासीन्यमपि निरोधं कथयन्ति ।

बाह्ये ज्ञाने तिष्ठति सति प्रेमी भक्तः स्वप्रियतमं प्रत्यनन्यभावं दधानस्तत्प्रतिकूलकार्येभ्यः सर्वथोदासीनस्तिष्ठति एवं सावधानतया

---

* न लाज तीन लोक की, न वेद को कह्यो करै ।
न संक भूत प्रेत की, न देव यच्छ ते डरै ॥
सुनै न कान और की, द्रसै न और इच्छ ना ।
कहै न बांत और की, सुभक्ति प्रेमलच्छना ॥
कबहुँक हँसि उठि नृत्य करै, रोवन फिरि लागै ।
कबहुँक गद्गदकंठ सबद निकसैं नहिं आगैं ॥
कबहुँक हृदै उमंग बहुत ऊँचे सुर गावै ।
कबहुँक ह्वै मुख मौन गगन-जैसौ रहि जावै ॥
चित्तबित्त हरि सों लग्यौ, सावधान कैसैं रहै ।
यह प्रेमलच्छना भक्ति है, सिष्य सुनौ, 'सुंदर' कहै ॥

सम्पद्यमानानि कर्माण्यपि 'निरोधः' इति कथ्यन्ते। प्रेमिभक्तेन क्रियमाणा प्रत्येकचेष्टा प्रियतमस्यानुकूला भवति तथानन्यभावेन तस्यैव सेवायै सम्पद्यते। प्रतिकूला चेष्टा तु तथैव न भवति यथा सूर्यतोऽन्धकारोऽमृतान्मृत्युर्वा न भवितुं शक्नोति।

## अन्याश्रयाणां त्यागोऽनन्यता ॥ १० ॥

**१०—(स्वप्रियतमं भगवन्तं विहाय) अन्येषामाश्रयाणां परित्यागोऽनन्यता नाम।**

प्रेमिभक्तस्य हृदि स्वप्रियतमं भगवन्तं त्यक्त्वान्यस्य कस्यापि सत्ताया एव कल्पना न भवति, तदा सोऽन्यं कथं भजेत्? स तु चराचरं जगदात्मनः प्रियतमस्य शरीरं जानाति, तेन कुत्रचिदन्यो दृश्यत एव न—

**उत्तमायाः स्त्रियाश्चित्त एवं वसति धारणा।**
**स्वप्नेऽपि नान्यः कोऽप्यस्ति लोकेऽस्मिन् पुरुषः क्वचित् ॥***

रहीमः कविः कथयति यन्नेत्रयोः प्रियतमस्य मधुरा छविरेवं समाविष्टा यथान्यस्याः कस्याश्चिच्छवेः कृते स्थानमेव नावशिष्टम्—

**नेत्रयोरवसत्प्रेष्ठच्छविः कुत्र पराऽऽविशेत्।**
**पूर्णां शालां समालक्ष्य स्वयं पान्थो निवर्तते ॥†**

गोपिकानां सर्वत्र श्याममयीं चित्तवृत्तिं वर्णयता श्रीदेवकविनोक्तम्—

---

* उत्तम के अस बस मन माहीं। सपनेहुँ आन पुरुष जग नाहीं ॥

† प्रीतम छबि नैनन बसी, पर छबि कहाँ समाय।
भरी सराय 'रहीम' लखि आप पथिक फिरि जाय ॥

अकस्मादगाधमषीसागरः समुत्थितोऽभूत्
तत्र त्रयो लोका गताः सह विनिमज्जनम् ।
काले पत्रकेऽङ्कितानि कालान्यक्षराणि पृथक्
कः पठेत् परीक्षतां च जातं चित्तभञ्जनम् ॥
नेत्रयुगे तिमिरममावस्यारजनिरिव
यमुनातरङ्गे जाम्बूनदबिन्दुसञ्जनम् ।
एवमेव मनो मम कार्ययोग्यमस्ति नाम्ब !
श्यामरङ्गेऽविशत च भूत्वा श्यामरञ्जनम् ॥*

यदि कश्चित्तमपरस्य वार्ता कथयति तदा स तां श्रोतुमेव नेच्छति, अथवा सा वार्ता तस्य श्रवणमेव नापद्यते । चेत्कदाचिद् बलाच्छ्रवण-मापद्यतेऽपि, तर्हि तस्य मनस्तत्राकृष्टं भवत्येव न । श्रीशिवस्यानन्यो-पासिका देवी पार्वती यदा सप्तर्षिभिर्महादेवस्यानेकान् दोषान् वर्णयित्वा ततो मनो निवर्तयितुं सर्वगुणसम्पन्ने भगवति विष्णौ च संयोजयितुं समादिष्टा, तदा शिवप्रेमप्रतिमया भगवत्या प्रत्युक्तम्—

कोटिशोजन्मपर्यन्तं संघर्षो मे भविष्यति ।
शम्भुमेव वरिष्यामि कुमारी स्यां स्थितान्यथा ॥

---

* औचक अगाध सिंधु स्याही को उमड़ि आयौ,
तामें तीनौ लोक बूड़ि गए एक संग में ।
कारे कारे आखर लिखे जु कारे कागद सौं
न्यारे करि बाँचै कौन जाँचै चित्तभंग में ॥
आँखिन में तिमिर अमावस की रैन जिमि,
जंबूनद बुंद जमुना जल तरंग में ।
यौं ही मन मेरौ मेरे काम को रह्यौ न माई,
स्याम रंग ह्वै करि समानौ स्याम रंग में ॥

दोषागारो महेशः स्याद्धरिः सर्वगुणाश्रयः ।
रतं यत्र मनो यस्य कार्यं तेनैव तस्य भोः ॥*

एवमेव गोपीभिरप्युद्धवं प्रति निगदितम्—

मनसोऽभिमता वार्ता प्रतिभात्युद्धव प्रिया ।
खर्जूरममृतं द्राक्षां त्यक्त्वा कीटोऽश्नुते विषम् ॥
चकोरोऽर्पितकर्पूरं त्यक्त्वाङ्गारेण तृप्यति ।
भृङ्गः काष्ठे गृहं कुर्यात् पद्मपत्रे निवद्ध्यते ॥
शलभः स्वहितं ज्ञात्वा यथाऽऽलिङ्गति दीपकम् ।
यत्र यस्य मनः 'सूर' तत्तस्मै रोचतेऽधिकम् ॥†

एवं प्रेमी भक्त एकमात्रमात्मनः प्रियतमं भगवन्तमेव ज्ञात्वा, तमेव सर्वस्वं मत्वा यथा मीनस्य केवलं जलमेवावलम्बनं भवति तथैव केवलं भगवन्तमेवाश्रित्य सकलाश्चेष्टास्तदर्थमेव करोति ।

---

* जनम कोटि लगि रगर हमारी । बरउँ संभु न त रहउँ कुआँरी ॥
महादेव अवगुन भवन विष्नु सकल गुन धाम ।
जेहि कर मन रम जाहि सन तेहि तेही सन काम ॥

† ऊधौ ! मन मानेकी बात ।
दाख छोहारा छाड़ि अमृतफल, विषकीरा विष खात ॥
जो चकोर कौं दै कपूर कोउ, तजि अंगार अघात ।
मधुप करत घर कोरे काठ में, बँधत कमल के पात ॥
ज्यौं पतंग हित जान आपनौ दीपक सौं लपटात ।
'सूरदास' जाकौ मन जासौं, ताकौं सोइ सुहात ॥

आश्रय एको बलमेकं चाशैकैको विश्वासः ।
एकरामघनश्यामकृते चातक इव तुलसीदासः ॥*

स चातकस्य मेघविषयिणी दृढनिष्ठेव केवले भगवत्येव चित्तं संयोज्य सम्पूर्णरूपेण तदुपर्येव स्वीयं भारं निक्षिप्य (स्वात्मानं तदाश्रितमेव कुर्वन्) तदर्थमेव शरीरं धारयति । तस्य खादनं पानं शयनमुपदेशनं चलनं भ्रमणं स्नानं दानं दानपुण्यकरणं च सर्वं तदर्थमेव भवति । अत एव तस्य समस्तकर्मणां भगवन्तं प्रत्यनन्यभावेन सम्पन्नतया तानि स्वभावादेव कल्याणमयानि भवन्ति ।

## लोके वेदेषु तदनुकूलाचरणं तद्विरोधिषूदासीनता ॥ ११ ॥

११–लौकिकेषु वैदिकेषु च कर्मसु भगवदनुकूलकर्मानुष्ठानमेव तत्प्रातिकूलविषय उदासीनतास्ति ।

अनन्यभावेन भगवदर्थं कर्म कुर्वतो भक्तस्य कृते भगवत्प्रतिकूलकर्मणां स्वत एव परित्यागो भवति । वैदिकं लौकिकं वा (श्रौतं स्मार्तं वा) किमपीदृशं कर्म स न कर्तुं शक्नोति, यद् भगवतोऽनुकूलं न स्याद्——यतः प्रेमभक्त्यभिवृद्धौ साहाय्यं नोपलभ्येतेत्यर्थः ।

पुत्रस्य कृते मातुः पितुश्च, भार्यायाः कृते भर्तुः, शिष्यस्य कृते च गुरोराज्ञाया अङ्गीकरणं वैदिकलौकिकधर्मानुसारेण सर्वथा कर्तव्यमस्ति । परंतु तेषामाज्ञापि यदि भगवत्प्रेमविरुद्धास्ति तदा प्रेमिभक्तः

---

* एक भरोसो, एक बल, एक आस, बिसवास ।
एक राम घनस्याम हित चातक तुलसीदास ॥

कष्टं सहित्वापि तस्याः परित्यागं करोति; यतस्तद्द्वारा स्वप्रेयसः प्रतिकूलमाचरणं न सम्भवति ।

श्रीगोस्वामिमहाराजेनैतद्विषयकमुदाहरणं ददता निगदितम्—

यस्य नैव प्रियो रामो विदेहतनया तथा ।
यद्यपि स्यात् परः स्नेही स त्याज्यः कोटिशत्रुवत् ॥
प्रह्लादः पितरं बन्धुं संतत्याज विभीषणः ।
जननीं भरतश्चापि बलिरात्मगुरुं तथा ॥
पतयश्च परित्यक्ता व्रजस्थैरङ्गनाजनैः ।
तथाप्येते समेऽभूवञ्जगन्मङ्गलकारिणः ॥*

प्रह्लादेन भगवतः प्रतिकूला पितुराज्ञा नाङ्गीकृता, विभीषणेन भ्रातुः सङ्गः परित्यक्तः, भरतेन मातुराज्ञावहेलिता, राज्ञा बलिना गुरोः शुक्राचार्यस्य वार्ता न कर्णपथमानीता, व्रजवनिताभिश्च पतीनामाज्ञायामवधानं न दत्तं तथापीमे सर्वे लोकस्य कृते कल्याणकारिणः समभूवन् ।

कर्माणि चतुर्विधानि भवन्ति—नित्यं नैमित्तिकं काम्यं निषिद्धं च । एषु मद्यमांससेवनं चौर्यं व्यभिचारादिकं चेति निषिद्धानि कर्माणि तु सर्वेषामेव परित्याज्यानि सन्ति । शास्त्रोक्तानि काम्यानि ( सकामानि ) कर्माणि बन्धनकारकतया जन्ममृत्युचक्रे निपातनशीलतया च 'काम्यानां कर्मणां न्यासम्' इति भगवद्वचनानुसारेण त्यजनीयानि

---

* जाके प्रिय न राम बैदेही ।
तजिये ताहि कोटि बैरी सम जद्यपि परम सनेही ॥
पिता तज्यो प्रहलाद, बिभीषन बंधु, भरत महतारी ।
बलि गुरु तज्यो, कंत ब्रजबनितनि, भए जग मंगलकारी ॥

सन्ति । अथावशिष्टे स्तो नित्यनैमित्तिककर्मणी; एते अपि लौकिकं वैदिकं च विधिमनुसृत्य फलासक्तिं त्यक्त्वा केवलभगवदाज्ञानुसारेण भगवत्प्रीत्यर्थं करणीये । भगवत्प्रीत्यर्थानि तान्येव कर्माणि भवन्ति, यानि भगवन्तं प्रति प्रेमवर्धकानि भवेयुः । भगवद्गीतानुसारेणासक्तिं फलाशां च परित्यज्य मनसा वाचा कायेन च भगवदनुकूलानां कर्मणामाचरणं तत्प्रतिकूलानां च परिवर्जनमेव विरोधिषु कर्मसूदासीनता कथ्यते । प्रेमभक्तेरुन्मादमयी स्थितिर्यावन्न प्राप्यते, तावदीदृशानि भगवदनुकूलानि कर्माणि प्रेमिभक्तद्वारा स्वभावतः क्रियमाणानि भवन्ति ।

## भवतु निश्चयदार्ढ्यादूर्ध्वं शास्त्ररक्षणम् ॥१२॥

**१२–( विधिनिषेधातीतमलौकिकं प्रेमोपलब्धुं मनसि ) दृढनिश्चयादनन्तरमपि शास्त्रस्य रक्षणं करणीयम् । भगवदनुकूलानि शास्त्रोक्तानि कर्माणि कर्तव्यानीत्यर्थः ।**

दृढनिश्चयादनन्तरमपि शास्त्रस्य रक्षणं करणीयम् । भगवदनुकूलानि शास्त्रोक्तानि कर्माणि कर्तव्यानीत्यर्थः । प्रेम्णो बाह्यज्ञानशून्यायां विधिनिषेधातीतायां सिद्धावस्थायां लौकिकानां वैदिकानां च कर्मणां त्यागः स्वत एव सम्पद्यते, ज्ञात्वा-बुद्ध्वा न क्रियते ।

अत एव यावत् प्रेम्णस्तादृशी सर्वविस्मारिणी स्थितिः प्राप्ता न भवेत्तावत् प्रेम्णो नाम गृहीत्वा ( प्रेमाणमावरकीकृत्य वा ) शास्त्रविहितकर्मणां त्यागः कदापि न करणीयः । शास्त्रमनुसृत्य भगवदर्पणबुद्ध्या भगवदनुकूलं नित्यं नैमित्तिकं च कर्म तथा श्रवणकीर्तनादिरूपं भजनं कारं कारमेव भगवतस्तत्परमोच्चं प्रेम भक्तजनैरुपलभ्यते । भगवान् स्वयमादिशति—

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥
(गीता १६ । २४)

'अतस्तव किं कर्तव्यं किं च न कर्तव्यम्—इति व्यवस्थायां शास्त्रमेवं प्रमाणमस्ति । इदं ज्ञात्वा त्वया शास्त्रविधिमनुसृत्यैव कर्म कर्तव्यम् ।

## अन्यथा पातित्याशङ्कया ॥ १३ ॥

### १३—नो चेत्तर्हि पतनस्य सम्भावनास्ति ।

यो मनुष्यो ज्ञात्वा-बुद्ध्वा शास्त्राणामाज्ञायाः पालनमकृत्वा शास्त्र-प्रतिकूलममर्यादितं कार्यं करोति तथा तत् प्रेमेति व्यपदिश्य दोषमुक्तो भवितुमिच्छति, सोऽवश्यमेव पतति । भगवता स्वयमुक्तम्—

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥
(गीता १७ । २३)

'यो मनुष्यः शास्त्रविधिं त्यक्त्वा यथेच्छमाचरति स न सिद्धिं प्राप्नोति न परमगतिं लभते नापि च तेन सुखमेव प्राप्यते ।'

ज्ञात्वा बुद्ध्वा शास्त्रविहितकर्मणां त्यागः प्रेम्ण आदर्शो न भवति, स मोहोऽस्ति, उच्छृङ्खलता स्वेच्छाचारश्चास्ति, एवं कुर्वन्नरः परिणतावासुरीं योनिं नरकं दुःखानि च प्राप्नोति ।

## लोकोऽपि तावदेव किंतु भोजनादिव्यापार-स्त्वाशरीरधारणावधि ॥ १४ ॥

**१४—लौकिककर्माण्यपि तावत् ( बाह्यज्ञानावस्थान-पर्यन्तं विधिना कर्तव्यानि ) परंतु भोजनादिकार्याणि यावच्छरीरं स्थास्यति, तावद् भविष्यन्ति ।**

वैदिकैः कर्मभिः सहैव लौकिकानि जीविकानिर्वाहगार्हस्थ्य-पालनादिसम्बन्धीनि कर्माण्यपि सावधानतया भगवदनुकूलविधि-मनुसृत्य करणीयानि । अवश्यमेवैकैतादृशी बाह्यज्ञानशून्या* सिद्धावस्था भवति, यस्यां वैदिकानि लौकिकानि च कर्माणि विनैवायासं मुच्यन्ते । परंतु तादृशी स्थितिर्यावन्न प्राप्ता भवेत्तावदुभयविधानि कर्माणि विधि-पूर्वकमवश्यं करणीयानि । तादृश्यां विधिनिषेधातीतायां फलस्वरूपायां स्थितौ तु तानि स्वत एव परित्यक्तानि भविष्यन्ति । किंतु भोजनादीनि कर्माणि तस्यामवस्थायामपि स्थास्यन्ति; यतस्तानि शरीर-धारणायावश्यकानि सन्ति । यद्यपि प्रेममदमत्तो भक्त आहाराद्यर्थं कामपि चेष्टां न करोति, तथापि योगक्षेमवाहकस्य भगवतो विधानेन तस्य कृते आहारप्राप्तिर्निरन्तरं भवत्येव । अवश्यमेव स आहारो भगवत्प्रसाद एव भवति ।

---

* 'बाह्यज्ञानशून्या सिद्धावस्था' इति कथनेनात्र भावसमाधिर्न बोध्यः । इयं प्रेम्णः सा पूर्णतमा सफला स्थितिरस्ति यस्यां प्रेममयं भगवन्तं त्यक्त्वा 'बाह्य' नामधेयमन्यत् किमपि तिष्ठत्येव न । भगवदतिरिक्त-बाह्यवस्तुनो ज्ञाने सम्पूर्णतया निःशेषे सत्येवेयं विधिनिषेधातीता फलस्वरूपा स्थितिः प्राप्यते ।

# प्रेमरूपाया भक्तेर्लक्षणान्युदाहरणानि च

## तल्लक्षणानि वाच्यन्ते नानामतभेदात् ॥ १५ ॥

**१५—अथेदानीं नानामतानुसारेण तस्या भक्तेर्लक्षणानि प्रतिपाद्यन्ते ।**

विभिन्नैराचार्यैर्भक्तेः स्वरूपं भिन्नभिन्नरूपेण प्रतिपादितम् । प्राक् तेषां विभिन्नमतानां वर्णनं कृत्वा देवर्षिनारदः पुनरात्मनो मतं दर्शयितुमिच्छति ।

## पूजादिष्वनुराग इति पाराशर्यः ॥ १६ ॥

**१६—पराशरनन्दनस्य श्रीव्यासस्य मतानुसारेण भगवतः पूजादिष्वनुरागो भक्तिरस्ति ।**

आत्मनस्तनुं मनो धनं च भगवतः पूजनसामग्रीं जानीयात्तथा परया श्रद्धया यथाविधि त्रिभिरपि ( साधनैः ) भगवतः प्रतिमाया विश्वरूपस्य वा भगवतः पूजां कुर्यात् । भगवत्पूजायां मनोयोगेन संसारस्य बन्धनकारकविषयेभ्यो मनः स्वत एव निवर्तते । बाह्येन मानसेन चोभयेनैव प्रकारेण भगवतः पूजा भवितुमर्हा । भगवत्पूजया भगवतः परमं पदं प्राप्यते—

**श्रीविष्णोरर्चनं ये तु प्रकुर्वन्ति नरा भुवि ।**
**ते यान्ति शाश्वतं विष्णोरानन्दं परमं पदम् ॥**

( विष्णुरहस्ये )

'अस्मिन् धरातले ये मानवा भगवतः पूजां कुर्वन्ति ते सनातनमानन्दमयं परमं पदं प्राप्नुवन्ति ।'

## कथादिष्विति गर्गः ॥ १७ ॥

### १७—श्रीगर्गाचार्यस्य मतेन भगवतः कथादिष्वनुराग एव भक्तिः ।

भगवतो दिव्यलीलाया महिम्नस्तदीयगुणानां नाम्नां च कीर्तने तथा श्रवणे मनोनियोजनं भक्तेः प्रधानं लक्षणमिति नात्र संदेहः । संसारे बहवो मनुष्यास्त्वीदृशाः सन्ति येषां भगवता तत्कथया च किमपि प्रयोजनमेव नास्ति, अहर्निशं विषयचर्चायामेव तेषां जीवनं व्यतीतं भवति । न तु ते कदापि भगवतो गुणगानं कुर्वन्ति, न च तेभ्यो भगवच्चर्चा रोचते—'श्रवणं रामकथानुरागि नो* ।' अस्यामवस्थायां येषां मनुष्याणां मनो भगवतो गुणानुवादस्य श्रवणे कीर्तने च संलग्नं विद्यते तेऽवश्यमेव भक्ताः सन्ति ।

सूत्रकारेणाचार्यश्रीनारदेन स्वयं महर्षिवेदव्यासं प्रति कथितम्—

**इदं हि पुंसस्तपसः श्रुतस्य वा**
**स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः ।**
**अविच्युतोऽर्थः कविभिर्निरूपितो**
**यदुत्तमश्लोकगुणानुवर्णनम् ॥**

( श्रीमद्भा० १ । ५ । २२ )

'विद्वद्भिरिदमेव निरूपितं यद् भगवतो गुणानुकीर्तनमेव

---

* श्रवन न रामकथा अनुरागी ।

तपसो वेदाध्ययनस्य सम्यक्तया सम्पादितस्य यज्ञस्य मन्त्रस्य ज्ञानस्य दानादेश्च—सर्वेषामविनाशि फलमस्ति ।' श्रीरामचरितमानसे कथितम्—

**रम्या रामकथा हस्ततलवादनरूपिणी ।**
**संदेहविहगानां वै समुड्डयनकारिणी ॥**
**भवसिन्धोरपारस्य यः पारं गन्तुमिच्छति ।**
**सुदृढा तरणिर्ज्ञेया कथा रामस्य तत्कृते ॥***

अतएव श्रीहरिकथायां यथार्थोऽनुरागो भक्तिरस्ति तथानया भक्त्या भगवतः प्राप्तिरवश्यं भवति ।

## आत्मरत्यविरोधेनेति शाण्डिल्यः ॥ १८ ॥

**१८—शाण्डिल्यमुनेर्मत आत्मरत्यविरोधिनि विषयेऽनुराग एव भक्तिरस्ति ।**

अविच्छिन्नरूपेण शुद्धात्मस्वरूपे निरतत्वमेवात्मरतिरस्ति; अस्यामात्मरतौ नित्यस्थितिमेवाव्यक्तोपासकमहानुभावा भक्तिं कथयन्ति । श्रीशंकराचार्येण निगदितम्—

**मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी ।**
**स्वस्वरूपानुसंधानं भक्तिरित्यभिधीयते ॥**

आत्मरूपेण प्रतिप्राणि श्रीभगवानेव विराजते, अतस्तस्मिन् सर्वात्मनि रतिर्वस्तुतो भगवद्भक्तिरेवास्ति तथेदृशीं भक्तिं कुर्वतां मुक्तौ न कोऽपि संदेहः ।

---

* रामकथा सुंदर करतारी । संसय बिहग उड़ावन हारी ॥
भवसागर चह पार जो पावा । रामकथा ता कहँ दृढ़ नावा ॥

**नारदस्तु तदर्पिताखिलाचारिता तद्विस्मरणे परमव्याकुलतेति ॥ १९ ॥**

**१९—परंतु देवर्षेर्नारदस्य मतेनात्मनः सर्वेषां कर्मणां भगवते समर्पणं तथा भगवतः किंचिदपि विस्मरणे परमव्याकुलतैव भक्तिरस्ति ।**

नारदस्य महर्षिव्यासगर्गशाण्डिल्यकथितभक्तिलक्षणेभ्यो न कोऽपि विरोधः। भगवतः पूजनं गुणगानं तथा सर्वात्मरूपे भगवति प्रेमकरणमुचितमावश्यकं चास्ति। श्रीव्यासस्तु श्रीमता नारदेनैव भगवद्गुणगाने नियोजित आसीत्। अत एतानि लक्षणानि खण्डयितुमथवैषां तुच्छतां प्रतिपादयितुं नैव, अपि त्वेतान्येव पुनरधिकं पोषयितुं श्रीनारद एतैः सर्वैर्लक्षणैर्युक्तमेकं सर्वाङ्गपूर्णं भक्तिलक्षणं निर्दिशन् कथयति यदात्मनः समस्तकर्माणि (वैदिकानि लौकिकानि च) भगवदर्पितानि कृत्वा प्रियतमस्य भगवतोऽखण्डस्मरणं तथा पलमपि यदि तस्य विस्मरणं स्यात् (प्रियतमो विस्मृतो भवेत्) तदा परमव्याकुलीभवनम्—इयमेव सर्वलक्षणसम्पन्ना भक्तिरस्ति। अस्यां पूजाकथयोरनुरागस्तथा विश्वात्मनि भगवति रतिस्तु तिष्ठत्येव। भगवान् श्रीमद्भगवद्गीतायां सर्वविधेषु योगिष्वेतैरुपर्युक्तैर्लक्षणैर्युक्तं भक्तियोगिनमेव सर्वोत्तममकथयत्—

**तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ।**
**कर्मिभ्यश्चाधिको योगी तस्माद् योगी भवार्जुन ॥**
**योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।**
**श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥**

(६।४६-४७)

'तपस्विभ्यः शास्त्रज्ञानिभ्यः सकामकर्मिभ्यश्च योगी श्रेष्ठोऽस्ति। अतएव हे अर्जुन ! त्वं योगी भव। परंतु सम्पूर्णयोगिष्वपि स भक्तियोगी मम मते परमः श्रेष्ठोऽस्ति, यो मयि श्रद्धावानस्ति तथा मद्गतेनान्तरात्मना निरन्तरं मां भजति।'

भगवता पुनरादिष्टमस्ति—

**तस्मात् सर्वेषु कालेषु मामनुस्मर युद्ध्य च।**
**मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयम् ॥**

( गीता ८। ७ )

'अतएव हे अर्जुन ! त्वं सर्वेषु कालेषु ( अविरामम् ) मम स्मरणं कुरु तथा ( स्मरणं कुर्वन्नेव मदर्थमेव ) युद्धं कुरु। एवं मय्यर्पितमनोबुद्धिः सन् निस्संदेहं मामेव प्राप्स्यसि।'

मानापमाने लाभालाभौ जयपराजयौ सुखदुःखादिकं चागणयित्वाऽऽसक्तिं फलेच्छां च त्यक्त्वा शरीरे संसारे चात्मनः कृतेऽहंताममताराहित्येनैकमात्रं परमप्रियतमं श्रीभगवन्तमेव परमाश्रयं परमां गतिं परमं सुहृदं मत्वानन्यभावेनात्यन्तश्रद्धया सह प्रेमपूर्वकं तस्य नामगुणप्रभावस्वरूपाणां तैलधारावन्निरन्तरं चिन्तनपुरस्सरं परमानन्दे निमग्नीभवनं तथैवं चिन्तनपरायणतापूर्वकं केवलं तस्य परमप्रियतमस्य भगवतः कृते तदीयां रुचिमिच्छां चानुसृत्य तस्यैव प्रीत्यर्थं तस्यैव सुखप्राप्तिसम्बन्धिनः सुदृढात् परमस्वार्थात् प्रेरणां प्राप्य सर्वथा निःस्वार्थभावेन समस्तदैहिकवाचिकमानसिककर्मणामाचरणम्, यदि केनापि कारणेन क्षणमपि तस्य चिन्तनं स्मरणं वा परित्यक्तं स्यात् तदा जलनिष्कासितान्मत्स्यादप्यनन्तगुणाधिकाया व्याकुलताया अनुभवनम्—इयमेव सर्वोत्कृष्टा भक्तिरस्ति।

एवं पूर्णसमर्पणकारी प्रेमिभक्तस्त्रिलोक्या राज्यसुखस्य तु वार्तैव का, अपुनरावर्तिमोक्षस्य कृतेऽपि कस्यामप्यवस्थायां स्वप्रियतमस्य भगवतः स्मरणं विहातुं नेच्छति । भगवानेतादृशस्य भक्तस्य प्रशंसां कुर्वन् भक्तमुद्धवं कथयति—

न तथा मे प्रियतम आत्मयोनिर्न शंकरः ।
न च संकर्षणो न श्रीर्नैवात्मा च यथा भवान् ॥
निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शनम् ।
अनुव्रजाम्यहं नित्यं पूयेयेत्यङ्घ्रिरेणुभिः ॥
निष्किञ्चना मय्यनुरक्तचेतसः
शान्ता महान्तोऽखिलजीववत्सलाः ।
कामैरनालब्धधियो जुषन्ति यत्
तन्नैरपेक्ष्यं न विदुः सुखं मम ॥
( श्रीमद्भाग० ११ । १४ । १५–१७ )

'हे उद्धव ! एवंविधा यूयं भक्ता यथा मम प्रियाः स्थ तथा न ब्रह्मा न शंकरो न बलरामो न लक्ष्मीर्न चैव वा स्वात्मापि प्रियोऽस्ति । ईदृशं किमपि वस्तु नेच्छतां शान्तचित्तानां निर्वैराणां सर्वत्र समभावेन मां पश्यतां तथा निरन्तरं मम मननं कुर्वतां प्रेमिभक्तानां चरणरेणुभिरात्मानं पावयितुमहं सदा सर्वत्र तेषां पृष्ठतो भ्रमणं करोमि । मय्यनुरक्तचेतसः सर्वस्वं मह्यमर्पयित्वा निष्किंचनतां गताः शान्तास्तथा मम सम्बन्धेन सर्वान् प्राणिनः प्रति स्नेहं कुर्वाणाः सर्वविधकामनाशून्यहृदया महात्मानो यत्परमं सुखमनुभवन्ति तन्निरपेक्षं परमानन्दमितरे जना न जानन्ति ।' अलम् । श्रीनारदस्य मतेनेयमेव भक्तिरस्ति । एतादृशो भक्तः समस्तमाचरणं श्रीभगवते समर्प्याविच्छिन्नं भगवत्स्मरणं

कुर्वंस्तिष्ठति । तथा कुत्रापि मनागपि विस्मरणे जाते परमव्याकुलो भवति ।

**अस्त्येवमेवम् ॥ २० ॥**

**२०—यथार्थत एवमेवास्ति ।**

देवर्षिर्नारदः पूर्वस्मिन् सूत्रे निगदितस्य सिद्धान्तस्य दार्ढ्याय कथयति यद् वस्तुतो भक्तेरिदमेव स्वरूपमस्ति ।

**यथा व्रजगोपिकानाम् ॥ २१ ॥**

**२१—यथा व्रजगोपिकानाम् ( भक्तिः ) ।**

भक्तेर्लक्षणं प्रतिपाद्याधुना देवर्षिरुदाहरणरूपेण प्रेमिकाशिरोमणीनां प्रातःस्मरणीयानां श्रीगोपिकानां नामोपस्थापयति ।

वस्तुतो गोपिकानामीदृश एव महिमास्ति । जगति क एवंविधोऽस्ति यो गोपिकानां प्रेमतत्त्वं वर्णयितुं शक्नुयात्, तासां तनुर्मनो धनं लोकः परलोकश्च—सर्व एव श्रीकृष्णार्पिता आसन् । ता रात्रिंदिवं श्रीकृष्णमेव चिन्तयन्ति स्म, गद्गदया गिरा निरन्तरं श्रीकृष्णस्यैव गुणान् गायन्ति स्म तथा सर्वत्र सर्वदा श्रीकृष्णमेव पश्यन्ति स्म । स्वयं भगवता श्रीकृष्णेन ताः प्रति कथितम्—

न पारयेऽहं निरवद्यसंयुजां
स्वसाधुकृत्यं विबुधायुषापि वः ।
या माभजन् दुर्जरगेहशृङ्खलाः
संवृश्च्य तद् वः प्रतियातु साधुना ॥

( श्रीमद्भाग० १० । ३२ । २२ )

'हे गोपिकाः ! युष्माभिर्मदर्थे गृहस्थाश्रमस्य दुर्भेद्याः शृङ्खलास्त्रोटयित्वा मम भजनं कृतम् । युष्माकमिदं कार्यं सर्वथा निर्दोषमस्ति । अहं देवानामायुः पर्यन्तमपि युष्माकमस्योपकारस्य प्रतिकारं कर्तुं न क्षमः । यूयमात्मन उदारतयैव मामृणमुक्तं कुरुध्वम् ।'

( गोपिकानां कृते ) संदेशं दत्त्वोद्धवं प्रेषयन् भगवाञ्छ्रीकृष्णः प्रेमाश्रूणि मुञ्चन् गद्गदया गिरा निजगाद —

**ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः ।**
**ये त्यक्तलोकधर्माश्च मदर्थे तान् बिभर्म्यहम् ॥**
**मयि ताः प्रेयसां प्रेष्ठे दूरस्थे गोकुलस्त्रियः ।**
**स्मरन्त्योऽङ्ग विमुह्यन्ति विरहौत्कण्ठ्यविह्वलाः ॥**
**धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथंचन ।**
**प्रत्यागमनसंदेशैर्वल्लव्यो मे मदात्मिकाः ॥**

( श्रीमद्भाग० १० । ४६ । ४—६ )

'हे उद्धव ! गोपीभिरात्मनो मनो मह्यं समर्पितमस्ति । अहमेव तासां प्राणरूपोऽस्मि । मदर्थे ताभिः स्वदेहस्य सर्वे व्यवहाराः परित्यक्ताः सन्ति । ये लोका मदर्थे सर्वाँल्लौकिकधर्मांस्त्यजन्ति तानहं सुखं प्रापयामि । ता गोपिका मां प्रियेभ्योऽपि प्रियतमं जानन्ति, मयि दूरस्थे सति मां स्मरन्त्यस्ता दारुणविरहवेदनया व्याकुला भूत्वा विमुह्यन्ति—स्वदेहमपि विस्मरन्ति । मया विना ता अतिकृच्छ्रेण कथमपि प्राणान् धारयन्ति । अहं पुनर्व्रजमागमिष्यामीति मम संदेशमवलम्ब्यैव ता जीवन्ति । अहं तासां गोपीनामात्मास्मि ताश्च मम ।'

उद्धवेन व्रजमागत्य यदा प्रेममयीनां गोपीनां दशा दृष्टा, ताः सर्वतो बहिरन्तश्च श्रीकृष्णमेव पश्यन्त्यः समुपलब्धास्तथा यदा तासां मुखाच्छ्रुतम्—

( १ )

नास्त्येव हृदये स्थानमपरस्य कृते तु नः ।
कथमानीयतामन्यः सति श्रीनन्दनन्दने ॥
चलने दर्शनेऽहस्सु जागर्तौ स्वपने निशि ।
चित्तात्सा श्यामला मूर्तिः क्षणं नेतस्ततोऽञ्चति ॥
कथा बहुविधा ब्रूषे कृत्यबोधनहेतवे ।
दर्शयँल्लोकलज्जां वै करवाम किमुद्धव ॥
प्रेमपूर्णा तनुर्नैव घटे सिन्धुः समाविशेत् ।
गात्रं श्यामाभिरामं सत्सरोजसदृशं मुखम् ॥
स्मितं च मधुरं मन्दं लीलया ललिता गतिः ।
'सूर' तादृशरूपाय म्रियेते लोचने तृषा ॥*

---

( १ )

* नाहिन रह्यौ हिय महँ ठौर ।
नंदनंदन अछत कैसैं आनिये उर और ॥
चलत, चितवत, दिवस जागत, सुपन सोवत रात ।
हृदय ते वह स्याम मूरति छिन न इत उत जात ॥
कहत कथा अनेक ऊधौ, लोक लाज दिखात ।
कहा करौं तन प्रेमपूरन, घट न सिंधु समात ॥
स्याम गात, सरोज आनन, ललित गति, मृदु हास ।
'सूर' ऐसे रूप कारन मरत लोचन प्यास ॥

( २ )

योगयोग्या वयं न स्म इत्युद्धव निशामय।
सारं ज्ञानस्य जानीयुर्ध्यानं दध्युः कथं स्त्रियः ॥
ते निमीलयितुं ब्रूषे हरेर्मूर्तिर्ययोर्दृशोः।
श्रृङ्गैवं सच्छला वार्तास्माभिः श्रोतुं न शक्यते ॥
'कर्णौ भिन्धि जटां बद्ध्वा' कैवं दुःखं सहिष्यति।
ब्रवीषि चन्दनं त्यक्त्वा सर्वाङ्गे भस्मलेपनम् ॥
न जानीषे वयं दग्धा अत्यन्तं विरहाग्निना।
भ्रमन्ति योगिनो मुग्धा यदर्थं सोऽस्ति नोऽन्तरे।
'सूर' श्यामान्न वै भिन्नाश्छायेवाङ्गात् पलं क्षणम् ॥*

यदा गोप्य ऊचुः—'उद्धव ! योगं तान् गत्वा शिक्षय यत्र श्यामसुन्दरस्य वियोगः स्यात्। अत्र तु पश्य, सदैव संयोगोऽस्ति। अस्माकं प्रियतमः श्यामः सदा सर्वदास्माकं पार्श्वे एव तिष्ठति।

तदोद्धवस्य नयने उन्मीलिते। स गोपीनां शुद्धप्रेम्णः प्रबले प्रवाहे प्रावहत्—

---

( २ )

* ऊधौ ! जोग जोग हम नाहीं।
अबला ग्यान-सार कहा जानैं, कैसैं ध्यान धराहीं ॥
ते ये मूदन नैन कहत हौ, हरि मूरति जिन माहीं।
ऐसी कथा कपट की, मधुकर ! हम ते सुनी न जाहीं ॥
स्रवन चीरि सिर जटा बँधावहु, ये दुख कौन समाहीं।
चंदन तजि अँग भस्म बतावत, बिरह-अनल अति दाहीं ॥
जोगी भ्रमत जाहि लगि भूले, सो तो है अप माहीं।
'सूर' स्याम ते न्यारा न पल-छिन, ज्यौं घट ते परिछाहीं ॥

उद्धवः स्वं विसस्मार श्रुत्वा गोपीवचो व्रतम् ।
गोपालस्य गुणान् गायन् कुञ्जेषु विचरन्मुदा ॥
क्षणे नमति गोप्यङ्घ्रीन् धन्यः स नियमो मतः ।
धावं धावं द्रुमान्मत्तः प्रेम्णा श्लिष्यति चोद्धवः ॥*

तेन भक्तिप्रणतचेतसा कथितम्—

एताः परं तनुभृतो भुवि गोपवध्वो
गोविन्द एव निखिलात्मनि रूढभावाः ।
वाञ्छन्ति यद् भवभियो मुनयो वयं च
किं ब्रह्मजन्मभिरनन्तकथारसस्य ॥
× × ×
नायं श्रियोऽङ्ग उ नितान्तरतेः प्रसादः
स्वर्योषितां नलिनगन्धरुचां कुतोऽन्याः ।
रासोत्सवेऽस्य भुजदण्डगृहीतकण्ठ-
लब्धाशिषां य उदगाद् व्रजवल्लवीनाम् ॥
आसामहो चरणरेणुजुषामहं स्यां
वृन्दावने किमपि गुल्मलतौषधीनाम् ।
या दुस्त्यजं स्वजनमार्यपथं च हित्वा
भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम् ॥
( श्रीमद्भाग० १० । ४७ । ५८, ६०, ६१ )

जगत्येतासां गोपललनानामेव देहधारणं सफलमस्ति । यत

* सुनि गोपी के बैन, नेम ऊधौ के भूले ।
गावत गुन गोपाल फिरत कुंजन में फूले ॥
खिन गोपिन के पग परै, धन्य सोइ है नेम ।
धाइ धाइ द्रुम भेंटहीं, ऊधौ छाके प्रेम ॥

आसां चित्तं तस्मिन् विश्वात्मनि भगवति श्रीगोविन्दे संलग्नमस्ति, यं भवभयभीता मुनिगणा वाञ्छन्ति वयं च वाञ्छामः । सत्यमस्ति, ये श्रीमदनन्तस्य लीलाकथानां रसिकाः सन्ति, तेषां ब्राह्मणानां त्रिभिर्जन्मभिः ( जन्मोपनयनयज्ञदीक्षारूपैः ) कावश्यकतास्ति ? रासलीलासमये भगवतो भुजदण्डं कण्ठहारीकृत्य पूर्णकामाभिराभिर्व्रजबालाभिः श्रीहरेर्यः प्रसादः प्राप्तः, तादृशः प्रसादो निरन्तरं हृदयवासिन्या श्रीलक्ष्म्या तथा कमलोपमकान्तिसौरभसंयुक्ताभिः सुरसुन्दरीभिरपि नोपलब्धः । का वार्ता पुनरन्यासाम् ? आभिर्महाभागाभिर्गोपीभिर्दुस्त्यजान् बन्धूनार्यधर्मं च त्यक्त्वा श्रुतिभिर्या मृग्यते सा मुकुन्दपदवी समनुसृता । अहो ! कियदुत्तमं भवेद् यद्यहमागामिनि जन्मनि वृन्दावनस्यास्य गुल्मलतौषधीनां किमपि स्यां यासामुपर्यासां गोपिकानां चरणरेणुः पतति ।

मथुरायाः कुलाङ्गनाभिर्गोपिकानां दशां वर्णयित्वा तासां जीवनं धन्यं कथयन्तीभिरुक्तम्—

**या दोहनेऽवहनने मथनोपलेप-**
**प्रेङ्खेङ्खनार्भरुदितोक्षणमार्जनादौ ।**
**गायन्ति चैनमनुरक्तधियोऽश्रुकण्ठ्यो**
**धन्या व्रजस्त्रिय उरुक्रमचित्तयानाः ॥**

( श्रीमद्भाग० १० । ४४ । १५ )

'या गोप्यो गवां दुग्धस्य दोहनकाले, धानाद्यवहननसमये, दधिमन्थनकाले, प्राङ्गणोपलेपनसमये, बालकानां दोलायामान्दोलने रुदतां बालानां सान्त्वनाय गीते गीयमाने गृहे प्रोक्षणमार्जनादौ

क्रियमाणे प्रेमपूर्णचित्ताः प्रेमाश्रुपूरितलोचनाः सत्यो गद्गदगिरा श्रीकृष्णस्य गुणान् गायन्ति, ता गोविन्दनिवेशितचित्ता गोपरमण्यो धन्याः ।'

आसां गोपीनां यावान् महिमा गीयेत तावानेव स्वल्पतरः । सर्वत्यागिनो व्रजवासिनो भक्तास्तु गोपीपदपङ्कजपरागभवनमेव वाञ्छितवन्तः । सत्यमेवोक्तम्—

**गोप्यो वै प्रेमपुञ्जस्य विस्फुरन्त्यो ध्वजाः स्मृताः ।**
**याभिर्वशीकृतः श्यामो धृत्वा श्यामभुजां हृदि ॥***

महाप्रभुश्रीचैतन्यदेवसदृशा महात्यागिनो महापुरुषा गोपीजनं प्रेममार्गस्य गुरुममन्यन्त । महान् भक्तः श्रीनागरीदासः कथयति—

**जयन्ति ललितादिका व्रजकिशोरिका देविका**
**ऋचोऽभिमतकेलये मधुरिपोरधीराः सदा ।**
**प्रियद्वयरसोन्मदाः प्रमदरूपरूपाब्धयः**
**समस्तसुखसुक्षणे तदनुगा निजच्छायवत् ॥**
**सुगौरमुखचन्द्रमोरुचिररश्मिमाला नु याः**
**स्रवन्त्यमृतगीतकं दयितहृन्मुदुद्वेल्लनम् ।**
**समा दयितयोर्द्वयं सह नयन्ति संकेतकं**
**तदीयगुणवर्णने मतिरुपैति मे पङ्गुताम् ॥†**

---

* गोपी प्रेम की धुजा ।
जिन घनस्याम किए बस अपने, उर धरि स्याम भुजा ॥

† जयति ललितादि देवीय ब्रज सुतिरिचा,
कृष्ण प्रियकेलि आधीर अङ्गी ।
जुगल-रस-मत्त आनंदमय रूपनिधि,
सकल सुख समय की छाँह संगी ॥

एकेन व्रजभक्तेन कथितम्—

हरिरतिरस्या गोप्योऽन्याभ्यो विलक्षणा वै।
कमलेक्षणगोविन्देन्दोरसुदयिततमा वै॥
निर्मत्सरसाधूनां चूडामणयो गोप्यः।
प्रेमधारयामलया मर्यादालोपिन्यः॥
या एवं सीमां विलोप्य मोहनं स्मरन्तु।
परमानन्दां कथं प्रेमपदवीं न भजन्तु॥*

गोपीनां महिमा तदैव किंचिज्ज्ञातुं शक्यते यदा साधको विषयेभ्यः परमं वैराग्यं धारयित्वा प्रेमपथे किंचिदग्रेसरो भवति।

## तत्रापि न माहात्म्यज्ञानविस्मृत्यपवादः॥२२॥

२२—अस्यामवस्थायामपि (गोपीषु) माहात्म्यज्ञानस्य विस्मृतेरपवादो नास्ति।

---

गौर मुख हिम-किरन की जु किरनावली,
स्रवत मधु गान हिय पिय तरंगी।
नागरी सकल संकेत आकारिनी
गनत गुन गननि मति होति पंगी॥

* हरि रस ओपी गोपी सकल तियनि तैं न्यारी।
कमल नयन गोविंद चंद की प्रान पियारी॥
निरमत्सर जे संत तिनकि चूड़ामनि गोपी।
निरमल प्रेम प्रबाह सकल मरजादा लोपी॥
जे ऐसैं मरजाद मेटि मोहन कौं ध्यावैं।
काहें न परमानंद प्रेम पदवी कौं पावैं॥

अयं भावः—गोप्यो भगवतः श्रीकृष्णस्य प्रभावं रहस्यं गुणांश्च जानन्ति स्म । कियतां जनानां कथनमस्ति यत्प्रेम्णि माहात्म्यज्ञानं न तिष्ठति । माहात्म्यज्ञानं स्याच्चेत्तर्हि प्रेमस्थितिर्न स्यात्, परंतु गोपीष्वीदृशी वार्ता नासीत् । गोप्यः श्रीकृष्णं साक्षाद् भगवन्तं पुरुषोत्तमं जानन्त्यो निजं प्रियतमं मन्यन्ते स्म । लौकिके प्रेम्णि भगवत्प्रेम्णि चायमेव मुख्यो भेदः । भगवत्प्रेम्णि वस्तुत एवमेव भवति । ये जनाः कथयन्ति यद् गोप्यः श्रीकृष्णं भगवद्रूपं न जानन्ति स्म, ते श्रीमद्भागवतस्याधोऽङ्कितानां श्लोकानां मननं कुर्वन्तु—

मैवं विभोऽर्हति भवान् गदितुं नृशंसं
संत्यज्य सर्वविषयांस्तव पादमूलम् ।
भक्ता भजस्व दुरवग्रह मा त्यजास्मान्
देवो यथाऽऽदिपुरुषो भजते मुमुक्षून् ॥
यत्पत्यपत्यसुहृदामनुवृत्तिरङ्ग
स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तम् ।
अस्त्वेवमेतदुपदेशपदे त्वयीशे
प्रेष्ठो भवांस्तनुभृतां किल बन्धुरात्मा ॥
यर्ह्यम्बुजाक्ष तव पादतलं रमाया
दत्तक्षणं क्वचिदरण्यजनप्रियस्य ।
अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षमङ्ग
स्थातुं त्वयाभिरमिता बत पारयामः ॥
श्रीर्यत्पदाम्बुजरजश्चकमे तुलस्या
लब्ध्वापि वक्षसि पदं किल भृत्यजुष्टम् ।

यस्याः स्ववीक्षणकृतेऽन्यसुरप्रयास-
स्तद्वद् वयं च तव पादरजः प्रपन्नाः ॥
( १० । २९ । ३१-३२, ३६-३७ )

व्यक्तं भवान् व्रजभयार्तिहरोऽभिजातो
देवो यथादिपुरुषः सुरलोकगोप्ता ।
( १० । २९ । ४१ )

न खलु गोपिकानन्दनो भवा-
नखिलदेहिनामन्तरात्मदृक् ।
विखनसार्थितो विश्वगुप्तये
सख उदेयिवान् सात्वतां कुले ॥
( १० । ३१ । ४ )

'हे विभो ! भवानेवं नृशंसं शब्दं ( निवर्तनवार्ताम् ) न गदितुमर्हति । वयमन्यान् सर्वविषयांस्त्यक्त्वा केवलं भवदीयं चरणकमलमेवाश्रिताः । हे स्वच्छन्द ! यथाऽऽदिपुरुषो भगवान्नारायणो मुमुक्षून् भजते ( तेषामिच्छामनुसृत्य तान् स्वीकरोति ) तथैव भवानस्मानङ्गीकरोतु । मा त्यजतु । हे हरे ! भवान् धर्मज्ञोऽस्ति ( कथं पुनर्भवान् कथयति यद् यूयं प्रतियात । भवन्तं शरणं प्रपद्यापि कश्चित् कदापि निवर्तते कच्चित् ? ) भवता यदिदमुक्तं पतिपुत्रबन्धुबान्धवानां सेवनमेव स्त्रीणां परमो धर्मोऽस्तीति, सोऽयमुपदेश उपदेशपदे भवतीश्वर एवास्तु, यतः सर्वेषां देहभृतां प्रियतमो बन्धुरात्मा च भवानेवास्ति । हे कमललोचन ! यस्मिन् काले श्रीलक्ष्म्याः ( श्रीविष्णुरूपेण ) कदाकदाचिदानन्दप्रदायकौ भवतश्चरणकमलौ वयमस्पृशाम तया

वनवासिनां तपस्विनां प्रियेण भवता वयमानन्दितास्ततः प्रभृत्येवान्यत्र कचिदवस्थानमस्माकं कृतेऽसम्भवमभवत् । यस्याः कृपादृष्टिं प्राप्तुं देवगणा अत्यन्तं प्रयतन्ते सा लक्ष्मीर्भवतो वक्षःस्थले निष्प्रतिद्वन्द्वं स्थानमुपलभ्यापि तुलस्या सहान्यभक्तैः सेवितं भवतः पादरजः कामयते, वयमपि निस्संदेहं भवतस्तदेव चरणरजः शरणं प्रपन्नाः स्मः । यतो देवानां रक्षको भवानादिपुरुषः परमात्मैव, व्रजमण्डलस्य भयं दुःखं च दूरीकर्तुं व्यक्तमवतीर्णोऽस्ति । न खलु भवान् यशोदाया एव पुत्रोऽस्ति, अपि तु समस्तदेहधारिणामन्तरात्मनः साक्ष्यस्ति । हे सखे ! ब्रह्मणाभ्यर्थितो भवान् सम्पूर्णजगद्रक्षणाय यदुकुलेऽवतीर्णोऽस्ति ।"

एवंविधैरनेकैः प्रमाणैर्युक्तिभिश्चेदं सर्वथा सिद्धमस्ति यद् गोपीभिः श्रीकृष्णं साक्षात् सच्चिदानन्दघनं भगवन्तं बुद्ध्वैव तस्मै स्वात्मसमर्पणं कृतमासीत् ।

## तद्विहीनं जाराणामिव ॥ २३ ॥

**२३—तद्विना ( भगवतो भगवत्ताया ज्ञानं विना क्रियमाणमेवंविधं प्रेम ) जाराणां ( प्रेम्णा ) सदृशमस्ति ।**

माहात्म्यज्ञानं विना स्त्रीभिः कंचिदपि पुरुषं प्रति क्रियमाणमेतादृशं प्रेम जारप्रेमतुल्यं भवति । यस्मिन् सर्वार्पणमस्ति, यस्मिल्लौकिकस्वार्थस्य स्वल्पतरो गन्धोऽपि नास्ति, एतादृशं प्रेम केवलं भगवन्तं प्रत्येव भवितुं शक्नोति । यद्यपि ज्ञात्वाज्ञात्वा कथमपि भगवन्तं प्रति कृतं प्रेम निष्फलं न भवति, तथापि ज्ञात्वा क्रियमाणे प्रेम्णि वैशिष्ट्यं भवति । भगवानस्माकं प्रियतमोऽस्तीति कल्पनायामेव क्रियमाण

आनन्दोऽस्ति । येषां पुनः स भगवान् परमप्रियतमरूपेणोपलब्धो भवेत् तेषां सुखस्य किं वर्णनं भवेत् ? गोप्योऽस्यैव परमपवित्रदिव्यसुखस्य भागिन्य आसन् । अतएव जीवन्मुक्तेन महात्मना शुकदेवेन मुनिना मरणाय समुद्यतं राजानं परीक्षितं प्रतीयं पवित्रा प्रेमलीला वर्णिता । अत एवेदं प्रेम भगवन्माहात्म्यज्ञानेन युक्तं परमं पवित्रमासीत् ।

## नास्त्येव तस्मिंस्तत्सुखसुखित्वम् ॥ २४ ॥

**२४—तस्मिन् ( जारप्रेम्णि ) प्रियतमस्य सुखेन सुखित्वं नास्ति ।**

व्यभिचारिणो मनुष्याः कामविवशा भूत्वा केवलमात्मसुखाय स्वेन्द्रियाणां तृप्त्यर्थं प्रीतिं कुर्वन्ति, ते स्वप्रेमास्पदस्य सुखेन सुखिनो न भवन्ति । गोपिकानां प्रेम्ण्ययं भावो नासीत् । लौकिककामजनितायां प्रीतौ प्रेमास्पदपुरुषो जारो भवति तथा तदङ्गसङ्गस्येच्छा भवति । अत्र तु साक्षाद् विश्वात्मा भगवान् प्रेमास्पदीभूत आसीत् तथा गोपीनां मनस्यङ्गसङ्गस्य कामना नासीत् । गोप्यः केवलं श्रीकृष्णसुखस्याभिलाषिण्य आसन् । ताभिरात्मनस्तनुमनोबुद्धिरूपयौवनधनप्राणप्रभृतीनि समस्तानि वस्तूनि प्रियतमस्य श्रीकृष्णस्य पूजनसामग्रीरूपाणि कृतान्यासन् । स्वीयं सर्वस्वं दत्त्वा ताः श्रीकृष्णं सुखिनं कर्तुमिच्छन्ति स्म । येन कार्येण श्रीकृष्णस्य प्रसन्नता भवति तस्यैवानुष्ठानं तासां धर्म आसीत् । तस्मिन्नेव तासां परमसुखस्यानुभूतिर्भवति स्म । एतद् विहाय तासां हृदयेऽन्येन प्रकारेण भाविनः सुखस्य

कामना तु दूरे तिष्ठतु कल्पनापि नासीत् । इदमेव तु कामप्रेम्णो-रन्तरमस्ति । कामः कामयतेऽन्यद्द्वारकमात्मनः सुखित्वं तथा प्रेम वाञ्छति स्वात्मना प्रियतमस्य सुखीकरणं तं सुखिनं दृष्ट्वैव स्वस्य सुखीभवनं च । श्रीचैतन्यचरितामृते गोपीनां प्रेम्णो वर्णनपूर्वकं साधुतरमेव कथितम्—

निजेन्द्रियाणां तृप्तेस्तु कामना काम उच्यते ।
कृष्णेन्द्रियप्रीतिवाञ्छा प्रेमनाम्नापदिश्यते ॥
केवले निजसम्भोगे कामतात्पर्यमिष्यते ।
यत्कृष्णसुखतात्पर्यं प्रेम तत् प्रबलं स्मृतम् ॥
आत्मनः सुखदुःखानि गोपिका नैव चिन्तयेत् ।
व्यवहारोऽखिलस्तस्याः श्रीकृष्णसुखहेतवे ॥
लौकिकं वैदिकं धर्मं दैहिके धर्मकर्मणी ।
लज्जां देहसुखं धैर्यमात्मनः सुखमर्म च ॥
सर्वं त्यक्त्वा करोत्येषा कृष्णस्याराधनं परम् ।
श्रीकृष्णस्य सुखायैव कुरुते प्रेमसेवनम् ॥
अयमेवोच्यते कृष्णेऽनुरागः सुदृढः शुभः ।
धौते वस्त्रे यथा स्वच्छे मलं किमपि तत्र नो ॥
अत एवान्तरं ज्ञेयं भूयिष्ठं प्रेमकामयोः ।
कामोऽन्धकारः प्रेमा तु निर्मलो भास्करो मतः ॥
तस्माद् गोपीगणे नैव कामगन्धोऽपि दृश्यते ।
गोप्याः कृष्णेन सम्बन्धस्तत्सुखस्यैव हेतवे ॥*

---

* आत्मेन्द्रिय-प्रीति-इच्छा, तार नाम काम ।
कृष्णेन्द्रिय-प्रीति-इच्छा धरे प्रेम नाम ॥

भगवते श्रीकृष्णाय सर्वस्वसमर्पणं पलमपि तद्विस्मरणे परमव्याकुलता श्रीकृष्णस्य प्रभावस्य माहात्म्यस्य च सम्यग् ज्ञानं तथा श्रीकृष्णस्य सुख एव सुखानुभव इमान्येव चत्वार्यङ्गानि गोपीप्रेम्णि मुख्यानि सन्ति ।

इदं गोपीप्रेम परमं पवित्रमलौकिकं चास्ति । अस्मिन् ये पापं व्यभिचारं वा पश्यन्ति तेषु श्रीकृष्णो दयां कुर्यात् ।



---

कामेर तात्पर्य निज सम्भोग केवल ।
कृष्ण-सुख-तात्पर्य प्रेम तो प्रबल ॥
आत्म-सुख-दुख गोपी ना करे विचार ।
कृष्ण-सुख हेतु करे सब व्यवहार ॥
लोकधर्म, वेदधर्म, देहधर्म, कर्म ।
लज्जा, धैर्य, देहसुख, आत्मसुख-मर्म ॥
सर्वत्याग करये करे कृष्णेर भजन ।
कृष्ण-सुख हेतु करे प्रेमेर सेवन ॥
इहा के कहिये कृष्णे दृढ़ अनुराग ।
स्वच्छ धौत वस्त्र जैछे नाहि कोन दाग ॥
अतएव काम प्रेमे बहुत अंतर ।
काम अंधतम प्रेम निर्मल भास्कर ॥
अतएव गोपीगणे नाहि कामगन्ध ।
कृष्ण-सुख-हेतु मात्र कृष्णेर सम्बन्ध ॥

# प्रेमरूपा भक्तिः फलरूपास्ति

## सा तु कर्मज्ञानयोगेभ्योऽप्यधिकतरा ॥ २५ ॥

२५—सा ( प्रेमरूपा भक्तिस्तु ) कर्मणो योगाच्चापि श्रेष्ठतरा अस्ति ।

कर्म ज्ञानं योगश्चेति त्रीण्येव भगवत्प्राप्तेः साधनानि सन्ति, परंतु भक्तिरेभ्यस्त्रिभ्योऽपि सर्वतः श्रेष्ठतरा अस्ति । तेषु कर्मादिषु वर्णाश्रमाधिकारादीनां विचारोऽस्ति । सहैव, तत्र पतनाद् भयमप्यस्ति । परंतु सत्यायां भक्तौ भगवतः पूर्णसाहाय्यसत्त्वात् किमपि भयं नास्ति । तथास्यां स्त्रियाः पुरुषस्य ब्राह्मणस्य शूद्रादेश्च सर्वेषामेवाधिकारोऽस्ति । गोस्वामी तुलसीदासजीमहाराजः कथयति—

ईदृशीं श्रेयसीं भक्तिं ज्ञात्वा परिहरन्ति ये ।
केवलं बोधलब्ध्यर्थं नित्यं कुर्वन्ति च श्रमम् ॥
ते जडाः स्वगृहे त्यक्त्वा कामधेनुमभीष्टदाम् ।
पयःप्राप्त्यर्थमर्कद्रुं मृगयन्तो भ्रमन्ति वै ॥
पक्षिराज शृणुष्वेदं हरिभक्तिं विहाय ये ।
उपायैर्विविधैरन्यैः सुखमीप्सन्ति संततम् ॥

पारावारमपारं ते जलयानं विना शठाः ।
तीर्त्वा पारमभीप्सन्ति बाहुभ्यां मन्दभागिनः ॥
योगाज्जपाद्दानतपोमखैरुमे
नानाविधैः सन्नियमैर्व्रतैरपि ।
रामः कृपां नैव करोति तादृशीं
प्रेम्णा यथानन्यगतेन संततम् ॥*
वार्तामिमां मे शृणु पन्नगारे
प्रेम्णा समानं भजनं न चान्यत् ।
एतद् विचार्यैव पुनः पुनर्वै
गायन्ति रामस्य गुणान् मुनीन्द्राः ॥†

स्वयं श्रीभगवान् कथयति—

न साधयति मां योगो न सांख्यं धर्म उद्धव ।
न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता ॥
भक्त्याहमेकया ग्राह्यः श्रद्धयाऽऽत्मा प्रियः सताम् ।
भक्तिः पुनाति मन्निष्ठा श्वपाकानपि सम्भवात् ॥
( श्रीमद्भाग० ११।१४।२०-२१ )

---

* जें असि भगति जानि परिहरहीं । केवल ग्यान हेतु श्रम करहीं ॥
ते जड कामधेनु गृहँ त्यागी । खोजत आकु फिरहिं पय लागी ॥
सुनु खगेस हरि भगति बिहाई । जे सुख चाहहिं आन उपाई ॥
ते सठ महासिंधु बिनु तरनी । पैरि पार चाहहिं जड़ करनी ॥
उमा जोग जप दान तप नाना व्रत मख नेम ।
राम कृपा नहिं करहिं तसि जसि निष्केवल प्रेम ॥

† पन्नगारि सुनु प्रेम सम भजन न दूसर आन ।
यह बिचारि मुनि पुनि पुनि करत राम गुन गान ॥

'यथा मद्विषया दृढभक्तिर्मां वशीकरोति तथा योगो ज्ञानं धर्मः स्वाध्यायस्तपस्त्यागश्च मां वशीभूतं कर्तुं न शक्नुवन्ति । सतां प्रिय आत्माहमेकया श्रद्धायुक्तया भक्त्या वशीकर्तुं शक्यः; मन्निष्ठा भक्तिश्चाण्डालादीनपि पवित्रहृदयान् कर्तुं समर्थास्ति ।'

एवमेव श्रीभगवता गीतायामप्युक्तम्—

**नाहं वेदैर्न तपसा न दानेन न चेज्यया।**
**शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा॥**
**भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन।**
**ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप॥**
(११।५३-५४)

'हे अर्जुन ! यथा त्वं मां दृष्टवान्, तथा वेदैस्तपसा दानेन यज्ञादिना चाहं न द्रष्टुं शक्यः। हे परंतप अर्जुन ! अनन्यभक्त्यैवेत्थमहं द्रष्टुं तत्त्वेन ज्ञातुं तथा प्रवेष्टुं शक्योऽस्मि ।'

## फलरूपत्वात् ॥ २६ ॥

## २६—यतः ( सा भक्तिः ) फलरूपास्ति ।

वस्तुत इयं भक्तिः फलरूपास्ति, न साधनरूपा । या भक्तिर्ज्ञानस्य साधनभूता मन्यते सा गौणी भक्तिः साधारणोपासनास्ति, प्रेमरूपा भक्तिर्नास्ति । प्रेमरूपा भक्तिस्तु समस्तसाधनानां फलमस्ति ।

**तीर्थेषु भ्रमणं नित्यं साधनानां च संचयः ।**
**वैराग्यमथवा योगो ज्ञाने निपुणता तथा ॥**

नाना कर्माणि धर्माश्च दानानि सव्रतानि च।
संयमश्च दमश्चैव जपो नाना मखास्तपः॥
भूतेषु करुणा सेवा ब्राह्मणानां गुरोस्तथा।
विद्याविनयसंयुक्ता महत्ता च विवेकिता॥
यावन्ति साधनानीह वेदैरुक्तानि चाखिलैः।
फलमेषां तु सर्वेषां हरिभक्तिर्महेश्वरि॥*

## ईश्वरस्याभिमानद्वेषित्वाद् दैन्यप्रियत्वाच्च ॥ २७ ॥

२७—ईश्वरस्याप्यभिमानं प्रति द्वेषभावोऽस्ति दैन्यं प्रति च प्रियभावः।

कर्मणो ज्ञानस्य योगस्य च साधकेषु स्वबलस्य स्वकीयसाधनस्य चाभिमानं भवितुं शक्नोति। भगवतस्तु नामैव दर्पहर्तास्ति। वस्तुतो भगवतो न कस्मिंश्चिद् द्वेषोऽस्ति न वा रागः, तस्य कृते सर्वे समानाः सन्ति। स सर्वेषामेवोद्धारं करोति। बाढमुद्धारस्य साधनानि भिन्न-भिन्नानि सन्ति। अभिमानिन उद्धारं तं दण्डयित्वा करोति तथा दीनस्य सेवकस्य समुद्धारं तं प्रेम्णा कण्ठे समाश्लिष्य करोति। अतएव भगवतः क्रोधोऽपि वरेण तुल्यः कथितः। अभिमानिनं प्रति भगवान् द्वेषिण इव लीलां करोति तथा दीनं प्रति प्रेमिण इव। अतएव तस्य दीनबन्धुरशरणशरणं निर्धनस्य धनमित्यादीनि नामानि सन्ति। यथार्थ-

---

* तीर्थाटन साधन समुदाई। जोग बिराग ग्यान निपुनाई॥
नाना कर्म धर्म व्रत दाना। संजम दम जप तप मख नाना॥
भूतदया द्विज गुर सेवकाई। बिद्या बिनय बिबेक बड़ाई॥
जहँ लगि साधन बेद बखानी। सब कर फल हरि भगति भवानी॥

तत्त्वभिमानिनं प्रत्यपि तस्य हृदये प्रेमैव भवति । अतएव तु स तस्याभिमानं नष्टं करोति ।

**श्रूयतां रामचन्द्रस्य स्वभावः सहजः शुभः ।**
**जनस्य किमपि स्वस्य सोऽभिमानं न रक्षति ॥***
**मानं हि संसृतेर्मूलं नानाशूलप्रदं तथा ।**
**अभिमानं सदा विद्धि सर्वशोकप्रदायकम् ॥**
**तस्माद् दूरीकरोत्येषोऽभिमानं करुणानिधिः ।**
**ममता सेवके स्वीये यतोऽस्यास्त्येव भूयसी ॥†**

एतावति सत्यपि दण्डे द्वेषो दृश्यत एव; परंतु दीनममानिनमकिंचनं तु तत्रभवान् हृदये समाश्लिष्यति । तस्य लघोर्लघुतरं कार्यं कर्तुमपि स संकोचं न करोति । भक्तजनास्तु स्वभावादेवात्मानं भगवत्किंकरं मन्यन्ते । ते कथयन्ति—

**सर्वसाधनहीनस्य पराधीनस्य सर्वथा ।**
**पापपीनस्य दीनस्य कृष्ण एव गतिर्मम ॥**

'हे प्रभो ! सर्वसाधनहीनस्य मायया सर्वथा पराधीनस्य पापभाराक्रान्तस्य मम दीनस्य तु केवलं त्वमेव गतिरसि ।'

---

*सुनहु राम कर सहज सुभाऊ । जन अभिमान न राखहिं काऊ ॥

† संसृति मूल सूलप्रद नाना । सकल सोक दायक अभिमाना ॥
ताते करहिं कृपानिधि दूरी । सेवक पर ममता अति भूरी ॥

**पादौ त्यक्त्वा क्व ते यायां कस्य दीना अतिप्रियाः ।**
**कस्य वा नाम विख्यातं लोके पतितपावनः ॥***

इयं दीनता तस्या अभावस्थितेर्नाम नास्ति यत्र मनुष्यो धनमान-वैभवादीनामभावेन ग्रस्तो भूत्वा तत्प्राप्तये व्याकुलस्तिष्ठति । इयं दीनता तु तस्या निरभिमानताया अहंकारशून्यतायाश्च नामास्ति या महतो महीयसा वैभवशालिना सम्राजापि भगवत्कृपया प्राप्तुं शक्यते । अस्या दीनताया अभिप्रायोऽस्ति—अभिमानस्य कर्तृत्वाहंकारस्य च नाशभवनम् । इदं बोधनं यद् 'अहम्' इति 'मम' इति च किंचिदपि नास्ति । यत्किंचिदस्ति तत्सर्वं भगवत्स्वरूपमस्ति तथा सर्वं भगवतोऽस्ति—सर्वं तस्यैव शक्त्या प्रेरणया च भवति, कर्ता कारयिता च स एवास्ति ।

किंतु भगवतः प्रियेयं वास्तविकी दीनताऽनायासेनैव नोप-लभ्यते । अभिमानरूपस्य सकलस्य भूतस्य शिरसोऽवरोहणं विना दीनता नायाति । वर्णजातिधनमानविद्यासाधनस्वास्थ्यादीनामभिमानं कर्तृत्वस्याहंकारश्च मनुष्य एतादृश्या दीनताया उत्पत्तौ बाधा-मुपस्थापयतः । उपरितो ( बाह्यतो वा ) मनुष्यः सदम्भं दैन्यं दर्शयति, भगवतः समक्षे स्वं दीनं कथयति, रोदनमभिनयति, परंतु तस्य दीनतायाः परीक्षा तु तदैव भवति, यदा महद्भ्योऽपि महतां सांसारिक-पदार्थानां साधनानां च प्राप्तावपि स्वाभाविकी दीनता यथावत् स्थिरा

---

* जाउँ कहाँ तजि चरन तुम्हारे ।
काको नाम पतित पावन जग केहि अति दीन पियारे ॥

भवेत्। यः सर्वेषां जनानां सम्मुखे स्वतो हीनां स्थितिमुपगतैरन्यैरात्मनः कृते कृतं दीन इति पापीति च व्यपदेशं न केवलं सहत एवापि तु तत्कथनं सत्यं मत्वा प्रसन्नो भवति तथा प्रभुप्राप्तये सदैव यस्य चित्तं खिन्नं तिष्ठति, एवंविधा एव खिन्ना दीना भगवतः प्रिया भवन्ति। यथार्थभक्तौ स्वपुरुषार्थस्य साधनस्य वाभिमानमायातुमेव न शक्नोति। अतएव भक्तिः श्रेष्ठा।

## तस्या ज्ञानमेव साधनमित्येके ॥ २८ ॥

**२८—तस्याः (भक्तेः) साधनं ज्ञानमेवास्तीति केषांचिद् (आचार्याणाम्) मतमस्ति।**

यद्यपि भक्तावस्य ज्ञानस्य तु परमावश्यकतास्ति, यदहं यं भजामि, स एव सर्वेषां स्वामी सर्वेषामाधारः, सर्वमहेश्वरो जगत उत्पादकः पालकः संहारकश्च मायायाः पतिरजोऽविनाशी सर्वशक्तिमान् सर्वज्ञः सर्वात्मा निर्गुणो निर्विकारो निराकारः सगुणः साकारो भगवानस्ति; ततः श्रेष्ठमन्यत् किमपि नास्ति। यत एतावदपि ज्ञानं चेन्न स्यात्तदा श्रद्धा न भविष्यति। श्रद्धां विना प्रीतिर्न स्यात्, प्रीतिं च विना भक्तिर्दृढा न स्यात्।

न विना प्रभुताज्ञानं प्रतीतिः स्याद्रघूत्तमे।
प्रतीतिं न विना प्रीतिस्तस्मिन् समुपजायते॥
नहि प्रीतिं विना भक्तिः सुदृढा स्यात् कदाचन।
पक्षिराज यथाम्बूनां स्निग्धता न स्थिरा भवेत्॥*

---

* जाने बिनु न होइ परतीती। बिनु परतीति होइ नहिं प्रीती॥
प्रीति बिना नहिं भगति दिढ़ाई। जिमि खगपति जल कै चिकनाई॥

परंत्वत्राद्वैतज्ञानसाधनस्यावश्यकता न भवति । केवलया श्रद्धया भावेनैव च परमात्मनो भक्तिः प्राप्ता भवति । गृध्रराजगजेन्द्र-शबरीप्रभृतयो भक्ताः केवलयैतादृश्यैव भगवद्भक्त्या भगवन्तं प्राप्नुवन् ।

**अन्योन्याश्रयत्वमित्यन्ये ॥ २९ ॥**

**२९—अपरेषां (आचार्याणां) इदं मतमस्ति यद् भक्तिर्ज्ञानं चान्योन्याश्रिते स्तः ।**

एवमपि भवति । गौण्या भक्त्या भगवतस्तत्त्वस्य ज्ञानं भवति तथा तत्त्वस्य ज्ञानेन भगवत्यत्यन्तं प्रेमोत्पन्नं भवति । परंतु केवलभक्तेः प्रेमिजना एतन्मतं न गणयन्ति । यतस्त इदं जानन्ति यद् यदा निर्मलप्रेम-स्वरूपाया भक्तेः पूर्णः प्रादुर्भावो भवति तदा कस्यचिदपि ज्ञानं पृथक् तिष्ठत्येव न । प्रेमी प्रेमास्पदश्चोभावेकीभवतः तदा कः पुनः कं जानीयात् ?

**स्वयंफलरूपतेति ब्रह्मकुमाराः ॥ ३० ॥**

**३०—ब्रह्मकुमाराणां (सनत्कुमारादीनां नारदस्य च) मतेन भक्तिः स्वयं फलरूपास्ति ।**

अतएवेयं भक्तिरेव साधनमस्ति भक्तिरेव च साध्या । मूलमपि सैव । फलमपि च सैव । भक्तगणा भक्त्यर्थमेव भक्तिं कुर्वन्ति; यतो भक्तिः स्वयं फलरूपास्ति । सा न तु केनापि साधनेन लभ्यते नापि च किमपि ततः श्रेष्ठं वस्तु यस्य प्राप्त्यै सा साधनं स्यात् ।

---

१. पाठान्तरम्—'ब्रह्मकुमारः' ।

सा स्वतन्त्रावलम्बोऽस्या नापरो दृश्यते क्वचित्।
ज्ञानं चापि सविज्ञानं तदधीनं निगद्यते ॥*

## राजगृहभोजनादिषु तथैव दृष्टत्वात् ॥ ३१ ॥

३१—राजगृहे भोजनादौ चैवमेव दृश्यते।

इदं पूर्वोक्ताया भक्तेः फलरूपतायाः सम्यग्ज्ञानायोदाहरणमस्ति।

## न तेन राजपरितोषः क्षुधाशान्तिर्वा ॥ ३२ ॥

३२—न तेन ( राजगृहभोजनादिज्ञानमात्रेण ) राज्ञः प्रसन्नता भविष्यति न वा क्षुधा शान्तिमेष्यति।

केवलं राजप्रासादस्य वर्णनश्रवणेन ज्ञानेन च कार्यं न चलति। राजा धर्मात्मा, शक्तिशाली, प्रजाहितैषी, रूपगुणसम्पन्नश्चास्तीति वार्तापि विज्ञाता, किंत्वेतावता किमभूत् ? एतज्ज्ञानमात्रेण राजा प्रसन्नोऽभूत् कच्चित् ? एवमेव ज्ञातं यत्संयावो मधुरो भवति, घृतशर्कराभ्यां सम्पाद्यते स्वादिष्ठश्चास्तीति। परंत्वेतावता क्षुधा तु न शाम्यति। इत्थमेव केवलशब्दज्ञानेन न तु भगवतः प्रसन्नता भवति नापि चास्माभिः शान्तिरेव लभ्यते। यद्यपि भगवतः सविधे सर्वे समानाः सन्ति, तथापि तदीया प्रसन्नता तु भक्त्यैव लभ्यते। स स्वयं कथयति—

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्॥
( गीता ९।२९ )

---



* सो स्वतंत्र अवलंब न आना। तेहि आधीन ग्यान बिग्याना॥

'अहं सर्वेषु भूतेषु समोऽस्मि, न कश्चिन्मम द्वेष्योऽस्ति; न च प्रियः। तथापि ये मां भक्त्या भजन्ति ते मयि सन्ति, अहं तेष्वस्मि।'

**तस्मात् सैव ग्राह्या मुमुक्षुभिः ॥ ३३ ॥**

**३३—अतएव (संसारस्य बन्धनात्) मुक्तिमिच्छद्भिर्भक्तिरेव ग्राह्या।**

भक्त्या भवबन्धनं त्वनायासेनैव च्छिद्यत एव साक्षाद् भगवानपि तस्य प्रेमास्पदीभूय तेन सह दिव्यां लीलां करोति।

**अत्यन्तं दुर्लभं ज्ञेयं कैवल्यं परमं पदम्।**
**वदन्ति निगमाः संतः पुराणानि तथाऽऽगमाः॥**
**श्रीरामं भजतो नित्यं सैव मुक्तिः खगेश्वर।**
**अनिच्छतोऽपि भक्तस्य बलादायाति संनिधौ ॥***

अन्यान्यैर्महद्भिर्महद्भिः साधनैरप्यनायासेन लब्धुमशक्यातिदुर्लभा मुक्तिरयाचितैव बलादायाति; परंतु ते भक्तास्तु—

**मुक्तिर्मुक्तिं निराहृत्य भक्तौ लुभ्यन्ति संततम् ॥†**

मुक्तिं प्रति नेत्रे समुत्थाप्यापि न पश्यन्ति। एवं सुलभां सर्वोपरिस्थितिरूपां च भक्तिं विहायापरं साधनं कोऽपि कथं कुर्यात्? श्रद्धालुभिर्बुद्धिमद्भिश्च पुरुषैः केवला भक्तिरेवाचरणीया।

---

* अति दुर्लभ कैवल्य परम पद। संत पुरान निगम आगम बद॥
राम भजत सोइ मुकुति गोसाईं। अन इच्छित आवइ बरिआईं॥

† मुक्ति निरादर भगति लुभाने।

## प्रेमरूपाया भक्तेः साधनानि सत्सङ्गस्य महिमा च

**तस्याः साधनानि गायन्त्याचार्याः ॥ ३४ ॥**

**३४—आचार्यगणास्तस्या भक्तेः साधनानि वर्णयन्ति ।**

कर्मज्ञानयोरपेक्षया भक्तेः श्रेष्ठतां प्रतिपाद्याधुना देवर्षिर्नारदो भक्तिशास्त्रस्य प्रधानप्रवर्तकैर्भक्तितत्त्वस्यानुभविभिश्चाचार्यैस्तथा सद्भिर्भक्तैर्गीतानि तस्याः श्रेष्ठतमाया भक्तेः साधनानि वर्णयति ।

**तत्तु विषयत्यागात्सङ्गत्यागाच्च ॥ ३५ ॥**

**३५—तत्तु ( भक्तिसाधनं ) विषयत्यागात् सङ्गत्यागाच्च सम्पन्नं भवति ।**

जीवस्य मनसि स्वाभाविकमेव प्रेम्णः स्रोतोऽस्ति । यतो जीवः परमानन्दात्मनः परमप्रेमरूपस्य भगवत एव सनातनश्चिदंशोऽस्ति । परंतु विषयान् प्रति प्रवहणात् तस्य प्रेमधारा दूषिता संजाता । अतएव च तत्प्रेम दुःखोत्पादककामरूपेण परिणममानं तिष्ठति तथात एव कारणात्तस्य परमात्मोन्मुखस्य दिव्यस्वरूपस्य प्रकाशो न भवति । प्रेम्णो दिव्यस्वरूपस्य प्रकाशाय तस्य विषयाभिमुखीं गतिं परावर्त्येश्वराभिमुखीं कर्तुमावश्यकतास्ति । एतत्कृते द्वावुपायौ स्तः । १—विषयाणां स्वरूपतस्त्यागः, २—विषयेष्वासक्तेस्त्यागश्च । ये लोका इदं मन्यन्ते यद् विषयेष्वासज्जमानस्य तथा यथेच्छममर्यादितं विषयाणां संग्रहमुपभोगं च कुर्वत एव जनस्य भगवद्भक्तेः प्राप्तिर्भविष्यति, अथवा भगवद्भक्तेर्मार्गे विषयाणां तदासक्तेश्च परित्यागस्य काप्यावश्यक-

तैत्र नास्ति, ते महत्यां भ्रान्तौ निपतिताः सन्ति । भक्तौ तु स्वात्मनो भोगार्थं किमपि वस्तु विद्यत एव नहि । यदा भोक्तैव कोऽपि न तिष्ठति तदा भोग्यं वस्तु कुतस्तिष्ठेत् ? तत्र तु केवलः प्राणाधारो भगवानेव सर्वभोक्तास्ति तथा वयं स्वीयैः सर्वैरङ्गैरखिलैरुपकरणैश्च सहिता भगवतो भोग्याः स्मः । स एवैकः पुरुषोऽस्ति तथान्ये सर्वे तस्य भोग्या प्रकृतिः । अस्यामवस्थायां भक्तस्यात्मनः कोऽपि भोग्यो विषयस्तिष्ठत्येव न । इमामुच्चतमां स्थितिं कथयित्वा यदि कोऽप्यस्याः पृथगवस्थातुमिच्छेत्तदा तेनापि साधनकाले विषयाणां विषयासक्तेश्च यथासम्भवमुत्तरोत्तरं त्यागः कर्तव्य एव भवति । शरीरं विषयभोगे संलग्नं भवेन्मनश्च विषयेष्वासक्तं स्यात्तदा पुनः प्रियतमस्य भगवतः सेवा केन शरीरेण मनसा वा भविष्यति ? अतएव विषयत्यागस्य महत्यावश्यकतास्ति । बाह्यभोगत्यागस्य तु वार्तैव का मनसापि विषयाणां चिन्तनं परित्याज्यं भविष्यति । यतोऽयं नियमोऽस्ति यन्मनो यद् वस्तु चिन्तयिष्यति तस्मिन्नेव तस्यासक्तिर्भविष्यति । भगवता श्रीमद्भागवते कथितम्—

**विषयान् ध्यायतश्चित्तं विषयेषु विषज्जते ।**
**मामनुस्मरतश्चित्तं मय्येव प्रविलीयते ॥**

अर्थात् विषयाणां चिन्तनान्मनो विषयेष्वासक्तं भवति तथा मुहुर्मुहुर्मम स्मरणेन तन्मय्येव लीनं भवति ।

मनो यत्र योजयेत्तत्रैव युक्तं भवति, तथा तद् योजनं भवतीन्द्रियद्वारैव । वयं भूयो भूयो यादृशानि दृश्यानि द्रक्ष्यामो यादृशीं वार्तां श्रोष्यामो यथाविधं वस्तु भोक्ष्यामहे, यत्किंचिद् घ्रास्यामो यादृग

वस्तु स्प्रक्ष्यामश्च तेषामेव मनसि वारं वारं चिन्तनं भविष्यति तथा यस्य वस्तुनोऽधिकं चिन्तनं भविष्यति तस्मिन्नेवासक्तिर्भविष्यति । चेन्नाटकानि द्रक्ष्यामो वेश्यानां गीतानि श्रोष्यामस्तर्हि तेष्वासक्तिर्भविष्यति । यदि भक्तानां लीला विलोकिष्यामहे कीर्तनान्याकर्णयिष्यामश्च तदा तेष्वासक्तिरुत्पत्स्यते । अतएव भक्तिमभिलषद्भिः साधकैर्भगवतः प्रतिकूलानां सर्वेषां विषयाणां त्यागः करणीयः । वस्तुतोऽस्मिन् सूत्रे वर्णितेन विषयत्यागेन तेषामेव विषयाणां त्यागो ज्ञातव्यः, येऽस्माकं मनो भगवतो विनिवर्त्य भोगेषु—जगत्प्रपञ्चे योजयन्ति । भगवतो ध्यानं चिन्तनं कीर्तनं भगवत्सेवा साधुसत्कारः सत्सङ्गादयश्च ये भगवदनुकूला विषयाः सन्ति तेषु तु तनुं मनश्चेच्छापूर्वकं योजयेत् तथा येषां विषयाणां संग्रहस्य सेवनस्य च शरीरयात्रायै कुटुम्बपोषणाय वा नितान्तमावश्यकता भवेत् तेषामपि यथासम्भवं स्वल्पतरपरिमाण एव संग्रहं सेवनं च कुर्यात् । तदपि च शास्त्रानुकूलमस्ति, तत्कर्तुमीश्वरस्याज्ञास्तीति मत्वान्यां कामपि फलकामनां मनसि न स्थापयन् केवलमीश्वरप्रीत्यर्थमेव कुर्यात् । एवं कृतं विषयसेवनमपि विषयत्यागेनैव तुल्यं ज्ञायते । केवलं बहिरेव कस्यापि विषयस्य त्यागः क्रियते तथा मनसि तस्य स्मरणं विद्यमानं स्यात्तदा स यथार्थस्त्यागो नास्ति । अतएव सूत्रे विषयत्यागेन सहैवासक्तित्यागस्याप्यावश्यकता प्रतिपादिता । महाभारते कथितम्—

**त्यागः स्नेहस्य यत्त्यागो विषयाणां तथैव च ।**

( शान्तिपर्व १९२ । १७ )

'विषयासक्तेर्विषयस्य चोभयोरेव त्यागस्त्यागो नाम ।' एतेनैव विषयानुरागस्य त्यागो भविष्यति तथा विषयानुरागरहितं हृदयमेव

भगवत्प्रेम्णो दिव्यं धाम भवितुं शक्नोति । भगवत्प्रेम्णः प्राप्तौ सत्यां तु विषयस्य त्यागः स्वाभाविक एव भवति । श्रीरामचरितमानसे कथितम्—

**श्रीरामस्यानुरागी वै महाभागो जनः सदा ।**
**विजहाति विलासं तु रमाया वमनं यथा ॥***

अमृतस्वादमनुभूय तथा तस्य गुणेन लाभमुत्थाप्य विषं प्रति पुनः कस्यापि दृष्टिः कथं यास्यति ? परंतु तदमृतस्य प्राप्त्यर्थमपि तदभिमुखी गतिः स्यादित्येतदर्थमपि विषयविषत्यागस्यावश्यकतास्ति । विषयासक्तेस्त्यागं कृत्वा भगवत्यासक्तिः स्यादित्यत्रैव परमं सुखमस्ति । भगवान् कथयति—

**मय्यर्पितात्मनः सभ्य निरपेक्षस्य सर्वतः ।**
**मयाऽऽत्मना सुखं यत्तत् कुतः स्याद् विषयात्मनाम् ॥**

( श्रीमद्भाग० ११ । १४ । १२ )

'प्रिय उद्धव ! मयि योजितचित्तस्य तथा समस्तविषयाणामपेक्षां परित्यक्तवतो भक्तस्यात्मस्वरूपेण मया यत्परमं सुखं प्राप्तं भवति, तत्सुखं विषयासक्तचित्तानां लोकानां कुतः प्राप्तं भवितुं शक्नोति ?'

## अव्यावृतभजनात् ॥ ३६ ॥

**३६—अखण्डेन भजनेन ( भक्तेः साधनं सम्पन्नं भवति ) ।**

भजनं भक्तेः प्रधानमङ्गमस्ति । इदं साध्यं साधनं चोभयमस्ति । ये भगवत्प्रेम प्राप्तवन्तस्तेषां स्वकर्तृकमखण्डभजनं स्वाभाविकं भवति तथा

---

* रमा बिलासु राम अनुरागी । तजत बमन जिमि जन बड़भागी ॥

यैर्भगवत्प्रेम प्राप्तव्यं तैरखण्डभजनस्याभ्यासो विधातव्यः । यो मनुष्यो भजनं विना मुक्तिं भगवत्प्रेम च प्राप्तुमिच्छति, स भ्रान्तः । गोस्वामी श्रीतुलसीदास महोदयः कथयति—

**वारिमन्थाद् घृतोत्पत्तिः स्यात्तैलं सिकताकणात् ।**
**हरिभक्तिं विना नैव भवाब्धिस्तीर्यते ध्रुवम् ॥***

'जलस्य मन्थनात् कामं घृतं निस्सृतं भवेत् सिकताभ्यः कामं तैलं निस्सरेत्परंतु भगवतो भजनं विना मनुष्यो भवसागरं तर्तुं न शक्नुयात् । अखण्डनीयोऽयं सिद्धान्तः ।' अतएव भजनं त्वनिवार्य्यं साधनमस्ति । पुनर्भक्तेः साधकस्य दृष्टौ त्विदमेवैकं मुख्यं वस्तु । विषयान्मनो निवर्त्य यदि भगवति न संलग्नं क्रियेत तदा तत् परावृत्तं सत् पुनर्धावित्तत्रैव गमिष्यति । विषयत्यागो वैराग्यमस्ति तथा भगवद्-भजनमभ्यासः । एताभ्यामेवाभ्यासवैराग्याभ्यां विशुद्धं भगवत्प्रेमोपलब्धं भवति । परंतु यद् भजनमिदानीं भवति, घटिकायाः पश्चान्न भवति; अद्य कृतं श्वो न करिष्यते तत्प्रेम्णा समादरेण युक्तमखण्ड-भजनं नास्ति । भजनरूपोऽभ्यासस्तु स एव सिद्धो भवति, यः सदा भवेत् सततं भवेत् सत्कारपूर्वकं च भवेत् । योगदर्शने महर्षिः पतञ्जलिः कथयति—

**स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः ।**
( १ । १४ )

'दीर्घकालपर्यन्तं निरन्तरं सत्कारेण सह क्रियमाणोऽभ्यास एव

---

* बारि मथें घृत होइ बरु सिकता ते बरु तेल ।
बिनु हरि भजन न भव तरिअ यह सिद्धांत अपेल ॥

दृढो भवति ।' नित्यनिरन्तरं क्रियमाणेनानेनाखण्डस्मरणेन भगवतः प्राप्तिरनायासेनैव भवति । स्वयं भगवता गीतायां कथितम्—

**अनन्यचेताः सततं यो मां स्मरति नित्यशः।**
**तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः॥**

'हे अर्जुन ! यः पुरुषो मय्यनन्यचित्तो भूत्वा नित्यनिरन्तरं मां स्मरति तस्य निरन्तरं मयि संयुक्तस्य योगिनोऽहं सुलभोऽस्मि ।'

अत एवाखण्डरूपेण भगवतः प्रेमपूर्वकं चिन्तनं कुर्वतैव स्नानं भोजनं व्यापारश्चेत्यादीनि सर्वाणि कर्माणि कर्तव्यानि । भगवत्स्मरणेन संयुक्तं सत्प्रत्येकं कार्यं भजनं भविष्यति । एवं भजनस्य धारा क्षणमपि नैव विच्छिन्ना भवेत् । स्वरूपस्य चिन्तनं न भवितुं शक्नुयात्तदा निरन्तरं भगवतो नामस्मरणमेव कर्तव्यम् । भगवतो नामस्मरणेन मनः प्राणाश्च पूता भविष्यन्ति तथा भगवतः पावनपदकमलयोरनन्यं प्रेमोत्पन्नं भविष्यति । नामजपस्य सहजो विधिरयमस्ति यदात्मनः श्वासप्रश्वासयोरागमनिर्गमौ प्रति ध्यानं रक्षित्वा श्वासप्रश्वासाभ्यां सहैव मनसा तथा तत्सार्धमेव मन्दस्वरेण वाचापि भगवतो नामजपं कुर्वन्नासीत । इदं साधनमुत्तिष्ठतोपविशता चलता भ्राम्यता शयानेन स्थितेन च सता सर्वेषु कालेषु कर्तुं शक्यते । अभ्यासे दृढे जाते चित्तं विक्षेपशून्यं सन्निरन्तरं भगवतश्चिन्तने स्वयमेव संलग्नं भविष्यति । प्रायः सर्वैरेव सुप्रसिद्धैर्भक्तैः सद्भिश्चास्य साधनस्य प्रयोगः कृत आसीत् । महात्मा श्रीचरणदासः कथयति—

**श्वासमध्ये जपेन स्याद् द्वैविध्यं नैव किंचन ।***

---



* स्वासा माहीं जपै तें दुविधा रहै न कोय।

एवमेव श्रीकबीरो वदति—

**श्वासे श्वासे स्मृतिं कुर्या उपायोऽतिशुभोऽस्त्ययम् ।***

तात्पर्यमिदं यद् भगवतः स्वरूपस्य प्रभावस्य रहस्यस्य गुणानां लीलानां नाम्नां वा चिन्तनं निरन्तरं तैलधारावदविच्छेदेन भवितुं युक्तम् । इदमेवाखण्डभजनमस्ति ।

## लोकेऽपि भगवद्गुणश्रवणकीर्तनात् ॥ ३७ ॥

**३७—लोकसमाजेऽपि भगवद्गुणश्रवणेन तत्कीर्तनेन च ( भक्तिसाधनं सम्पन्नं भवति )।**

मनसा तु नित्यं भगवतश्चिन्तनं कर्तव्यमेव, परंतु कर्णाभ्यां वाचा च सदा-सर्वदा लोकानां मध्येऽपि भगवतो गुणानामेव श्रवणं कीर्तनं च कर्तव्ये । मनसा भगवच्चिन्तनस्य चेष्टा तदैव सफला भवति यदास्माकमिन्द्रियाण्यपि भगवत्सम्बन्धिषु कार्येष्वेव संलग्नानि भवेयुः । सर्वेषां कार्याणां प्रायेणाधारो भवति श्रवणं कथनं च । यदि कर्णयोः सदा विषयाणामेव चर्चा समायान्ती भविष्यति तथा वाचा सदा विषयाणामेव वार्ताः करिष्यन्ते तदा मनसा भगवतश्चिन्तनमसम्भववदेव ज्ञातव्यम् । परंतु यदि कर्णौ वाक् च भगवत्येव संलग्ना भवेयुः—कार्यान्तराणां कृतेऽवकाशमेव न लभेरंस्तदान्यानीन्द्रियाणि मनश्च स्वत एव भगवत्परायणानि भविष्यन्ति । अतएव कर्णौ जिह्वा च भगवतो नामगुणलीलादीनां श्रवणे गान एव च निरन्तरं नियोजिता रक्षणीयाः । एतान्येव जीवनं सफलं विधातुं साधनानि

* साँस साँस सुमिरन करौ, यह उपाय अति नीक ॥

सन्ति। केवलं जीवनधारणे श्वसनव्यापारे भोजने तथा मैथुनकरणादावेव यदि जीवनस्य सफलता स्वीक्रियेत तदा किं वृक्षा न जीवन्ति? लोहकारस्य भस्त्रा न श्वसिति? पशवो भोजनं मैथुनं वा न कुर्वन्ति? अतएव श्रीमद्भागवते कथितमस्ति—

श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः।
न यत्कर्णपथोपेतो जातु नाम गदाग्रजः॥
बिले बतोरुक्रमविक्रमान् ये
न शृण्वतः कर्णपुटे नरस्य।
जिह्वासती दार्दुरिकेव सूत
न चोपगायत्युरुगायगाथाः॥
(२।३।१९-२०)

'यस्य कर्णपथे भगवतो नामगुणैः कदाचिदपि प्रवेशो न कृतः स मानवरूपः पशुः श्वविड्वराहोष्ट्रखरेभ्योऽपि निन्दनीयतरोऽस्ति। हे सूत! यौ कर्णौ भगवतो लीलायाः श्रवणं न कुरुतस्तौ सर्पादीनां बिले इव स्तस्तथा या दुष्टा जिह्वा भगवतो लीलाकथां न गायति सा दर्दुरजिह्वेव व्यर्थं प्रलपति।' एतस्यैवानुवादो गोस्वामिना तुलसीदासेनापि कृतः।

जिन्ह हरि कथा सुनी नहिं काना। श्रवन रंध्र अहि भवन समाना॥
जो नहिं करइ राम गुन गाना। जीह सो दादुर जीह समाना॥*

---

* एतत्पद्यस्य पुनरनुवादो यथा—
यैः समाकर्णि कर्णाभ्यां न कदापि हरेः कथा।
कर्णरन्ध्रं तु तत्तेषां सर्पावासबिलोपमम्॥
या करोति न रामस्य गुणानां गानमादरात्।
जिह्वा सा दर्दुराणां वै जिह्वया सदृशी मता॥

श्रीमद्भागवतस्य परिशिष्टे कथितम्—

**मृषा गिरस्ता ह्यसतीरसत्कथा**
**न कथ्यते यद् भगवानधोक्षजः ।**
**तदेव सत्यं तदुहैव मङ्गलं**
**तदेव पुण्यं भगवद्गुणोदयम् ॥**
**तदेव रम्यं रुचिरं नवं नवं**
**तदेव शश्वन्मनसो महोत्सवम् ।**
**तदेव शोकार्णवशोषणं नृणां**
**यदुत्तमश्लोकयशोऽनुगीयते ॥**

'यया गिरा भगवतोऽधोक्षजस्य कथां न कथयित्वा विषयाणां कुत्सिताः कथाः कथ्यन्ते सा असती वृथा च। येषु वचनेषु भगवतो गुणाः प्रकटीक्रियन्ते पुण्यकीर्तेर्भगवतो यशो वर्ण्यते, वस्तुतस्तान्येव वचनानि सत्यानि, तान्येव मङ्गलरूपाणि, तान्येव पुण्यानि, तान्येव मनोहराणि, तान्येव रुचिराणि, तान्येव नित्यं नवनवरसमयानि, तान्येव सदा मनसो महोत्सवकराणि तथा तान्येव मनुष्याणां शोकसागरशोषणानि सन्ति ।'

अतएव कर्णाभ्यां भगवतो गुणानां नाम्नां च श्रवणं वाचा च तेषां कीर्तनं कर्तव्यम्। एतस्मादेव साधनाद् भगवतो निर्मलप्रेम्ण उदयो भवति ।

श्रीमद्भागवते कथितम्—

**ता ये शृण्वन्ति गायन्ति ह्यनुमोदन्ति चादृताः ।**
**मत्पराः श्रद्दधानाश्च भक्तिं विन्दन्ति ते मयि ॥**
(११ । २६ । ३१)

य एतद् देवदेवस्य विष्णोः कर्माणि जन्म च।
कीर्तयेच्छ्रद्धया मर्त्यः सर्वपापैः प्रमुच्यते॥
इत्थं हरेर्भगवतो रुचिरावतार-
वीर्याणि बालचरितानि च शंतमानि।
अन्यत्र चेह च श्रुतानि गृणन्मनुष्यो
भक्तिं परां परमहंसगतौ लभेत॥
( ११ । ३१ । २७, २८ )

भक्तिं लब्धवतः साधोः किमन्यदवशिष्यते।
मय्यनन्तगुणे ब्रह्मण्यानन्दानुभवात्मनि॥
( ११ । २६ । ३० )

भगवान् कथयति—'ये जना मत्पराः—मयि समर्पितचित्ता भूत्वा श्रद्धया समादरेण च सह मम नामगुणलीलानां कथां शृण्वन्ति गायन्त्यनुमोदन्ते च तेषां मय्यनन्यभक्तिर्भवति।'

श्रीशुकदेवः कथयति—'हे राजन्! यो मनुष्यो देवदेवस्य भगवतो दिव्यजन्मकर्मणां श्रद्धापूर्वकं कीर्तनं करोति, स समस्त-पापेभ्यो मुच्यते। भगवतः श्रीहरेरतिमनोहरस्य श्रेयस्करस्यावतारस्य पराक्रमस्य बाललीलानां च श्रवणेन गानेनापि च मनुष्यः परमहंस-गतौ भगवति परां भक्तिं प्राप्नोति।'

भगवान् वदति—'एवं मय्यनन्तगुणसम्पन्ने सच्चिदानन्दघने ब्रह्मणि भक्तौ सिद्धायां सत्यां तस्य साधुपुरुषस्य पुनरन्यत् किं वस्तु प्राप्तव्यमवशिष्यते? अर्थात् स कृतकृत्यो भवति।'

भगवतो नामश्रवणस्य कीर्तनस्य च महत् फलं भवति। यावद् दूरं भगवतो नामध्वनिः प्रसरति तावतः प्रदेशस्य वातावरणं

( वायुमण्डलं ) पवित्रं भवति । मृत्युकालेऽन्तिमे श्वासे केनापि भावेन यस्य मुखाद् भगवतो नाम निस्सृतं भवति तस्य परमपदप्राप्तिर्भवति । भगवतो नाम्नो यत्र कीर्तनं भवति तत्र यमदूता न गन्तुं शक्नुवन्ति । अतएव दशभ्यो नामापराधेभ्यः* स्वात्मानं पृथग् रक्षन् भगवतो नाम्नां जपकीर्तने श्रवणं चावश्यमेव कर्तव्यानि ।

श्रीमद्भागवते निगदितम्—

**सांकेत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ।**
**वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥**
**अज्ञानादथवा ज्ञानादुत्तमश्लोकनाम यत् ।**
**संकीर्तितमघं पुंसो दहेदेधो यथानलः ॥**

( ६ । २ । १४, १८ )

'पुत्रादीनां नामसंकेतेन, परिहासप्रसङ्गेन स्तोभेनावहेलनया वापि भगवतो नामग्रहणेन समस्तानि पापानि नष्टानि भवन्ति । अज्ञानेन ज्ञानपूर्वकं वा गृहीतं भगवतः पुण्यश्लोकस्य नाम मनुष्याणां

---

* नामसम्बन्धिनो दशापराधा इमे सन्ति—१—सतां निन्दा, २—भगवन्नामस्विदं महदिदं लघ्विति भेदभावः, ३—गुरोरपमानम्, ४—शास्त्रनिन्दा, ५—नाम्न्यर्थवादभ्रमः ( अर्थादिदं नाममहिमप्रतिपादकं वचनं प्ररोचनाय प्रशंसामात्रमस्ति, एतादृशं फलं न भवतीति भ्रान्ता धारणा ), ६—नामावलम्ब्य पापाचरणम्, ७—धर्मव्रतदानयज्ञादिभिः सह नाम्नां तुलनाकरणम्, ८—अश्रद्धालुभ्यो हरिविमुखेभ्यः श्रोतुमनिच्छद्भ्यो नामोपदेशदानम्, ९—नाममाहात्म्यं श्रुत्वापि तत्रानुरागाभावः, १०—अहंकारो ममता [illegible]विषयेष्वासक्तिश्च ।

पापानि तथैव दहति यथानलः स्वस्मिन् केनापि प्रकारेण प्रक्षिप्त-मिन्धनं भस्मसात् करोति ।'

सर्वेषु सद्ग्रन्थेषु सतां वाणीषु च भगवन्नाममहिमा गीतः । श्रीमद्भागवतस्य निम्नाङ्किताः श्लोका मननीयाः सन्ति । देवी देवहूतिर्भगवन्तं कपिलदेवं कथयति—

**अहो बत श्वपचोऽतो गरीयान्**
**यज्जिह्वाग्रे वर्तते नाम तुभ्यम् ।**
**तेपुस्तपस्ते जुहुवुः सस्नुरार्या**
**ब्रह्मानूचुर्नाम गृणन्ति ये ते ॥**

(३ । ३३ । ७)

'अहो यस्य जिह्वायां तव पवित्रं नाम तिष्ठति स चाण्डालोऽपि श्रेयान् । यतो ये तव नाम्नां कीर्तनं कुर्वन्ति तैः श्रेष्ठपुरुषैस्तपो यज्ञास्तीर्थस्नानं वेदाध्ययनं च सर्वाणि कार्याणि सम्पादितानि ।'

**पतितः स्खलितश्चार्तः क्षुत्त्वा वा विवशो ब्रुवन् ।**
**हरये नम इत्युच्चैर्मुच्यते सर्वपातकात् ॥**
**संकीर्त्यमानो भगवाननन्तः**
**श्रुतानुभावो व्यसनं हि पुंसाम् ।**
**प्रविश्य चित्तं विधुनोत्यशेषं**
**यथा तमोऽर्कोऽभ्रमिवातिवातः ॥**

( १२ । १२ । ४६-४७ )

'कश्चिदपि मनुष्यः पतन् स्खलन् क्षुवन् दुःखेन पीडितो भवन् परवशो भूत्वापि यदि 'हरये नमः' इत्युच्चैः स्वरेणोच्चरति तदा स सर्वेभ्यः पापेभ्यो मुच्यते । यथा सूर्यः सर्वविध[illegible]

नष्टं करोति किं च यथा प्रचण्डो वायुर्मेघांश्छित्त्वा भित्त्वा विलोपयति तथैव भगवतोऽनन्तस्य नामकीर्तनं तदीयप्रभावस्य श्रवणं वा हृदये प्रविश्य समस्तदुःखानामन्तं करोति ।'

इदं तु विवशतया नामग्रहणस्य फलमस्ति, किं पुनः प्रेम्णा नामोच्चारणस्य ? अतएव श्रीगोस्वामिना तुलसीदासेन कथ्यते––

**वैवश्येनापि यन्नाम कथयन्ति नराः क्वचित् ।**
**अनेकजन्मनिर्वृत्तं दुष्कृतं स्वं दहन्ति ते ॥**
**ये नराः सादरं नामस्मरणं कुर्वते सदा ।**
**तरन्ति गोष्पदीकृत्य तेऽपारं भवसागरम् ॥** *

अतएव भक्तेः प्राप्तये नित्यनिरन्तरं भगवतो नामगुणयशसां कीर्तनं श्रवणं चिन्तनं वा निस्संदेहं परमं साधनमस्ति ।

## मुख्यतस्तु महत्कृपयैव भगवत्कृपालेशाद् वा ॥३८॥

**३८—परंतु ( प्रेमभक्तेः प्राप्तेः साधनं ) मुख्यतया ( प्रेमिणां ) महापुरुषाणां कृपया भगवत्कृपाया लेशमात्राद् वा भवति ।**

विषयान् विषयासक्तिं च त्यक्त्वाखण्डभजनात्मकस्य श्रवणकीर्तनात्मकस्य च साधनस्य प्रतिपादनानन्तरमिदानीमेकमेतादृशं साधनं कथ्यते यस्यैकस्य प्रतापेनैव पूर्वोक्तानि त्रीणि साधनानि स्वत एव सिद्ध्यन्ति । तत् साधनमस्ति महापुरुषाणां कृपा । महापुरुषास्तु कृपालव एव भवन्ति; परंतु श्रद्धाविश्वासपूर्वकं तेषां सङ्गस्तु महान्

---

* बिबसहुँ जासु नाम नर कहहीं । जनम अनेक रचित अघ दहहीं ॥
सादर सुमिरन जे नर करहीं । भव बारिधि गोपद इव तरहीं ॥

दुष्करोऽस्ति । महापुरुषाणां सङ्गे प्राप्ते सति विषयास्तु स्वत एव विनिवर्तन्ते । तेषां सङ्गेन श्रवणकीर्तने अपि कर्तव्ये एव भवतस्तथा नक्तंदिवं यत्किंचिच्छ्रवणे वाचि दर्शने च समायातं भवति तस्य स्मरणमनिवार्यमस्त्येव । परंत्विदं स्मरणीयं यद् येषां महापुरुषाणां कृपामात्रेणैव फलरूपायाः प्रेमभक्तेः प्राप्तिः प्रतिपादिता, ते महापुरुषाः केवलं शास्त्रज्ञानिनः सदाचारिणश्चैव न भवन्ति, भगवतः स्वरूप-तत्त्वं यथार्थतो ज्ञात्वा तस्मिन्ननन्यं प्रेम कुर्वाणा भक्ता भवन्ति । एतादृशानां प्रेमिभक्तानां सङ्गस्य महान् महिमास्ति । अतएव यज्ञ-धूमाद् धूम्रवपुषः कर्मकाण्डिनो विज्ञानविदो महर्षयो भगवच्चरण-कमलरसामृतपानशीलं प्रेममूर्तिं तत्रभवन्तं सूतं कथयन्ति—

**तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् ।**
**भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥**

(श्रीमद्भाग० १ । १८ । १३)

'हे सौम्य ! भगवत्सङ्गिनां प्रेमिणां निमेषमात्रमपि क्रियमाणस्य सङ्गस्य तुलना, स्वर्गादीनां तु वार्तैव का, पुनर्भवनाशिन्या मुक्त्यापि न कर्तुं शक्यते ।' एतामेवोक्तिमवलम्ब्य श्रीरामचरितमानसेऽपि कथितम्—

तात स्वर्ग अपबर्ग सुख धरिअ तुला एक अंग ।
तूल न ताहि सकल मिलि जो सुख लव सतसंग ॥

**तुलायामेकतो धेहि सुखं स्वर्गापवर्गयोः ।**
**तुल्यं ताताखिलं तन्न सत्सङ्गस्य लवेऽपि यत् ॥**

अयं तस्य सत्सङ्गस्य महिमा नास्ति योऽन्तःकरणं शोधयित्वा मोक्षप्राप्तिं कारयति । यतोऽत्र तु मोक्षेण सह लवमात्रं क्रियमाणस्येदृशस्य सत्सङ्गस्य तुलनाकरणमप्यसंगतं कथितम् । अतएवात्र तेषां नाम-

भगवत्तत्त्वानां भगवत्प्रेमरङ्गेण रक्तानां मोक्षसंन्यासिनां भगवत्सङ्गिनां ( सर्वैश्वर्यपूर्णस्य मधुरतमलीलाविहारिणो भगवतो नित्यलीलासङ्गिनां ) प्रेमिणां सतां तस्याः कृपाया उल्लेखोऽस्ति या न केवलां मुक्तिमेव भगवतः प्रेमलक्षणां भक्तिमप्यनायासेनैव प्रापयति; यतो मुक्तिं त्वेतादृशाः प्रेमिणो वाञ्छन्त्येव न । प्रत्युत मुक्तिवाञ्छामेव ते प्रेमलक्षणाया भगवद्भक्तेरुत्पत्तौ बाधाप्रदायिनीं पिशाचीं मत्वा तस्यास्तिरस्कारं कुर्वन्तस्तिष्ठन्ति । एतादृशानां प्रेमिभक्तानां कृपा येषु भवति, ये पुरुषा ईदृशानां भक्तानां सङ्गं प्राप्नुवन्ति, योगज्ञानादिभिरप्यप्राप्यो भगवान् ( अनायासेनैव ) तेषां वशीभूतो भवति । अतएव स्वयं भगवानात्मनः प्रेमिभक्तमुद्धवं कथयति—

**न रोधयति मां योगो न सांख्यं धर्म एव च ।**
**न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं न दक्षिणा ॥**
**व्रतानि यज्ञश्छन्दांसि तीर्थानि नियमा यमाः ।**
**यथावरुन्धे सत्सङ्गः सर्वसङ्गापहो हि माम् ॥**
( श्रीमद्भा० ११ । १२ । १-२ )

'हे उद्धव ! अन्येषां समस्तसङ्गानां निवारकेण सत्सङ्गेनाहं यथावशीभूतो भवामि तथा योगेन, ज्ञानेन, धर्मेण, वेदाध्ययनेन, तपसा, त्यागेनेष्टापूर्तेन, दक्षिणया, व्रतैर्यज्ञेनच्छन्दोभिस्तीर्थैर्यमैर्नियमैर्वा केनापि साधनेन न भवामि ।'

अस्य कारणमिदमस्ति यदन्यान्यानि सकलानि साधनानि सकामभावेन सम्पादितानि भोगानां स्वर्गादेश्च तथा निष्कामभावेन सम्पादितान्यन्तःकरणशुद्धेर्मुक्तेश्च प्रापकाणि भवन्ति । लीलाविहारिणं समस्तं

वशीकर्तुं साक्षादव्यवहितं वा साधनं तु केवलमेकं सर्वतन्त्रस्वतन्त्रमनन्यं विशुद्धं च प्रेमैवास्ति, यदेतेषु साधनेषु कतमस्मादपि न लभ्यते तत्तु केवलानां भगवत्सङ्गिनां प्रेमिणां महापुरुषाणां महत्या कृपयैव लभ्यते।

भक्तिः स्वतन्त्रा सर्वेषां सुखानां खनिरुत्तमा।
सत्सङ्गेन विना नैव प्राणिनः प्राप्नुवन्ति ताम्॥ *

नूनं यदि श्रीभगवानिच्छेत्तदा स्वयमेवात्मनः प्रेम दातुं शक्नोति; तस्य कृपाया लेशमात्रेणैव प्रेम प्राप्तुं शक्यते। गोस्वामिना श्रीतुलसीदासेन कथितम्——

यस्य कृपालवलेशात् तुलसीदासोऽपि मन्दमतिरेषः।
गतः परमविश्रामं रामसमानः प्रभुर्न कुत्रापि॥ †

परंतु नित्यं कृपावर्षिणो भगवतः कृपाबिन्दुरपि भागवतानां महात्मनां कृपयैव जीवैः प्राप्तुं शक्यते। अत एवेदृशानां प्रेमिणां सतां सङ्ग एव प्रधानं साधनमस्ति, परंत्वीदृशानां सङ्गस्य प्राप्तिरात्मनो वशे नास्ति। अस्मादेव कारणाद् देवर्षिर्नारद आगामिनि सूत्रे महत्सङ्गं दुर्लभं प्रतिपादयति——

## महत्सङ्गस्तु दुर्लभोऽगम्योऽमोघश्च ॥ ३९ ॥

**३९——परंतु महापुरुषाणां सङ्गो दुर्लभोऽगम्योऽमोघश्चास्ति।**

---

* भगति सुतन्त्र सकल सुख खानी। बिनु सतसंग न पावहिं प्रानी॥

† जाकी कृपा लवलेस ते मति मंद तुलसीदासहू।
पायो परम बिश्रामु राम समान प्रभु नाहीं कहूँ॥

संसारे स्वधर्मपरायणानां सदाचारिणां साधुस्वभावानां दैवसम्पत्तिमतां पुरुषाणां प्राप्तिरतिदुष्करास्ति । साधुवेषधारिणां समूहेषूपदेशकेषु च विपणिंगतरत्नेषु सत्या हीरका इव सत्याः साधवः स्वल्पा एव भवन्ति, परंत्वन्वेषणे कृते संसारे सदाचाराः कर्मकाण्डरतास्तथा कतिपये ज्ञानिनः पुरुषास्तु प्राप्तुमपि शक्यन्ते; किंत्वीदृशाः सत्याः प्रेमिणो महात्मानः स्वल्पतरा एव लभ्यन्ते येषां कृपामात्रेण परमदुर्लभस्य योगिज्ञानिजनवाञ्छितस्य भगवत्प्रेम्णः प्राप्तिरवश्यं भवेत्। अतएवेदृशानां महात्मनां प्राप्तिः परमदुष्करा मता। यदि कुत्रचिद्वीदृशा महापुरुषा मिलिता अपि भवन्ति तदा तेषां परिज्ञानमतिकठिनं भवति । यतो बाह्याचारं तु दम्भिनो नाटकस्याभिनेतारश्चापि कस्मिन्नप्यंशे तथैव दर्शयितुं शक्नुवन्ति । नेत्राभ्यामश्रूणां प्रवहनं रोदनं हसनं तथा क्रन्दनमेव प्रेमिणो लक्षणानि न सन्ति । अनेकेभ्यो बाह्यकारणेभ्योऽप्येवं भवितुं शक्नोति। केचित् केचित्पुनः सत्याः प्रेमिण एवंविधा अपि भवितुं शक्नुवन्ति य एतल्लक्षणायाः स्थितेरप्यग्रगता भवेयुस्तथा येषां बाह्या आचाराः साधारणजनानां बुद्धेरविषयाः स्युः। प्रेमिणो जनास्तु कंचिदपि मनुष्यमिदं कथितुं यान्त्येव नहि यदस्मान् प्रेमिणो मन्यस्व। तथा कथनेन मन्यतेऽपि कः ? अतएवेदृशानां निःस्पृहाणां भगवज्जनानां परिज्ञानमत्यन्तमेव कठिनमस्ति। एतेनैव कारणेन तेषां सङ्गस्य दुर्लभत्वं प्रतिपादितम्। किंतु सौभाग्यवशाद् यदि कुत्रचिदीदृशा महात्मानः पुरुषा मिलिता भवन्ति तदा तेषामज्ञातमिलनमपि कदापि व्यर्थं न भवितुं शक्नोति, यतस्तदमोघमस्ति ।

यदा साधारणानां सदाचारिणां विदुषां साधूनां समागम एवान्तः-

करणस्य शुद्धेः कारणं भूत्वा पापतापदैन्यानां निवारणे समर्थो भवति, तदा येषां हृदयं भगवत्प्रेम्णा समुच्छलति, ये प्रेमानन्दमूर्तयः सन्ति, येषां स्मरणमात्रेणैव पापानां नाशो भवति तेषां भागवतानां प्रेमिणां महात्मनां दर्शनस्य महाफलमवश्यमेव प्राप्तं भवति ।

यथामावास्याया गाढतमिस्रायां रजन्यां सुप्तो मनुष्यो यदि सूर्योदये सत्यपि सुप्त एव तिष्ठेत् तदा तस्य, यावन्न जागर्ति तावत्, प्रकाशस्यानुभवो न भवति; परंतु प्रकाशस्तु सूर्योदयेन सहैव भवत्येव किंच यथा कश्चिद् धनवान् पुरुषः स्वस्य कश्चित् प्रेमिणो दरिद्र-मानवस्य नाम्नि निजां कोटिमूल्यमितां सम्पत्तिं परिवर्तितां कारयति तदा स दरिद्रस्तस्मादेव कालाद् धनी तु भवत्येव, किंतु यावत्तस्यैतद्-वृत्तान्तस्य परिज्ञानं न भवति, तावत्स आत्मानं दरिद्रमेव जानाति। एवमेव कस्यापि भगवत्प्रेमिणो महापुरुषस्याज्ञातसङ्गेनापि पापस्याज्ञानलक्षणस्या-न्धकारस्य च नाशसमकालं ज्ञानात्मनः सूर्यस्य प्रकाशो लभ्यते तथा प्रेमलक्षणः परमनिधिस्तु प्राप्यते, किंतु यावदस्य परिणामस्य परिज्ञानं न भवति तावदस्य लाभस्य परिचयाभावान्मनुष्य आनन्दं न प्राप्नोति । अवश्यमेवास्याः स्थितेः परिचयप्राप्तावधिको विलम्बो न भवति । अतएव महत्सङ्गोऽमोघः ( अवश्यफलदायी ) कथितः ।

## लभ्यतेऽपि तत्कृपयैव ॥ ४० ॥

४०—तस्य ( भगवतः ) कृपयैव ( महापुरुषाणां ) सङ्गोऽपि लभ्यते ।

नूनमेतादृशस्य साधुपुरुषस्य प्राप्तिर्हरिकृपयैव भवति । भगवान् यं कृपयाऽऽत्मीयं कर्तुमिच्छति तस्यैव पार्श्वे प्रेमपाशेनात्मनोऽपि बन्धने समर्थं स्वस्यैव स्वरूपभूतं प्रेमिभक्तं प्रेषयति । वस्तुतो भगवत्कृपा तथा महतां पुरुषाणां सङ्गोऽन्योन्याश्रितौ स्तः । महापुरुषाणां सङ्गं विना भगवत्कृपाया अनुभवो न भवति तथा भगवत्कृपां विनैतादृशा महापुरुषा न लभ्यन्ते । श्रीविभीषणस्यापि श्रीहनुमतः सङ्गलाभ एव भगवत्कृपाया अनुभवो बभूव । अतएव तेन कथितम्—

**इदानीं मम विश्वासो हनूमन् समभूत् किल ।**
**न कदाप्युपलभ्यन्ते सन्तो हरिकृपां विना ॥***

## तस्मिंस्तज्जने भेदाभावात् ॥ ४१ ॥

### ४१—यतो भगवति तस्य भक्ते च भेदाभावः ।

भगवतो भक्ता भगवत्स्वरूपा एव सन्ति ( ब्रह्मविद् ब्रह्मैव भवति ) । ये भक्तानां सेवनं कुर्वन्ति ते भगवत एव सेवनं कुर्वन्ति । भक्ता भगवतो हृदये वसन्ति भगवांश्च भक्तानां हृदये। भगवता कथितम्—

**साधवो हृदयं मह्यं साधूनां हृदयं त्वहम् ।**
**मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपि ॥**
( श्रीमद्भाग० ९ । ४ । ६८ )

'साधवो मम हृदयं सन्ति तथाहं तेषां हृदयमस्मि । ते मदृतेऽन्यं

---



* अब मोहि भा भरोस हनुमंता । बिनु हरि कृपा मिलहिं नहिं संता ॥

कमपि न जानन्ति तथाहं तान् विहायान्यं कमपि न जानामि ।' भरतो रामं भजति, रामश्च भरतम्——

**भरतेन समः को नु रामस्नेही जनो भुवि ।**
**यं जपत्यनिशं रामो रामं जपति वै जगत् ॥***

श्रीभगवता प्रेमस्वरूपाणां गोपीनां प्रसङ्गे कथितम्——

**मन्माहात्म्यं मत्सपर्यां मच्छ्रद्धां मन्मनोगतम् ।**
**जानन्ति गोपिकाः पार्थ नान्ये जानन्ति तत्त्वतः ॥**

'हे अर्जुन ! मम माहात्म्यं, मम पूजां, मयि श्रद्धां तथा मम मनोगतां वार्तां तत्त्वतः केवला गोपिका एव जानन्ति, नान्यः कोऽपि जानाति ।'

एतादृशेषु प्रेमिभक्तेषु भगवति च किमन्तरमस्ति ? भगवता कथितमेव——

**ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ।**
(गीता ९ । २९)

'ये प्रेम्णा मां भजन्ति, ते मयि सन्ति, तथाहं तेष्वस्मि । ईदृशा भक्ता भगवत्प्रेम्णि एवं तल्लीनास्तिष्ठन्ति, यत्ते स्वं बाह्यस्वरूपं विस्मृत्य साक्षाद् भगवत्स्वरूपमनुभवन्ति । गोप्यो भगवन्तमनुसंदधाना इत्थं तल्लीना अभवन् यत्तास्तस्यैव लीलां कर्तुमारभन्त ।

---

* भरत सरिस को राम सनेही । जगु जप राम रामु जप जेही ॥

श्रीमोहनलीलाया एतासामेव शोभतेऽभिनयः ।
तन्मयतामुपयाताः किंचिज्जानन्ति नो वयं काः स्म॥ *

तदेव साध्यतां तदेव साध्यताम् ॥ ४२ ॥

४२—( अत एव ) तस्य ( महत्सङ्गस्य ) एव साधनां कुरु, तस्यैव साधनां कुरु ।

अत एव भगवत्प्रेमप्राप्त्यर्थमेतादृशानां भगवत्प्रेमिमहापुरुषाणां सङ्गस्यैव प्रबलामिच्छां कुरु । भगवत्कृपया प्रेमिणः सन्तो मिलिष्यन्ति तथा सतां मिलनस्य प्रतापेनैव वयं पापतापविमुक्ता भूत्वा निर्मलं भगवत्प्रेम प्राप्तुं शक्ष्यामः । अत्र महदेकं रहस्यमस्ति । कल्प्यतामेको महान् प्रतापी राजास्ति; तथा सहैव स महान् प्रेमी अप्यस्ति; परंतु प्रेम प्रत्येकेन सह न भवति । राजा राजसभायामात्मनो राज्ये च स्वकीयं प्रभावं तथैश्वर्यं तु भृशं दर्शयितुं शक्नोति, परंतु स्वमुखेन स्वप्रेम-रहस्यं कस्यापि समक्षे न वक्तुं शक्नोति । वयं प्रजारूपेण यथाविधि तेन सह मिलित्वा विधिवद् वार्तां कर्तुं शक्नुमः; परंतु न तु प्रेम्णो रहस्यं प्रष्टुं शक्नुमो नापि च सोऽस्मान् तत्कथयितुमेव शक्नोति । तस्य प्रेम्णो गुह्यं रहस्यं ज्ञातव्यमथवा तस्य प्रेमराज्ये प्रवेशः कर्तव्यश्चेत्तदा तस्य कस्यचिदप्यनन्यप्रेमिणः—येन सह राज्ञो व्यक्तिगतप्रेम्णो निर्मलः ( राज्यविव्यतीतः ) सम्बन्धोऽस्ति तथा येन साकं स परस्पर-

---

† मोहनलाल रसाल की लीला इनही सोहैं ।
केवल तन्मय भईं कछु न जानैं हम को हैं ॥
( नन्ददास )

मुन्मुक्तां प्रेमचर्चां करोति—सङ्गः करणीयो भविष्यति तथा तस्य हृदये स्वकीयं विश्वासमुत्पाद्य तद्द्वारा राज्ञः प्रेमरहस्यं ज्ञातव्यं भविष्यति। तद्द्वारैव च राज्ञो निकटे निजप्रेमसंदेशः प्रापणीयो भविष्यति स्वस्य पात्रता च साधनीया। यदा राजास्माकं पात्रतां ज्ञास्यति तदास्मानपि तद्वदेव स्वप्रेमगोष्ठ्यां सम्मेलयिष्यति। एवमेव भगवानप्यात्मनः प्रेमरहस्यं स्वमुखेन न वर्णयति। भगवानुद्धवाय प्रेमशिक्षां दापयितुं तं गोपीनां पार्श्वे प्रेषितवानासीत्। प्रियतमप्रेमरहस्यं तदीयप्रेम्णश्च गुह्यतमा वार्ता यथा तस्य प्रियतमामुखेनैव तस्या विश्वस्तसखीभिर्लभ्यन्ते, तथैव भगवतः प्रेमरहस्यमपि भगवत्प्रेमिभक्तद्वारैव साधकेनोपलभ्यते। तथोपलभ्यतेऽपि तेनैव, यं भगवान् पात्रं मत्वा कृपां कृत्वा तस्मै स्वप्रेमरहस्यं दातुमिच्छति। यतः प्रेमिणो भक्ताः प्रेमास्पदस्य प्रियतमस्य भगवत इच्छामाज्ञां वा विना तदीयं प्रेमरहस्यं कस्यापि समक्षे नैवोद्घाटयितुं शक्नुवन्ति। प्रथमं तु साधकस्य पात्रीभवनमावश्यकं भवति। यदा भगवतो निर्मलस्योच्चतमस्य प्रेम्णोऽनन्याकाङ्क्षा तस्य मनस्युत्पन्ना भवति तदा तस्य हृदयं भगवत्प्रेमार्थं रोदिति। तस्य हृदयस्यार्तनादमन्तर्याम्यानन्दमयः प्रभुः शृणोति तदानीं च कृपां कृत्वा स स्वं कमपि प्रेमिभक्तमादिश्य तद्धृदये संकेतं कृत्वा वा तेन सह समागमाय प्रेषयति। तत्र प्राक्तस्य प्रेम्णः परीक्षा भवति। यदि तस्य प्रेम कामनाशून्यमनन्यं च भवति तथा स स्वकीयाचरणव्यवहाराभ्यां तस्य प्रेमिणो भक्तस्य हृदये स्वकीयपात्रताया विश्वासमुत्पादयति, तदा स तस्य संदेशं भगवतः पार्श्वे प्रापयति तथा भगवत आज्ञां प्राप्य क्रमेण प्रेमरहस्यं तस्य समक्षे समुद्घाटयति। किं च शनैः शनैर्यथा यथा तदीया पात्रता वर्धते तथा

तथा भगवत आदेशेन स तं भगवतः प्रेमराज्ये उत्तरोत्तरमग्रे प्रेरयन् नयति । तथान्ततस्तदुपरि भगवतः पूर्णकृपाभावेन स भगवत्प्रेम प्राप्नोति। राजाथवा तस्य प्रेमी त्वन्तर्यामिताया अभावेन कस्यचिच्छलनायामप्यायातुं शक्नोति, परंतु भगवांस्तदिच्छया नियुक्ताः प्रेमिभक्ताश्च कदापि वञ्चनां नाप्नुवन्ति । अतएव यस्य भगवत्प्रेमप्राप्त्यर्थमिच्छा भवेत् तेन देवर्षिणा प्रतिपादितेषु साधनेषु तत्परतापूर्वकं प्राक् पात्रीभूतेन भवितव्यम्, येन तदुपरि भगवतः कृपा भवेत्, स भगवत्प्रेमिपुरुषाणां सङ्गस्य पात्रं च जायेत । सहैवेदृशानां भगवत्प्रेमिपुरुषाणां सङ्गस्येच्छा प्रकर्षेण वर्धनीया । यत एतेषां सङ्गं विना भगवत्प्रेमप्राप्तिरत्यन्तकठिनास्ति । अस्मादेव हेतोर्भगवानात्मनो निर्मलप्रेम्णः प्रचारार्थमीदृशेभ्यो भक्तेभ्यो मुक्तेः पूर्णाधिकारिभ्योऽपि, तेषां मनसि प्रेमवासनां जाग्रतीं रक्षित्वा, तेभ्यः सायुज्यमुक्तिं न ददाति; किंचात एव प्रेमिभक्तगणा इदं प्रेमलीलासुखं विहाय मुक्तिमपि कदापि न वाञ्छन्ति । ते मुक्ता अपि केवलं प्रेमवितरणायैवाधिसंसारमायान्ति निवसन्ति वा । तेऽकारणकृपालवो भवन्ति । चेदस्माकं तीव्रामिच्छामधिगमिष्यन्ति तदा भगवत्कृपया भगवतः संकेतं प्राप्य स्वस्य पुण्यमयदर्शनस्पर्शनभाषणैर्निजया महत्या कृपया चास्मभ्यमवश्यं प्रेमदानं करिष्यन्ति; यतस्ते तु प्रेमिजनाननुसंदधाना एव तिष्ठन्ति । तेषां कार्यमेवं प्रेमदानकरणमस्ति । अतएव तेषामेव भगवत्सङ्गिनां प्रेमिमहानुभावानां सङ्गं प्राप्नुत । तेषामेव कृपामिच्छत !

## प्रेमरूपायां भक्तौ मुख्या बाधा कुसंगतिरस्ति

### दुस्सङ्गः सर्वथैव त्याज्यः ॥ ४३ ॥

### ४३—दुस्सङ्गस्य सर्वथैव त्यागः कर्तव्यः ।

सत्सङ्गस्य महत्त्वं प्रतिपाद्याधुना देवर्षिर्नारदो दुस्सङ्गस्य निषेधं करोति। यथा सत्सङ्गेन भगवत्कथायां, भगवन्नाम्नि, भगवत्प्रीतौ, सदाचारे शास्त्रे, विवेके, वैराग्ये, सदभ्यासे, सेवायां, सरलतायां, नम्रतायां, क्षमायां, तितिक्षायां, शौचे, दयायामहिंसायां, सत्ये ब्रह्मचर्ये, निरभिमानतायां, शान्तिप्रभृतौ च प्रवृत्तिर्भवति किंच मनुष्यः सदाचारपरायणः परमभक्तश्च भवितुं शक्नोति, तथैव तद्, विपरीतेन दुस्सङ्गेन विषयवार्तायां, जगच्चर्चायां,

लोकनिन्दायां, भोगप्रीतौ, दुराचार उच्छृङ्खलतायामविवेके, विषयलोलुपतायां, दुष्टाभ्यासे, माने, दम्भे, दर्पे, क्रोधेऽसहिष्णुतायामपवित्रतायां निर्दयतायां, हिंसायामसत्य इन्द्रियलम्पटतायामभिमानेऽशान्त्यादौ च प्रवृत्तो भूत्वा मनुष्यः पापपरायणोऽत्यन्तं विषयासक्तश्च भवति। दुस्सङ्गेनासुरसम्पदः सर्वेषां दुर्गुणानां दुराचाराणां च विकासो विस्तारश्च भवतः। दुस्सङ्गेन मनुष्यस्य सर्वेषां सद्गुणानां विनाशमनन्तरं तस्य सर्वनाशो भवति। परमसुशीला स्नेहमयी प्रेमप्रतिमा देवी कैकेयी मन्थरायाः कुसङ्गेनैव महाराजदशरथस्य भरतस्यात्मनः सर्वेषामयोध्यावासिनां च परमशोकहेतुः संजाता; तथानेनैव कुसङ्गेन तस्या देव्या उपरि दुःखप्रदवैधव्यस्य सहनं प्राणप्रियपुत्रस्य भरतस्याप्रीतिभाजनीभूयावस्थानं चापद्यत। शकुनेः कुसङ्गतिरेव महाभारतयुद्धमये भीषणे संहार एकतमं मुख्यं कारणमभूत्। श्रीमद्भागवते भगवान् कपिलदेवो मातरं देवहूतिं कथयति—

**यद्यसद्भिः पथि पुनः शिश्नोदरकृतोद्यमैः।**
**आस्थितो रमते जन्तुस्तमो विशति पूर्ववत्॥**
**सत्यं शौचं दया मौनं बुद्धिः श्रीर्ह्रीर्यशः क्षमा।**
**शमो दमो भगश्चेति यत्सङ्गाद् याति संक्षयम्॥**
**तेष्वशान्तेषु मूढेषु खण्डितात्मस्वसाधुषु।**
**सङ्गं न कुर्याच्छोच्येषु योषित्क्रीडामृगेषु च॥**

(३।३१।३२—३४)

'यो मनुष्यः शिश्नोदरपरायणानां ( स्त्रीषु तथा धन एवासक्तानां ) नीचपुरुषाणां सङ्गं कृत्वा तद्वदेव वर्तते, स तत्सदृश

एवान्धकारमयानि नरकाणि गच्छति। यतो दुष्टसङ्गेन सत्यं, पवित्रता, दया, मननशीलता, बुद्धिर्लज्जा, श्रीः, कीर्तिः, क्षमा, शमः ( मनोनिग्रहः ), दमः ( इन्द्रियसंयमः ) ऐश्वर्यादयश्च सर्वे गुणा नश्यन्ति। अतएव तेषामशान्तचित्तानां मूर्खाणां नष्टबुद्धीनां योषिद्धस्तक्रीडनकीभूतानां शोचनीयानामसाधूनां दुष्टमनुष्याणां सङ्गो न कदापि कर्तव्यः।'

अस्मादेव कारणाद् दुस्सङ्गस्य त्यागस्तु सर्वेषामेव कृते परम आवश्यकः, परंतु भगवत्प्रेमाभिलाषिभिः पुरुषैस्तु दुस्सङ्गस्य त्यागः परमसावधानतया करणीयः। भगवता श्रीरामचन्द्रेण विभीषणं प्रति कथितम्—

**बरु भल बास नरक कर ताता। दुष्ट संग जनि देइ बिधाता॥**

'हे विभीषण! नरके वासो वरः, परंतु विधाता कदापि दुष्टसङ्गं न दद्यात्।' 'दुष्टसङ्ग' शब्देन केवलानां दुराचाराणां मनुष्याणामेव सङ्गो न बोद्धव्यः। इन्द्रियाणां कोऽपि विषयो योऽस्माकं मनस्यसद्विचारं विषयलालसां चोत्पादयेत् तथा भगवत्प्राप्तिमार्गाच्चित्तं विचालयेद् दुस्सङ्गो भवितुं शक्नोति। अस्माभिर्न किंचिदपीदृशं चेतनं जडं वा वस्तु द्रष्टव्यं, नेदृशी वार्ता श्रोतव्या, नेदृशी चर्चा कर्तव्या, नैतादृशे स्थाने गन्तव्यं, न तादृशं पुस्तकं पत्रिका वा पठनीया, न तादृशं चित्रं द्रष्टव्यं, न तादृशं वस्तु भोक्तव्यं घ्रातव्यं स्प्रष्टव्यं वा नापि च तादृशो विचार एव कर्तव्यो येनास्माकं चित्ते विषयचिन्तनस्य प्राबल्यं भवेत्। इदं स्मरणीयं यन्मनुष्येषु सतामसतां च भावानामुत्पत्तौ वृद्धौ च न्यूनातिन्यूनानीमानि दश वस्तूनि मुख्या हेतवो भवन्ति स्थानमन्नं, जलं, परिवारः, प्रतिवेशो दृश्यं, साहित्यमालोचनमाजीविकाकार्य-

मुपासना च। यदीमानि सर्वाणि वस्तूनि सात्त्विकानि भवन्ति तर्ह्येषां सेवनेन सात्त्विकता वर्धते। एतेषामेव सेवनं सत्सङ्गः। तथा यदीमानि राजसानि तामसानि वा सन्ति तर्ह्येषां सेवनं दुस्सङ्गोऽस्ति, तेन चाज्ञानस्य वृद्धेरूर्ध्वं प्रायः सर्वेषां दोषाणां विकासो भवति। अतएव दुस्सङ्गस्य सर्वात्मना सर्वथा त्यागः कर्तव्यः।

**कामक्रोधमोहस्मृतिभ्रंशबुद्धिनाशसर्वनाशकारणत्वात् ॥ ४४ ॥**

**४४—यतः स ( दुस्सङ्गः ) कामक्रोधमोहस्मृतिभ्रंशबुद्धिनाशसर्वनाशानां कारणमस्ति।**

भगवत्सम्बन्धि तत्त्वरहस्यं लीलाकथाश्च त्यक्त्वेन्द्रियेभ्यो भोगकाले तृप्तिं ददतां लौकिकविषयाणां चिन्तनमेव सर्वनाशस्य मूलमस्ति। चित्तं निरन्तरमधिकसमयपर्यन्तं वा यस्य विषयस्य चिन्तनं करोति, तस्मिन्नेव तस्यासक्तिर्भवति। दुस्सङ्गेन—सांसारिकविषयाणां विषयासक्तपुरुषाणां च कायेन वाचा मनसा च कृतेन सङ्गेन स्वभावत एव विषयासक्तिर्वर्धते। आसक्तेः कामना जायते। इयं कामनैव सर्वेषां पापानां मूलमस्ति। कामनायास्तृप्तेरधिकप्राप्तये लोभ उत्पद्यते तस्या अतृप्तेश्च सैव कामना क्रोधरूपेण परिणता भवति। अतएव श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन रागरूपादासक्तिरूपाद्वा रजोगुणादुत्पन्नः काम एव पापानामुद्भवे मुख्यो हेतुः प्रतिपादितः। अर्जुनेन पृष्टं यद् 'भगवन्! मनुष्योऽनिच्छन्नपि बलाद् गृहीत इव भूत्वा कस्य प्रेरणया पापं करोति ?' अस्योत्तररूपेण भगवान् स्पष्टं कथयति—

**काम एष क्रोध एष रजोगुणसमुद्भवः ।**
**महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥**

( गीता ३ । ३७ )

'रजोगुणसमुद्भवोऽयं काम एव क्रोधोऽस्ति । अस्य महापापस्य कामस्योदरं कदापि न पूर्यते । अस्मिन् विषये त्वमिमं काममेव ( पाप-कारयितारं ) स्वकीयं शत्रुं मन्यस्व ।' यद्यपि कामाल्लोभः क्रोधश्चो-भावेवोत्पन्नौ भवतः, तथापि जगति स्वल्पानामेव कामनानां मनोऽनुकूला पूर्तिर्भवति, प्रायेण तु विफलतैव प्राप्यते । विफलतायां क्रोध उत्पद्यते । क्रोधस्योत्पत्तौ सत्यां मनुष्यो विवेकविचारशून्यो भवति । तस्य हित-महितं वा किंचिदपि न प्रतिभाति । स पिशाच इव केवलं विनाशायैव प्रयतते । अस्मिन् मोहे तस्य स्मृतिर्नष्टा भवति तथा स्मृतिभ्रंशे सति तस्य बुद्धिर्नश्यति, बुद्धिनाशे स लोकपरलोकयोः कल्याणमार्गात् पतति—तस्य सर्वनाशो भवति । साक्षादियमेव वार्ता श्रीभगवतापि गीताया द्वितीयेऽध्याये ६२-६३ श्लोकयोः कथिता—

**ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।**
**सङ्गात्संजायते कामः कामात् क्रोधोऽभिजायते ॥**
**क्रोधाद्भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः ।**
**स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥**

'विषयाणां चिन्तनान्मानवस्य विषयेष्वासक्तिर्भवति । आसक्तेः कामः संजायते । ( कामतृप्तौ बाधायां सत्यां ) ततः कामादेव क्रोधोऽभिजायते । क्रोधात् सम्मोहो भवति,

सम्मोहात् स्मृतिभ्रंशः, स्मृतिभ्रंशाद् बुद्धिनाशोऽथच बुद्धिनाशात् ( पुरुषस्य ) सर्वनाशो भवति ।'

सर्वनाशस्य कारणभूतानां विषयाणां चिन्तने विषयाणां विषयिपुरुषाणां च सङ्ग एव प्रधानं कारणमस्ति । अयमेव दुस्सङ्गोऽत एवास्य सर्वथा त्यागः कर्तव्यः ।

**तरङ्गायिता अपीमे सङ्गात् समुद्रायन्ति ॥ ४५ ॥**

**४५—इमे ( कामक्रोधादयः ) प्राक् तरङ्गा इव ( लघुरूपतया ) आगत्यापि ( दुस्सङ्गाद् विशालस्य ) समुद्रस्याकारं धारयन्ति ।**

यावद् दोषाणां समूलं विनाशो न भवेत् तावत्स्वल्पादपि दोषाद् भेतव्यमेव । यथेन्धने प्रच्छन्नः स्वल्पोऽप्यग्निकणो वायुवेगेन विशालस्याग्नेः स्वरूपं धारयति, एवमेव प्रच्छन्नः स्वल्पोऽपि दोषः कुसङ्गं प्राप्यैवाङ्कुरितो भूत्वा ( सागराकारं ) विशालं रूपं धारयति । प्राग् यदा मनसि कामक्रोधविकार उत्पद्यते तदा तस्यैकतरङ्ग इवागच्छति । परंतु कुसङ्गप्राप्तिसमकाल एव स तरङ्गः समुद्रायते । पुनः समन्ताद् सम्पूर्णे हृदि तस्यैवाधिकारो जायते, सद्विचारस्य प्रवेशायाप्यवकाशो न तिष्ठति, तस्मात् सर्वनाश एव भवति । अतएवेदं न मन्तव्यं यदस्माकमन्तःकरणे सद्गुणानामाधिक्यमस्ति तथा दोषाः स्वल्पाः सन्ति; अतः कुसङ्गतोऽस्माकं का हानिर्भविष्यतीति । प्रत्युत सदा-सर्वदात्यन्तसावधानतया सर्वात्मना कुसङ्गस्य त्याग एव कर्तव्यः ।

# मायां कस्तरति ?

**कस्तरति कस्तरति मायाम् ? यः सङ्गांस्त्यजति, यो महानुभावं सेवते, निर्ममो भवति ॥ ४६ ॥**

**४६––( प्रश्नः–– ) कस्तरति ? ( दुस्तरां ) मायां कस्तरति ? ( उत्तरम्–– ) यः सर्वान् सङ्गान् परित्यज्यति, यो महानुभावानां सेवां करोति तथा यो ममतारहितो भवति ।**

नद्यां तरतो मनुष्यस्य सर्वाधिकमावश्यकं कार्यं भवति हस्ताभ्यां पादाभ्यां च जलस्य प्रक्षेपणं कुर्वतो गमनं निरन्तरं जलस्यापसारणम्; तदैव नूतनस्तरीता नद्याः पारं गन्तुं शक्नोति । जलस्य प्रक्षेपणं त्यजेच्चेत्तदा तत्कालमेव निमज्जेत् । एवमेव तां महाभयंकरीं दुस्तरां मायानदीमुत्तीर्य ये परं पारं गन्तुमिच्छन्ति, तैरहंकारविषयासक्तिरूपं वारि निरन्तरं पृथक्क्षेपणीयम् । अहंकारासक्तिलक्षणेन जलेनैवेयं मायानदी पूर्णास्ति । योऽहंकारमासक्तिं च दूरे न क्षेप्तुं शक्नोति, नानयोस्त्यागं कर्तुमिच्छति सोऽस्या मायानद्या जले रममाणोऽतलतले निमग्नो भविष्यति । अतः सङ्गत्यागोऽवश्यं करणीयः । परंतु हस्तौ पादौ चालयतोऽपि तस्य पुरुषस्य क्लान्तिः श्वासच्छेदो वा सम्भाव्यते; अतएव मध्ये मध्ये तादृशमवलम्बनमपेक्ष्यते यत्र किंचित्कालं स्थित्वा स विश्रामं लातुं शक्नुयात् । अस्यां मायानद्यामपि केवलेन सङ्गत्यागेन कार्यं न सरति । अत्रापि विश्रामस्थलान्यभीष्टानि । तानि विश्राम-

स्थलानि सताममृतमयानि वचनान्येत्र सन्ति, येषामाश्रयेण नवीनं बलं प्राप्यते तथा तेन बलेन मनुष्यो मायासमुद्रस्य पारं गन्तुं शक्नोति। वस्तुतः सतां सेविनः साधकस्य स्वबलेन तरणमापद्यत एव न, स तु सतां महानुभावानां कृपामयीं सुदृढां महानौकामारुह्यानायासेनैव तरति। अतएव देवर्षिर्महानुभावानां सेवां कर्तुमादिशति।

श्रीमद्भागवते भगवान् कथयति—

**निमज्ज्योन्मज्जतां घोरे भवाब्धौ परमायनम्।**
**सन्तो ब्रह्मविदः शान्ता नौर्दृढेवाप्सु मज्जताम्॥**
(११।२६।३२)

'जले निमज्जतां जनानां सुदृढनौकेवास्मिन् भयंकरे संसारसागरे निमज्ज्योन्मज्जतां मनुष्याणां ब्रह्मविदः शान्तचित्ताः सन्तो जना एव परमाश्रयाः सन्ति।' महानुभावानां सतां सेवया पापतापा मोहश्चानायासेनैव दूरीभवन्ति।

**यथोपश्रयमाणस्य भगवन्तं विभावसुम्।**
**शीतं भयं तमोऽप्येति साधून् संसेवतस्तथा॥**
(११।२६।३१)

'यथा भगवतोऽग्निदेवस्याश्रये गृहीते शीतस्य भयस्यान्धकारस्य च—त्रयाणामेव नाशो भवति, एवमेव सत्पुरुषाणां सेवनेन पापलक्षणं शीतं जन्ममृत्युरूपं भयमज्ञानमयोऽन्धकारश्चैतेषु कतमोऽपि नावतिष्ठते।'

निर्मलाया हरिभक्तेः प्राप्तयेऽपि महापुरुषाणां चरणसेवैव प्रधानं साधनमस्ति। श्रीमद्भागवते भक्तराजस्य प्रह्लादस्य ज्ञानिप्रवरावधूत-शिरोमणेर्जडभरतस्य च वचने स्तः—

नैषां मतिस्तावदुरुक्रमाङ्घ्रिं
स्पृशत्यनर्थापगमो यदर्थः ।
महीयसां पादरजोऽभिषेकं
निष्किंचनानां न वृणीत यावत् ॥
(७ । ५ । ३२)

रहूगणैतत्तपसा न याति
न चेज्यया निर्वपणाद् गृहाद् वा ।
नच्छन्दसा नैव जलाग्निसूर्यै-
र्विना महत्पादरजोऽभिषेकम् ॥
(५ । १२ । १२)

प्रह्लादः कथयति यद् 'हे तात ! ययोर्भगवतः श्रीहरेश्चरणयोः स्पर्शः सकलानर्थनिवृत्तकरोऽस्ति, तयोः श्रीहरिचरणयोस्तावत् प्रेम न भवति, यावदकिंचनानां ( भगवति समर्पितसर्वस्वानां ) साधुमहापुरुषाणां चरणरजसा मस्तकस्याभिषेको न क्रियेत ।'

महात्मा जडभरतो राजानं रहूगणं कथयति—'हे रहूगण ! इदं भगवत्तत्त्वज्ञानं भगवत्प्रेम च तपसा यज्ञेन दानेन गृहस्थाश्रमधर्मपालनेन परोपकारेण वेदाध्ययनेन जलाग्निसूर्याणामुपासनया च नोपलभ्यते । इदं तु महापुरुषाणां चरणरजसा स्नानेन तेषां चरणसेवयैव लभ्यते ।'

परं त्विदं स्मरणीयं स्याद् यन्महापुरुषाणां सेवाया अभिप्रायः केवलं तेषां समीपे निवसनमथवा तेषां शरीरस्य शुश्रूषाकरणमेव नास्ति । तस्यापि यथायोग्यमावश्यकता सार्थकता च स्तः; परंतु यावद् वयं

तेषामाज्ञानुसारेण कार्यं न कुर्मस्तेषां संकेतानुकूलं न चलामस्तथा तेषां रुचिमनुसृत्य स्वजीवनस्य निर्माणं न कुर्मस्तावत्सेवायां त्रुटिरेव मन्तव्या। अत एवेदं ज्ञात्वा सर्वदा सर्वथा च महानुभावानां सेवा करणीया।

परंत्वत्र ममतैका महती बाधास्ति। ममताया बन्धने सति सतां सेवा भवितुमेव न शक्नोति। 'गृहं मम, शरीरं मम, परिवारो मम, धनं मम, सम्बन्धिनो मम, भवनं मम, भूमिर्मम'—एवं ममताया अगणितैर्बन्धनैर्जीवो निबद्धोऽस्ति। ममताया एतेषां बन्धनानां त्रोटनं कर्तव्यं भविष्यति। अवश्यमेव सत्सङ्गमयस्य सत्सेवालक्षणस्य च दिव्यमणिदीपकस्य प्रकाशेन ममतालक्षणायास्तमोमय्या रजन्या अन्धकारोऽधिकांशतो हीयते क्षीयते वा, तथापि प्राक् सत्सङ्गे गमनायापि तु ममतायास्तनूकरणस्य संकोचस्य वावश्यकतास्ति। अतएव संसारस्येमान् ममतास्पदीभूतान् विषयान् दुःखरूपाननित्यानज्ञानमूलकांश्च मत्वा एनान् प्रति ममभावस्य सर्वथा त्यागः करणीयः। इदं मन्तव्यं यत्संसारे मम किंचिदपि नास्ति। यच्छरीरं मनुष्यो न ममैवेत्यपित्वहमिति कथयति, तदपि नष्टं भवति, तदा पुनरन्येषु वस्तुषु ममत्वग्रहणं तु मूर्खतैवास्ति। मायायास्तरणायास्य ममत्वस्य नाशोऽवश्यं कर्तव्यः। य एवं करोति स मायां तरति।

**यो विविक्तस्थानं सेवते, यो लोकबन्धमुन्मूलयति, निस्त्रैगुण्यो भवति, योगक्षेमं त्यजति ॥ ४७ ॥**

४७ यो निर्जने स्थाने निवसति, यो लौकिकानि

**बन्धनानि समुन्मूलयति, यस्त्रीन् गुणानतीतो भवति तथा यो योगं क्षेमं च परित्यजति ।**

मायां तरीतुं पूर्वस्मिन् सूत्रे त्रय उपायाः प्रतिपादिता अथास्मिन् सूत्रे चत्वार उपायाः प्रतिपाद्यन्ते तथाऽऽगामिनि सूत्रद्वये क्रमशः पञ्चोपाया लक्षणानि वा पुनः प्रतिपादयिष्यन्ते ।

ममतायास्त्यागोऽहर्निशं ममतासम्बन्धिनां वस्तूनां मध्ये निवासेन न भवति, प्रत्युत सङ्गेन ममता वर्धते; अतएव साधकेनैकान्तसेवनं कर्तव्यम् । श्रीभगवता गीतायाम्—

**विविक्तदेशसेवित्वमरतिर्जनसंसदि ।**

(१३।१०)

—इति वचनेनैकान्ते स्थाने निवासं कर्तुं तथा जनसमुदाये प्रीतिं न रक्षितुमाज्ञा प्रदत्तास्ति । मनुष्यः कियदपि साधनं कर्तुं चेष्टेत, यावत्स विषयवासनाबद्धे जनसमुदाये मोहकविषयपरिपूर्णे स्थाने च स्थास्यति तावद् भगवति तस्य मनोयोगोऽत्यन्तदुष्करोऽस्ति, अत एव साधकेनैकान्तदेशे स्थितेन सता भक्तेः साधनं कर्तव्यमिति प्रतिपादितम् । सहैव, भगवता सार्धं भाविना प्रेमबन्धनेनात्मनो बन्धनाय लोकबन्धनस्य त्रोटनमावश्यकमस्ति । एकान्तदेशसेवनेन लोकसङ्गस्य परित्यक्ततया लोकबन्धनं स्वयमेव शिथिलं भविष्यति । किंच भगवतो रहस्येन प्रभावेण तत्त्वेन च सह मृत्युमयस्य दुःखालयस्य चास्य लोकस्य तुलनां कृत्वा भूयो भूयो विचारकरणेन लोकबन्धनं स्वत एव विच्छिन्नं भवति ।

एतदनन्तरं भक्तेः साधकेन सत्त्वं रजस्तमश्चेति त्रिभ्योऽपि गुणेभ्योऽतीतेन भवितव्यम् । संसारस्य प्रकाश एभिर्गुणैरेव भवति । गुणानामेव कार्यमिदं जगदस्ति । अत एवास्य जगतः पदार्थेष्वनासक्ति-स्तेभ्यो विरक्तिरेव वा निस्त्रैगुण्यीभवनमसंसारिभवनं वास्ति । यो मनुष्यो विषयासक्तो विषयकामश्चास्ति स एव गुणैर्बद्धोऽस्ति तथा यो भगवदासक्तो भगवत्प्रेमी चास्ति स एव निस्त्रैगुण्योऽस्ति । यो निस्त्रै-गुण्यो भवेत् स योगक्षेमचिन्तां कुतः करिष्यति ? संसारे तु तस्य किमपि प्रलोभनमेव नास्ति, यतः स निस्त्रैगुण्योऽस्ति तथा मोक्षस्य सिद्धावपि निःस्पृहोऽस्ति, तस्य भगवत्प्रेमित्वात् । अप्राप्तस्य प्राप्तिर्योगो नाम तथा प्राप्तस्य संरक्षणं क्षेम उच्यते । अत्र केवलभोजनाच्छादनयो-र्भाव एव नास्ति । परमार्थतस्तु योगस्यार्थोऽस्ति भगवत्प्राप्तिर्भगवत्प्राप्तेः सफलं साधनं वा, तथा क्षेमस्यार्थोऽस्ति भगवत्प्राप्तिसाधनस्य संरक्षणम् । प्रेमी भगवद्भक्तोऽनयोर्द्वयोरेवार्थयोर्योगक्षेमयोश्चिन्तां न करोति । स तु भगवत्प्रेम्णैव मत्तस्तिष्ठन् भगवत्प्रेरणया सदा-सर्वदा भगवदनुकूलं स्वाभाविकं कर्म कुर्वन् स्थितो भवति । भक्तस्य योगक्षेमं स्वयं भगवानेव चालयति । श्रीभगवता गीतायां स्वयमुक्तम्—

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥
(९ । २२)

(देहस्य...यस्य निरत्तां ... चिन्तनं कर्तुं...निष्कामभावेन

मामुपासते, तेषां नित्यं मय्यभियुक्तानां भक्तानां योगक्षेममहं स्वयं वहामि ।*

* श्रीजगन्नाथपुर्यामेकः सरलहृदयः सदाचारो ब्राह्मणः सपरिवारो निवसति स्म । तस्य भगवद्गीतायां महाननुराग आसीत् । सोऽहर्निशं गीताया अध्ययनं मननं करोति स्म । नूनमेव तस्य सकामभावो नैतावत्पर्यन्तं दूरीभूत आसीत् परंत्वासीत्स महाविश्वासी । एकदा स गीतायाः प्रत्येकपदस्य क्रियात्मकमर्थं द्रष्टुमिच्छति स्म । पाठकाले यदोपर्युक्तश्लोकस्य वहामीति क्रियापदमायातं तदा ब्राह्मणो विचारमग्नोऽभवत्—'किं भगवानात्मनो भक्तस्य कृते सर्वाण्यावश्यकानि वस्तूनि स्वयं वहन् तस्य गृहं नयति ? नहि नहि ! एवं न भवितुं शक्नोति, भगवान् केनाप्यन्येन साधनेन तेषां वस्तूनां संग्रहं कारयतीति सम्भाव्यते ।' एवमालोच्य 'वहाम्यहम्' इत्यस्यार्थमघटमानमसंगतं वा पश्यन् ब्राह्मणो गीताया उक्तपदं विलोप्य तत्स्थाने 'करोम्यहम्' इति परिवर्तितं पाठमलिखत् । ब्राह्मणो भिक्षावृत्त्या जीवननिर्वाहं करोति स्म । भगवतोऽपारा मायास्ति । एकस्मिन् दिवसे मुशलधारा वृष्टिरारब्धाभवत् । ब्राह्मणदेवस्तस्मिन् दिने गृहान्निर्गन्तुमशक्ततया सम्पूर्णं दिनं सपरिवारो निराहार एवासीत् । परेद्युर्वृष्टौ शान्तायां ब्राह्मणो भिक्षार्थं प्रतस्थे । तस्य गृहान्निष्क्रमणानन्तरं नातिचिरादेवैको रुधिराप्लुताङ्गोऽत्यन्तसुन्दरो बालको ब्राह्मणस्य गृहमागत्य ब्राह्मणीमुवाच—'अम्ब ! पण्डितमहाशयेन अयं प्रसादः प्रेषितः ।' ब्राह्मणी बालकस्य मनोहरं मुखमवलोक्य तदीयं मिष्टं वचनं च निशम्य मुग्धाभवत्; परंतु तस्य शरीराद्रक्तं प्रवहद् दृष्ट्वा तस्या मनसि भृशमेव दुःखमभूत् । सा साश्रुनयना जिज्ञासां चक्रे—'वत्स ! केन निष्ठुरेण त्वं ताडितोऽसि ?' बालको ब्राह्मण्याः पत्युर्नाम गृहीत्वोवाच—'ब्राह्मणदेवेन ताडितोऽस्मि ।' ब्राह्मणी तु विस्मये निमग्नाभूदवोचच्च—'स तु महान् सरलः साधुरक्रोधनः परमो भागवतश्चास्ति, त्वादृशं नयनमनोमोहनं बालकं स कथं ताडयेत् ?' बालकेनोक्तम्—'अहं सत्यं वदामि मातः ! तेनैवैकेन शूलेन ममाङ्गे क्षतं कृतम् । तेन कथमेवं कृतमिति तु स एव जानातु ।'

भोजनादेश्चिन्ता तु साधारणेनापि विश्वासिना भक्तेन न कर्तव्या। ये भोजनाद्यर्थं भगवदाश्रयं न परिगृह्य न्यायसत्ययोर्मार्गस्य सदाचारस्य च त्यागं कृत्वा पापमाश्रयन्ति, ते त्वेकेन प्रकारेण नास्तिका एव सन्ति। उक्तमस्ति—

**भोजनाच्छादने चिन्तां वृथा कुर्वन्ति वैष्णवाः।**
**योऽसौ विश्वम्भरो देवः स किं दासानुपेक्षते॥**

'वैष्णवा आहाराद्यर्थं व्यर्थमेव चिन्तां कुर्वन्ति। यो भगवान् समस्तजगतः सर्वेषां जीवानां भरणपोषणे च करोति स किमात्मनः सेवकान् कदापि विस्मर्तुं शक्नोति ?'

---

एतावदुक्त्वा प्रसादं च तत्रैव स्थापयित्वा बालकस्ततः प्रस्थानं कृतवान्। अन्यमनस्कतया ब्राह्मण्या तस्य गमनं न ज्ञातम्। सा किंचिदपि न बुद्ध्वातिदुःखितचित्ता स्वामिनः स्वगृहे प्रत्यागमनं प्रतीक्षमाणासीत्। समये ब्राह्मणो गृहमाजगाम। ब्राह्मणी विनयेन सह किंतु रोषविषादपूर्णया वाचा सर्वं वृत्तान्तं ब्राह्मणं श्रावयामास। पण्डितवर्यो गृहिण्या वार्तां श्रुत्वावाक् संजातः। गीतायाः श्लोके हरितालेपनस्य घटनां स्मृत्वा स व्याकुलोऽभूत्। तस्य नयनाभ्यामश्रुधारा वहमानाभवत्। ब्राह्मणोऽधुना ज्ञातवान् यत्सत्यमेव भगवानात्मनो विश्वासिनो भक्तस्य कृते स्वयं शिरसा वहन्नाहारादिकं प्रापयति। गीता श्रीभगवतोऽङ्गभूतास्ति। गीतायाः श्लोकस्य विलोपनेन भगवतः शरीरे क्षतं जातम्। ब्राह्मणः स्वकृत्योपरि पश्चात्तापं कारंकारं मूर्च्छितो भूत्वा पृथिव्यां न्यपतत्। भगवांस्तस्मै दर्शनं दत्त्वा तं कृतार्थीकृतवान्। किंचित् कालमनु स उत्थाय भगवन्तं क्षमां प्रार्थयामास तथा भावविह्वलो भूत्वा गीतायाश्चतुर्दिक्षु 'वहाम्यहम्' 'वहाम्यहम्' इति लिखितवानभवत्।

**यः कर्मफलं त्यजति, कर्माणि संन्यस्यति ततो निर्द्वन्द्वो भवति ॥ ४८ ॥**

**४८–यः कर्मफलस्य त्यागं करोति, कर्मणामपि परित्यागं करोति तथा तदानीं सर्वं त्यक्त्वा यो निर्द्वन्द्वो भवति ।**

योगक्षेमचिन्तायास्त्यागं कुर्वन् कर्मफलस्य त्यागी भवत्येव; अथवा योगक्षेमत्यागायापि कर्मफलत्यागस्यावश्यकता भवति । वस्तुतोऽधुनात एव सूत्रात् प्रेमिभक्तस्य लक्षणानां वर्णनमारब्धम् । एतानि भक्तेः साधकानां कृते आदर्शभूतानि साधनानि सन्ति तथा सिद्धप्रेमिभक्तानां स्वाभाविका गुणाः सन्ति । भक्तो यत्किंचित् करोति तद् भगवदर्थमेव करोति । तस्य तत्कार्यस्यात्मनः कृते किंचिदपि फलं नाभीष्टम् । तस्य न तु कर्मण्यासक्तिरस्ति न वा तत्फले । स तु यन्त्रवत् कर्म कुर्वंस्तिष्ठति । परंतु यावत् स इदं स्मरति यदहं यन्त्रमस्मि, भगवदर्थं च कर्म करोमि; तावत् स कर्मफलस्यैव त्यागी वक्तुं शक्यते । कर्मत्यागी तु तदा भविष्यति, यदा स इदमपि न जानीयाद् यदहमपि किंचित् करोमि । यदा मनोबुद्ध्योः सम्पूर्णसमर्पणेन भगवांस्तदीयमहंकारं सर्वथा हृत्वा स्वयमेव तदीये हृदयमन्दिरे समासीनो भूत्वा कर्म करिष्यति कारयिष्यति च तदा स कर्मणां सम्पूर्णतया त्यागी भूत्वा सर्वथा निर्द्वन्द्वो भविष्यति । पुनस्तस्य सुखदुःखाभ्यां लाभालाभाभ्यां स्वकीयपरकीयाभ्यामहं त्वमित्यादिद्वन्द्वाभ्यां च किमपि प्रयोजनमेव नैव स्थास्यति । परंतु यावदीदृशी स्वाभाविकी स्थितिर्न स्यात् तावत् साधकत्वेन कर्मफलानां त्यागं तथा

भगवद्विरोधिनामनावश्यकानां वा कर्मणां स्वरूपतस्त्यागं कृत्वा निर्द्वन्द्वीभवनस्य चेष्टा तेन कर्तव्या । श्रीभगवान् कथयति—

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥
(गीता २ । ४५)

'हे अर्जुन ! वेदास्त्रयाणां गुणानां प्रकाशस्वरूपं संसारं प्रकाशयन्ति, अत एव त्वं निस्त्रैगुण्योऽथवासंसारी ( निष्कामः ), सुखदुःखादिद्वन्द्वै रहितो योगक्षेमयोरिच्छामकुर्वन् नित्यसत्त्वस्थः परमात्मपरायणश्च भव ।'

## वेदानपि संन्यस्यति केवलमविच्छिन्नानुरागं लभते ॥ ४९ ॥

**४९–यो वेदानामपि सम्यक्तया परित्यागं करोति तथा योऽखण्डमसीम भगवत्प्रेम प्राप्नोति ।**

साधनदृष्ट्योपर्युक्तं श्रीमद्भगवद्गीतायाः ( २ । ४५ ) श्लोकमनुसृत्य त्रयाणां गुणानां प्रकाशरूपं संसारं प्रकटयतां वेदानां त्यागेन निष्कामीभवनरूपस्याभिप्रायस्य ग्रहणमधिकं साधु । सकामभावस्य त्याग एव वेदत्यागोऽस्ति । परंतु देवर्षिर्नारदोऽत्र यां प्रेमावस्थां वर्णयति तस्यामवस्थायां भक्तः केवलस्यैकस्याविच्छिन्नस्याखण्डस्य भगवत्प्रेम्णो महासागरे निमग्नो भूत्वा तन्मयो भवति । एतेन वेदानामाश्रयः स्वयमेव परित्यक्तो भवति । तेन पुनर्लौकिकी वैदिकी काचिदपि क्रिया यथाविधि न सम्पादयितुं शक्यते । सर्वेषां नियमानां स्वतोभङ्ग एतस्य प्रेम्ण एको नियमोऽस्ति । अयमपि शास्त्रविधिरेवास्ति । अस्यां

स्थितौ वेदाः स्वानुयायिनं पुरुषं वेदानां परमं फलं प्राप्नुवन्तमवलोक्य तस्य चरमया ( परां काष्ठां गतया ) तृप्त्या स्वयं तृप्ता भूत्वा तं मुञ्चन्ति । अयं वेदत्यागो न तिरस्कारमूलकोऽपि तु तृप्तिमूलकोऽस्ति। स ज्ञानपूर्वकं वेदान् न परित्यजति, वेदा एव तं पूर्णकामं मत्वा ततः स्वाधिपत्यमुत्थापयन्ति । अस्यामवस्थायां स प्रेमी विधिनिषेध-मयान् वेदानुल्लङ्घ्य केवल एकेनानिर्वचनीयेन हरिप्रेम्णैव मत्तस्तिष्ठति। स भगवत्प्रेम्ण एका जीवन्ती जाग्रती मूर्तिर्भवति । स्वयं भगवानेव तस्य शरीरे दिव्यप्रेमरूपेण प्रकटीभूय लीलां करोति ।

**स तरति स तरति स लोकांस्तारयति ॥ ५० ॥**

**५०—स तरति ( पारं गच्छति ), स तरति स लोकान् ( जनान् ) तारयति ( पारगतान् करोति ) ।**

देवर्षिर्नारदः पूर्णानन्दनिमग्नो भूत्वोद्घोषयति यद् य एवं भगवत्प्रेममत्तो भवति स स्वयं तु तीर्ण एव, समस्ताँल्लोकानपि तारयति। स एव सत्यस्तरणतारणशीलो भवति । भगवतापि श्रीमद्भागवत उक्तम्—'मद्भक्तियुक्तो भुवनं पुनाति ।'—ईदृशो मे भक्तस्त्रिभुवनं पवित्रं करोति ।

षट्चत्वारिंशत्तमे सूत्रे 'मायां कस्तरति ?' इति प्रश्नं कृत्वा अत्रपर्यन्तं तस्योत्तरं दत्तम् । चतुर्षु सूत्रेषु प्रेम्णः साधनानि प्रेमिणां लक्षणानि च वर्णितानि । अथात ऊर्ध्वं तस्य प्रेम्णः स्वरूपं प्रति-पादयिष्यते । यत्प्राप्य प्रेमिमहानुभावगणा इमां दुर्लभां स्थितिं स्वाभाविगुण-रूपतयानायासेनैव प्राप्नुवन्ति ।

# प्रेमरूपाया भक्तेर्गौण्या भक्तेश्च स्वरूपम्

## अनिर्वचनीयं प्रेमस्वरूपम् ॥ ५१ ॥

### ५१—प्रेम्णः स्वरूपमनिर्वचनीयमस्ति ।

प्रेम्णि परमात्मनि च किमप्यन्तरं नास्ति; यथा वाण्या ब्रह्मणो वर्णनमसम्भवमस्ति, वेदा नेति नेति कथयित्वा तूष्णीं भवन्ति, तथैव प्रेम्णो वर्णनमपि वाचा नैव भवितुं शक्नोति । संसारेऽपि वयं पश्यामो यत् प्रियवस्तुनो लाभे तस्य वृत्ते समुपलब्धे, तस्य स्पर्शालिङ्गनयोस्तेन सह प्रेमालापस्य च शुभावसरे प्राप्ते सति हृदि यस्यानन्दस्यानुभवो भवति, तस्य वर्णनं वाणी कदापि न कर्तुं शक्नोति । यस्य प्रेम्णो वर्णनं वाचा भवितुं शक्नोति तत्तु प्रेम्णः सर्वथा बाह्यं रूपमस्ति । प्रेम तु भवत्यनुभवस्य वस्तु । भगवाञ्छ्रीरामो लङ्कायां स्थितां जगज्जननीं जानकीं प्रति संदेशं प्रेषयति—

**प्रेम्णस्तत्त्वं प्रिये मे ते जानात्येकं मनो मम ।**
**तत् स्थितं ते सदा पार्श्वे विद्धि प्रीतिरसं ततः॥***

प्रेम्णोऽनुभवो भवति मनसि तथा मनो विद्यते सदाऽऽत्मनः प्रेमिणः पार्श्वे । मनसोऽभावे पुनर्वाणी यत्किंचिदपि वर्णयितुं वास्तविकीं सामग्रीं कुतः प्राप्नुयात् ? अतएव प्रेम्णो यत्किंचिदपि वर्णनमुपलभ्यते, तत् तु सांकेतिकमात्रमस्ति—बाह्यमस्ति । प्रेम्णः

---

* तत्त्व प्रेम कर मम अरु तोरा । जानत प्रिया एकु मनु मोरा ॥
सो मनु सदा रहत तोहि पाहीं । जानु प्रीति रसु एतनेहि माहीं ॥

प्राप्तिं विना तु प्रेम कोऽपि जानाति न । तथा तत्प्राप्तौ सत्यां स प्रेमी स्वमनसैव हीनो भवति । जले मुखाच्छब्दस्योच्चारणं तावदेव भवति यावन्मुखं जलाद् बहिस्तिष्ठति । यदा मानवोऽतलतले निमज्जति तदा तु निमग्नस्य पुंसः शवस्यानुसंधानमपि कठिनं भवति । एवमेव यः प्रेमसिन्धौ निमग्नोऽस्ति स किंचिद् वक्तुमेव न शक्नोति । तथो-पर्युपरि ब्रुडनं कुर्वाणा निमज्जनोन्मज्जने विदधतश्च जना यत् किंचित् कथयन्ति तत्केवलमुपरितनं—बाह्यमेव वृत्तं वर्णयन्ति—

**यो मज्जति न स ब्रूते सोऽनभिज्ञो ब्रवीति यः ।**
**प्रेमाब्धौ कोऽपि गम्भीरे निमज्जेच्चतुरः सुधीः ॥***

## मूकास्वादनवत् ॥ ५२ ॥

### ५२—मूकस्यास्वादनसदृशम् ।

यथा मूको गुडं भुक्त्वा प्रसीदति, हसति, परंतु गुडस्य स्वादं न हि वर्णयितुं शक्नोति; एवमेव प्रेमिणो महात्मानः प्रेमानुभूयानन्दे निमज्जन्ति, परंत्वात्मनस्तस्यानुभवस्य स्वरूपमन्यं कंचिदपि पुरुषं प्रति नैव कथयितुं शक्नुवन्ति । अस्मिन् प्रेम्णि तन्मयता भवति । अतएव प्रेमी न जानाति कोऽस्मि किं जानामीति । अतएव श्रीराधयैकदा कथितं 'सखि ! नाहं कृष्णप्रेमवार्तां किंचिदपि जानामि न बुद्ध्यामि तथा यत्किंचिज्जानामि तत्प्रकटीकर्तुं क्षमा भाषा मम वाचि नास्ति । अहं त्वेतावदेव जानामि यद् यदा हृदया-भ्यन्तरे तस्य स्पर्शो भवति तदैव मदीयं सर्वं ज्ञानं विलुप्यते ।'

---

* डूबै सो बोलै नहीं, बोलै सो अनजान ।
गहरे प्रेम समुद्र कोउ डूबै चतुर सुजान ॥

प्रकाशते क्वापि पात्रे[1] ॥ ५३ ॥

५३—कस्मिंश्चिद् विरले योग्यपात्रे ( प्रेमिभक्ते ) ईदृशं प्रेम प्रकटमपि भवति ।

इदं तु निश्चितमस्ति यद् वाणीद्वारा प्रेम्णः स्वरूपं न हि वक्तुं शक्यते, परंतु यदा कोऽपि प्रेममदमत्तो भाग्यवान् महापुरुषस्तनु-मनसोः स्मृतिं विहाय दिव्यामुन्मत्तवच्चेष्टां कर्तुमारभते, तदा प्रेम्ण ईषत् प्रकाशो लोकैर्व्यक्तं दृश्यमानो भवति । तदानीमेतादृशस्य महात्मनोः न केवलया वाण्या तथा नेत्राभ्यामेव वापितु शरीरस्य रोमरोमतः प्रेम्णः किरणाः स्वयमेव निर्गता भवन्ति । इदं प्रेम्णः प्राकट्यं साक्षाद् भगवत एव प्रकाशोऽस्ति । ईदृशः प्रकाशः कस्मिंश्चिद् विरल एव प्रेमिणि महापुरुषे भवति ।

गुणरहितं कामनारहितं प्रतिक्षणवर्धमानमविच्छिन्नं सूक्ष्मतरमनुभवरूपम् ॥ ५४ ॥

५४—इदं प्रेम गुणरहितमस्ति कामनारहितमस्ति प्रतिक्षणं वर्धमानं तिष्ठति विच्छेदरहितमस्ति सूक्ष्मादपि सूक्ष्मतरमस्ति तथानुभवरूपमस्ति ।

कमपि गुणं दृष्ट्वा यत्प्रेम भवति तत्तु गुणस्यादर्शने तिरो-धातुं शक्नोति । परंतु सत्ये ( स्वाभाविके वा ) प्रेम्णि गुणानामपेक्षा नास्ति । प्रेमिणः स्वीये प्रेमास्पदे गुणदोषयोर्दर्शनस्यावकाश एव न लभ्यते, तत्र तु स्वाभाविकं सहजं प्रेम भवति । अथवैवं वक्तुं शक्यते यद् प्रेम गुणातीतं भवति, तत्त्रयाणां गुणानां सीम्नः परतरं वस्त्वस्ति ।

१. पा०—'प्रकाश्यते' ।

प्रेम्णि मनागपि कामना न भवति, यतः प्रेम्णि प्रेमास्पदं सुखिनं द्रष्टुमेकामिच्छां त्यक्त्वा परस्य कस्यापि स्वार्थस्य वासनैव न तिष्ठति। तस्य तु परमोऽर्थः केवलः प्रेमास्पदीभूतः प्रियतम एवास्ति। यत्र किंचिदपि प्राप्तुं वासनास्ति, तत्र तु प्रेम्णः पवित्रमासनं कुटिलेन कामेन कलुषीक्रियमाणमास्ते। अतएव प्रेम्णि कामनाया लेशोऽपि नास्ति।

सत्यं प्रेम कदापि क्षीणं तु भवत्येव न, प्रत्युत तत्सदा वर्धमानमेव तिष्ठति। प्रेम्णि कुत्रापि परिसमाप्तिर्नास्ति। प्रेमिणः सदायमेव भावस्तिष्ठति यन्मयि प्रेम्णो न्यूनतैवास्ति। कस्यामप्यवस्थायां तेनात्मनः प्रेम वृद्धं न दृश्यते, अतएव तस्य प्रत्येकचेष्टा स्वभावादेव प्रेम वर्धयितुं भवति। अस्य विच्छेदरहितस्य प्रेम्णो निरन्तराया वृद्धेः क्रमः कदापि खण्डितो न भवति। इदं विशुद्धं प्रेम दिवा द्विगुणं रात्रौ चतुर्गुणं वर्धमानमेव तिष्ठति।

वर्धते संततं प्रेम शुक्ले शशिकला यथा।
किंत्वत्र पूर्णिमा नास्ति कदाप्यन्तो न वै ततः॥*

इदं प्रेम हृदयस्य गुप्तायां गुहायां निहितमया सूक्ष्मादपि सूक्ष्मतरं केवलानुभवैकगम्यं च भवति। प्रेमी कवी रसखानाभिधो मन्येऽस्यैव सूत्रस्यानुवादं कुर्वाणः कथयति—

यौवनं सद्गुणं रूपं धनं स्वार्थं विना हितम्।
ज्ञात्वा शुद्धमकामं स्यात् प्रेम सर्वरसाकरः॥
सूक्ष्मं सुकोमलं चाति तनु दूरं तथा भृशम्।
सर्वतः कठिनं प्रेम पूर्णमेकरसं सदा॥

---

* प्रेम सदा बढ़िबो करै, ज्यों ससिकला सुवेष।
पै पूनौ यामें नहीं, तातैं कबहुँ न सेष॥

स्वाभाविकं रसात्म स्यादस्वार्थमचलं महत् ।
नित्यमेकरसं प्रेम शुद्धं संवर्धतेऽनिशम् ॥
( इत्येवं प्रेमविषये रसखानमतं परम् )*

इदं प्रेम परमानन्दमयमस्ति, तथाऽऽनन्दमयेन श्रीहरिणा सार्द्धं संयोज्य प्रेमिणमानन्दमयं करोति ।

**तत्प्राप्य तदेवावलोकयति तदेव शृणोति तदेव भाषयति† तदेव चिन्तयति ॥ ५५ ॥**

**५५—इदं प्रेम प्राप्य प्रेमीदं प्रेमैव पश्यति, प्रेमैव शृणोति, प्रेमैव वर्णयति तथा प्रेमैव चिन्तयति ।**

परमप्रेम्णो दिव्यरसे निमग्नः प्रेमानन्दमयः प्रेमी सर्वत्रात्मनः प्रेममयं रसमयं प्रियतममेव पश्यति । तेन कुत्रचिदन्यद् वस्तु दृश्यत एव न । अस्यामेव स्थित्यामेका गोपी कथयति—

यतः पश्याम्यहं दृश्यं भाति श्याममयं ततः ।
श्यामः कुञ्जो वनं श्यामं यमुना श्यामला तथा ॥
श्यामं नभस्तदाच्छाद्य श्यामा घनघटेक्ष्यते ॥
रङ्गेषु सकलेष्वेव श्यामः पूर्णोऽवलोक्यते ।
वार्तेयं नूतनास्तीति लोकाः सर्वे वदन्त्यहो ॥

---

* बिनु जोबन गुन रूप धन बिनु स्वारथ हित जानि ।
सुद्ध, कामना ते रहित, प्रेम सकल रस खानि ॥
अति सूच्छम, कोमल अतिहि, अति पतरो, अति दूर ।
प्रेम कठिन सब ते सदा, नित इकरस भरपूर ॥
रसमय स्वाभाविक, बिना स्वारथ, अचल महान ।
सदा एकरस बढ़त नित, सुद्ध प्रेम रसखान ॥

† क्वचित् क्वचित् पुस्तके 'तदेव भाषयति' इत्यंशो नास्ति ।

भ्रान्ताहमधुना जाताखिलानामथवा नृणाम् ।
परिवर्तनमायाता श्यामा किल कनीनिका ॥
चन्द्रसारो रवेः सारः श्याम एवास्ति संततम् ।
कस्तूरिकामदः श्यामः कामः श्यामस्त्रिलोकजित् ॥
नीलकण्ठस्य कण्ठोऽपि श्याम एवावभासते ।
मन्ये श्यामलतावल्ली सर्वत्रोप्तावलोक्यते ॥
श्रुतीनामक्षराणीह दृश्यन्ते श्यामलान्यहो ।
दीप्तदीपशिखामूर्ध्नि श्यामतैवाक्षिगोचरा ॥
नराणां दैवतानां च का कथा वर्ण्यतामिह ।
अलक्ष्यब्रह्मणश्चापिच्छविः श्याममयी स्मृता ॥*

अपरो भक्तः कथयति—

वीथीषु वर्त्मसु सघट्टकवाटिकासु
वृक्षेषु वल्लिषु वनोपवनेषु चैव ।
द्वारेषु भित्तिषु सजालकदेहलीषु
हीरेषु हारनिचयेषु विभूषणेषु ॥
देहेषु चैव नवकाननकुञ्जकेषु
गोपीषु गोष्वखिलगोकुलगोधनेषु ।

---

* जित देखौं तित स्याममई है ।
स्याम कुंज, बन, जमुना स्यामा, स्याम गगन घनघटा छई है ॥
सब रंगन में स्याम भरौ है, लोग कहत यह बात नई है ।
मैं बौरी, की लोगन ही की स्याम पुतरिया बदल गई है ॥
चंद्रसार रबिसार स्याम है, मृगमद स्याम काम बिजयी है ।
नीलकंठ कौ कंठ स्याम है, मनो स्यामता बेल बई है ॥
श्रुति कौ अच्छर स्याम देखियत, दीपसिखा पर स्यामतई है ।
नर देवन की कौन कथा है, अलख ब्रह्म छबि स्याममई है ॥

विद्युद्घनेष्वपि च यत्र नयामि दृष्टिं
श्यामोऽस्ति तत्र स दृशौ मन आवृणोति ॥*
वार्ता किंचिच्छ्यामप्रेम्णो न वक्तुं शक्यते मुखात् ।
नभो जलं स्थलं दृश्यं श्यामं सर्वं चराचरम् ॥
ब्रह्म नैव न मायास्ति न जोवः काल एव वा ।
नात्मनोऽपि स्मृतिः शिष्टा तिष्ठत्येकः स नन्दजः ॥
कः कं केन प्रकारेण कां वार्तां हार्दिकीं वदेत् ।
हरौ दृष्टे हृतं हृन्मे हरिः सर्वत्र लक्ष्यते ॥†

अस्यामवस्थायां तस्य कर्णयोर्यः कोऽपि ध्वनिरायाति स केवलं प्रेममयस्य प्रेमसंगीतसम्बन्धिनी स्वरलहर्येव भवति । स सर्वदा तस्य मुरल्या मधुरेण रवेणैव मत्तस्तिष्ठति । एवमेव तस्य मुखादपि

---

* बाटन में घाटन में बीथिन में बागन में
बृच्छन में बेलिन में बाटिका में बन में ।
दरन में दिवारन में देहरी दरीचन में,
हीरन में हारन में भूषन में तन में ॥
कानन में कुंजन में गोपिन में गायन में
गोकुल में गोधन में दामिनी में घन में ।
जहाँ-जहाँ देखौं तहाँ स्याम ही दिखाई देत,
सालिगराम छाइ रह्यौ नैनन में मन में ॥

† कहि न जाय मुख सौं कछू स्याम-प्रेमकी बात ।
नभ जल थल चर अचर सब स्यामहि स्याम दिखात ॥
ब्रह्म नहीं, माया नहीं, नहीं जीव, नहिं काल ।,
अपनीहू सुधि ना रही, रह्यौ एक नँदलाल ॥
को कासौं केहि बिधि कहा कहै हृदय की बात ।
हरि देखत हिय हरि गयौ, हरि सर्वत्र लखात ॥

प्रेममयं विहाय नान्यः शब्दो निस्सरति । स प्रेममयस्य गुणान् गायं गायं कदापि श्राम्यत्येव न । वार्तायां वार्तायां तेन केवलदिव्यप्रेमरसामृतस्यैवानुपमः स्वादः सततं लभ्यते तथा सोऽतृप्तया रसनया सर्वदा तस्मिन्नेवामृतरसपाने मत्तस्तिष्ठति । तस्य चित्ते त्वितरस्य कृते स्थानमेव नावशिष्टम् । तत्रैकमात्रप्रियतमस्यैवाखण्डसाम्राज्यमस्ति पूर्णोऽधिकारश्च । ईदृशं स्वल्पमपि स्थानं नास्ति यत्र कस्यचिदन्यस्य कल्पनायाः स्मृतिश्छायारूपेणाप्यागन्तुं शक्नुयात् । चित्तं साक्षात् प्रियतमस्य प्रेम्णः स्वरूपमेव सम्पद्यते । अस्या अवस्थाया अनुमानं कुर्वन् कविः कथयति—

आकर्णयेम कर्णाभ्यां नामान्यस्य न कस्यचित् ।
एकेनैव हि रङ्गेण रक्तमेतत् सुडोरकम् ॥
भ्रान्त्याप्यन्यदहो नाम निर्गतं स्यात् कदापि चेत् ।
रसनां स्वमुखे बद्ध्वा मज्जयाम हलाहले ॥
ठाकुरो वक्ति चित्तस्य वृत्तिरेषैव सम्प्रति ।
कथंचिदपि च भ्रान्त्या त्यजेम न वयं हठम् ॥
दह्यन्तां तानि नेत्राणि हतभाग्यानि यानि वै ।
पश्यन्ति श्यामलं त्यक्त्वा कुत्रचिद् गौरवर्णकम् ॥*

---

* कानन दूसरौ नाम सुनैं नहिं,
एकहि रंग रँगौ यह डोरौ ।
धोखेहुँ दूसरो नाम कढै,
रसना मुख बाँधि हलाहल बोरौ ॥
ठाकुर चित्त की वृत्ति यहै,
हम कैसैंहुँ टेक तजैं नहिं भोरौ ।
बावरी वे अँखियाँ जरि जायँ,
जो साँवरो छाँड़ि निहारति गोरौ ॥

समस्तान्यङ्गानि केवलं तमेवानुभवन्ति । सम्पूर्णानीन्द्रियाणि तमेव विषयीकुर्वन्ति । नेत्रे अहर्निशं सम्पूर्णं विश्वं श्याममयं पश्यतः । कर्णौ सदा तस्यैव मधुरातिमधुरं शब्दब्रह्ममयं वेणुध्वनिमाकर्णयतः । नासिका नित्यनिरन्तरं तस्यैव नटवरस्याङ्गसौरभमेव जिघ्रति । रसनाऽविच्छिन्नरूपेण तामेव प्रेमसुधामास्वादयति तथा शरीरं सर्वदा तस्यैवाखिलसौन्दर्यमाधुर्यरसाम्बुधे रसराजस्य परमसुखस्पर्शस्यानन्दकन्दस्य श्रीनन्दनन्दनस्यानुपमं स्पर्शसुखमनुभवति । आकाशे स एव शब्दोऽस्ति, वायौ स एव स्पर्शोऽस्ति, अग्नौ स एव ज्योतिरस्ति तथा पृथिव्यां स एव गन्धरूपतां गतोऽस्ति । सर्वत्र स एव परिपूर्णोऽस्ति, सर्वत्र स एवात्मनोऽपूर्वाया विलक्षणाया रूपमाधुर्यच्छटां दर्शयति । सर्वत्र प्रेमैव प्रेम, आनन्द एवानन्दोऽस्ति । समस्तं जगत् प्रेममयमानन्दमयं रसमयं श्रीकृष्णमयं वास्ति । सर्वमानन्देन सौन्दर्यमाधुर्याभ्यां च परिपूर्णमस्ति । दृश्यं द्रष्टा—सर्वमेव मधुरमस्ति । वयं त्वं सर्व एव मधुराः स्मः । तस्य परमानन्दरससुधामयस्य मधुराधिपतेरखिलमेव मधुरमस्ति । 'मधु वाता ऋतायते, मधु क्षरन्ति सिन्धवः, माध्वीर्नः सन्त्वोषधीः, मधुमत् पार्थिवं रजः' सर्वत्र मध्वेव मधु । एवं प्रेमिभक्तस्य दृष्टौ सर्वत्र प्रेममयो भगवानस्ति तथा भगवतो दृष्टौ भक्तः । भगवता कथितमेव—

**यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।**
**तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥**

( गीता ६ । ३० )

'यो मां सर्वत्र पश्यति तथा सर्वं मयि पश्यति, न कदाप्यहं तस्य नेत्राभ्यामदृश्यो भवामि, नापि च स मम दृग्भ्यामदृश्यो भवति ।'

अस्यामवस्थायां प्रेमी भक्तो यस्मिन्नित्ये महति दिव्ये प्रेमामृतरससागरे मग्नस्तिष्ठति स सर्वथानिवर्चनीयोऽस्ति । इदमेव प्रेमभक्तेः पराख्याया भक्तेर्वा स्वरूपमस्ति । अयमेव महान् भूमानन्दोऽस्ति । अनेनैव सर्वव्यापिना भूम्नानन्देन सह स्वल्पसुखस्य तारतम्यं दर्शयन्ती श्रुतिः कथयति—

**यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद् विजानाति स भूमा, यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद् विजानाति तदल्पं यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यम् ।**

( छान्दोग्य० ७ । २४ । १ )

'यत्रान्यन्न पश्यति, अन्यन्न शृणोति, अन्यन्न विजानाति, स एव भूमास्ति तथा यत्रान्यत् पश्यति, अन्यच्छृणोति, अन्यद् विजानाति, तदल्पमस्ति । यो भूमास्ति तदमृतमस्ति तथा यदल्पमस्ति तन्मरणशीलमस्ति ।' अस्मादेव हेतोः प्रेम सदा मधुरमविनाशि सनातनं सत्यं चास्ति ।

## गौणी त्रिधा गुणभेदादार्त्तादिभेदाद् वा ॥ ५६ ॥

**५६—गौणी भक्तिर्गुणभेदेनार्तादिभेदेन वा त्रिप्रकारा भवति ।**

पूर्वसूत्रपर्यन्तं तस्याः पराख्याया मुख्याया वा भक्तेर्विवेचनं जातम्, यत्र प्रेमी भक्तस्तया प्रेमभक्त्या स्वप्रियतमस्य भगवतः प्रेममयं

स्वरूपं प्राप्नोति। एषैव श्रीमद्भागवतेऽहैतुकी—निर्गुणा भक्तिस्तथा गीतायां ज्ञानिनो भक्तिः कथिता। अहैतुक्यां भक्त्यां भक्तस्य चित्तवृत्तेः कर्मगतेश्च प्रवाहोऽविच्छिन्नरूपेण स्वभावत एव भगवन्तं प्रति प्रवहमाणस्तिष्ठति। अयं भावः—तस्य चित्तं निरन्तरं निष्कामेनानन्यप्रेमभावेन भगवति संलग्नस्तिष्ठति तथा तस्य समस्ताः क्रियाः श्रीभगवदर्था एव भवन्ति। ( भागवतम् ३ । २९ । ११-१२ ) अपरंच गीतोक्तो दुर्लभस्तत्त्वज्ञानी महात्मापि सर्वं वासुदेवमेव पश्यति ( ७ । १९ ) । इमौ द्वौ तु भगवत्स्वरूपावेव स्तः। अधुनात्रीस्या भक्तेरपेक्षया निम्नश्रेणीगताया गौण्या भक्तेर्वर्णनं क्रियते। इयं गौणी भक्तिः सात्त्विकी राजसी तामसी चेति भेदैरथवाऽऽर्तो जिज्ञासुरर्थार्थी चेति भेदैस्त्रिप्रकारा भवति।

या भक्तिः पापनाशाभिप्रायेण सर्वकर्मफलानां भगवति समर्पणरूपतयाथवा यस्यां पूजनं कर्तव्यमिति बुद्ध्या भेददृष्ट्या पूजा क्रियते, सा सात्त्विक्यस्ति। ( श्रीमद्भा० ३ । २९ । १० )

या भक्तिर्विषयाणां यशस ऐश्वर्यस्य च कामनया भेददृष्टिपूर्वकं केवलप्रतिमादिपूजनरूपेणैव क्रियते, सा राजसी अस्ति।

या भक्तिः क्रोधेन हिंसया दम्भेन मात्सर्येण च प्रयुक्ता क्रियते सा तामस्यस्ति। ( श्रीमद्भा० ३ । २९ । ८ )

एवमेवार्तो जिज्ञासुरर्थार्थी चेति त्रिविधाः पुरुषास्त्रिविधोपासनया त्रिप्रकारां भक्तिमाचरन्ति। भक्तानां भावभेदेन गौण्या भक्तेस्त्रयो भेदा

भवन्तीत्यर्थः । गौण्या भक्तेः साधनेभ्यो यद्यपि साक्षाद् भगवत्प्राप्तिर्न भवति तथाप्यस्या गौणभक्तेः साधका अपि सुकृतिन एव भवन्ति तथा तेषामपि भगवत्कृपयास्या अनुष्ठानं कारं कारं पर्यवसाने भगवत्प्राप्तेर्मुख्यसाधनस्वरूपायाः साक्षाद् भगवत्स्वरूपायाः प्रेमभक्तेः प्राप्तिर्भवति । भगवतो भक्तेरिदमेव वैशिष्ट्यमस्ति यदस्याश्चरमं फलं दुर्लभभगवत्प्रेमप्राप्तिरेवास्ति । अतएव गौणी भक्तिरपि श्रेष्ठा पुण्यात्मपुरुषैरेवाचरणीया च मता । यतो भक्तिमात्र एव भगवतो भजनं भगवत आश्रयो भगवतो ध्यानं वा केनापि रूपेण तिष्ठति तथा भगवद्भजनस्य भगवदाश्रयस्य भगवतो ध्यानस्य च फलं साक्षाद् भगवत्प्राप्तिरेव भवति । अतएव केनापि प्रकारेण भवेद् भगवतो भक्तिर्मनुष्येणावश्यमेव कर्तव्या । परंतु यथासम्भवं सात्त्विकी भक्तिरथवा त्रिभुवनवैभवमप्यनर्थं भगवन्तमेव च परमार्थं परमं धनं मत्वा तस्यैव प्रेम्णः प्राप्तये यथार्थतोऽर्थार्थिभावेन निष्कामभक्तिः कर्तव्या ।

**उत्तरस्मादुत्तरस्मात्पूर्वपूर्वा श्रेयाय भवति ॥ ५७ ॥**

**५७—तासूत्तरोत्तरक्रमतः पूर्वपूर्वक्रमगता भक्तिः कल्याणकारिणी भवति ।**

तामस्यपेक्षया राजसी तथा राजस्यपेक्षया सात्त्विकी भक्तिरुत्तमास्ति । एवमेवार्थार्थिभक्तेरपेक्षया जिज्ञासुभक्तिस्तथा तदुभयापेक्षयार्तभक्तिरधिककल्याणकारिणी भवति ।

# भक्तेः सौलभ्यं महत्त्वं च

## अन्यस्मात् सौलभ्यं भक्तौ ॥ ५८ ॥

५८—अन्यसर्वापेक्षया भक्तिः सुलभास्ति ।

इतः प्राग् भक्तेर्महिम्नस्तथा कर्मयोगज्ञानाद्यपेक्षया तस्याः श्रेष्ठताया वर्णनं कृतम् । इदानीं सूत्रकार इदं प्रदर्शयति यत् सर्व-श्रेष्ठाया अपि भक्तेः प्राप्तिरन्यान्यफलापेक्षया सहजा सुकरा चास्ति । भक्तेः प्राप्तये न तु विद्याया आवश्यकतास्ति, न धनस्य न च श्रेष्ठकुलस्यैव । न तूच्चवर्णाश्रमस्यापेक्षास्ति, न वेदाध्ययनस्य । न कठोरतपसः प्रयोजनमस्ति, न विवेकस्य न च कठिनवैराग्यस्य । आवश्यकतास्ति केवलं सरलभावेन भगवतोऽपारकृपायां विश्वासं कृत्वा तस्य सततं प्रेमभावेन स्मरणस्य । ततः पुनरस्याः सौलभ्यं तु प्रत्यक्षमेव दृश्यमानं भवति । भगवत्कृपा सर्वोपरि सदा-सर्वदा वर्षति । मनुष्यस्तत्र विश्वासं न करोति, अतएव ततो वञ्चितस्तिष्ठति । भगवता तु गीतायां सडिण्डिम-घोषमुक्तं यद् 'अहं सर्वभूतानां सुहृदस्मि तथा यो मां सुहृदं जानाति स तत्क्षणे शान्तिं प्राप्नोति ।'

**सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ।**
(५।२९)

मनुष्यस्येदमुचितं यत्स भगवत्कृपायाँ विश्वासं कृत्वेदं मन्येत यदहं भगवत्कृपायाः समुद्रे निमज्जन्नस्मि । ममोपर्यध उभय-पार्श्वतो सर्वेषु स्थानेषु सर्वेषु कालेषु च भगवत्कृपा परिपूर्णास्ति । एवं मान्यतायां सत्यां तत्काल एव स तस्या भगवत्कृपायाः सामर्थ्येन त्वरितं पापतापाभ्यां मुक्तो भूत्वा भगवतो भक्तेरधिकारी [illegible] । भगवत्कृपायामेवं विश्वासं निश्चयं च कृत्वा भगवतोऽनन्य-

स्मरणस्याभ्यासं कस्यामप्यवस्थायां बालो वृद्धो युवा, स्त्री पुरुषो ब्राह्मणः शूद्रः कश्चिदपि कर्तुं शक्नोति। अत्र न किंचिदपि त्याज्यमस्ति न च ग्राह्यम्। सदा सर्वोपरि वर्षन्त्यामपि भगवत्कृपायामस्माकं मनसि यो विश्वासो नास्ति, नूनं तस्य विश्वासस्यैव स्थिरीकरणं कर्तव्यमस्ति। ततः पुनर्भक्तिप्राप्तेः सर्वाणि साधनानि स्वयमनायासेनैव सिद्धानि भविष्यन्ति—( तस्याहं सुलभः पार्थ—गी० ८। १४ ) भक्तिर्न केनाप्यन्येन साधनेन लभ्यते, इयं भजनेनैवोपलभ्यते।

## प्रमाणान्तरस्यानपेक्षत्वात् स्वयंप्रमाणत्वात्॥५९॥

**५९—यतो भक्तिः स्वयंप्रमाणरूपास्ति, अस्याः सिद्धौ प्रमाणान्तरस्यावश्यकता नास्ति।**

भक्तिमार्गे चलनशीलानां पुरुषाणां भक्तिसुखस्य प्रमाणं स्वयमेवोपलभ्यमानं भवति। तेषां स्वयमेवानुभवः सततं भवति। अत्र न कस्यचित् प्रमाणान्तरस्यावश्यकतास्ति। पतिसुखस्यानुभवो भार्यात्वे सत्येव प्राप्तुं शक्यते। अयमानन्दो न कुमार्याः कन्याया अनुभवविषयः। एवमेव भक्तिसुखस्यानुभवो भक्तानामेव भवति, नेदं सुखं वाणीद्वारा वर्णनमुखेन बोधनीयं भवति। ये पुण्यात्मानो महानुभावाः सर्वासां कामनानां त्यागं कृत्वैकमात्रभगवत्प्रेम्णः कामनयैव भगवत्कृपामाश्रित्य सदा सर्वदा प्रेमपूर्वकं पुलकिताङ्गा भूत्वा मनसा भगवतो भजनं कुर्वन्ति, त एव भक्तिसुखमनुभवन्ति।

## शान्तिरूपात्परमानन्दरूपाच्च ॥ ६० ॥



**६०—भक्तिः शान्तिरूपा परमानन्दरूपा चास्ति।**

शान्तिः परमानन्दश्च साक्षाद् भगवतः स्वरूपम्। स्वप्रेमरूपेण स्वयं भगवानेवावतीर्णो भवति, अत एवेदं भगवत्प्रेमापि शान्तिरूपं परमानन्दस्वरूपमेव चास्ति। आनन्दमयो भगवान् स्वयमेवात्मनो ह्लादिनी-नाम्नीमानन्दशक्तिं निमित्तीकृत्य प्रेमप्रेमिकरूपेण प्रकटीभवति तथा स्वयमेव प्रेमास्पदीभूय स्वानन्दस्य स्वयमेवोपभोगं करोति। इयमेव तस्यानन्दलीलास्ति। अत्रेदं बोध्यं यद् यस्य भगवतो भक्तिः प्रेम वा शान्तिरूपं परमानन्दस्वरूपं चास्ति स भगवान् निर्गुणवादिभिरङ्गीकृतं प्रकृतिसम्भवैः सत्त्वरजस्तमोरूपैस्त्रिभिर्गुणैर्युक्तं 'सगुणं ब्रह्म' नास्ति। भगवतो दिव्या तनुस्तस्यात्मन आनन्दांशरूपया स्वयोगमायया निमित्त-भूतया नित्यमेव प्रकटीकृतास्ति। अत एवात्मारामा मुनयो जीवन्मुक्ता महापुरुषा व्यासनारदशुकदेवजनकसनकादयो महात्मानस्तस्यैकैक-दिव्यगुणदिव्यभूषणदिव्यगन्धदिव्यमुरलीध्वनिदिव्यसौन्दर्योपरि मुग्धा भवन्ति। यदि भगवत्यस्या जगत्प्रसविन्या आवरणशीलाया मलिनाया मायाया एव गुणानां विकासो भवेदथवानयैव निर्मितं तदीयं शरीरं भवेत् तदा छिन्नमायाग्रन्थीनां ब्रह्मस्वरूपाणां महात्मनां तं प्रतीदमाकर्षणं कदापि न भवेत्। निर्गुणवादिनो यद् भगवत्स्वरूपं शुद्धं सच्चिदानन्दघनं ब्रह्म कथयन्ति तथा वेदा यन्नेति नेति कथयित्वा संकेतेन सम्बोधयितुमिच्छन्ति स एव मायातीतो विज्ञानघनः परमात्मा भक्तानां प्रियतमो भगवानस्ति। स शान्तेरानन्दस्य च समुद्रः— इति कथनेनापि तस्य यथार्थं वर्णनं न भवति। तस्य यत्प्रेमास्ति तदेव परमा शक्तिः परमानन्दस्वरूपं चास्ति। अस्यैव प्रेम्णो वर्णनं देवर्षि-र्नारदोऽस्मिन् सूत्रे करोति।

# भक्तेः साधनान्यन्तरायाश्च

**लोकहानौ चिन्ता न कार्या निवेदितात्मलोकवेदत्वात्* ॥ ६१ ॥**

६१—लोकहानिविषयिणी चिन्ता (भक्तेन) नैव करणीया; यतः स (भक्तः) स्वात्मानं लौकिकवैदिकानि (सर्वविधानि) कर्माणि च भगवते समर्पितवानस्ति ।

भक्तः सर्वाणि वस्तूनि भगवते समर्पितवानस्ति, अतस्तेषां विषये कीदृश्या अपि चिन्तायास्तस्यकृते कावश्यकतास्ति ? तेन तु केवलमेकस्य प्रियतमस्य भगवतश्चिन्तनस्यैव चिन्ता कर्तव्या । स्त्री पुत्रो धनं जनो मानादयः पदार्थास्तिष्ठेयुर्गच्छेयुर्वा तस्यैषां कृते कापि चिन्ता नास्ति; यतः स त्वेतान् पदार्थान् प्रागेव भगवते समर्प्य सर्वथाकिंचनः संजातोऽस्ति । अस्य पुनरेतेषां चिन्तायै समयस्तथा चिन्तनकारकं चित्तमपि कुत्र ? तस्य चित्तं त्वेकमात्रचिन्ताहरणचिन्तामणेश्चिन्तयैव चोरितम् । स चतुरचौरचूडामणिः कदापि तस्य चित्तं परावर्तयितुमिच्छत्येव न । चित्तस्याभावे पुनरसौ कस्याश्चिद्धानेश्चिन्तामेव कथं कुर्यात् ? अत एवास्य पथः पथिकेन लोकहानेः कापि चिन्ता नैव करणीया । तेन तु सर्वस्य सारभूतस्यार्थस्य श्रीभगवत एव चिन्तनं कर्तव्यं तथा भक्तस्य हृदय एतादृश एव भावो भवत्यपि ।

---

* पाठान्तरम्—'लोकभेदशीलत्वात्'

**न तदसिद्धौ* लोकव्यवहारो हेयः किंतु फल-त्यागस्तत्साधनं च कार्यमेव ॥ ६२ ॥**

**६२–( परंतु ) यावद् भक्तौ साकल्यं न लभ्यते तावल्लोक-व्यवहारस्य त्यागो न कर्तव्यः, किंतु फलं त्यक्त्वा (निष्काम-भावेन ) तस्या भक्तेः साधनं करणीयम् ।**

प्रेम्णः प्राप्तौ सत्यां लौकिकानि ( वैदिकानि च ) कर्माणि त्यक्तानि भवन्ति, बोधपूर्वकं तेषां स्वरूपतस्त्यागो नापद्यते । समर्पणस्यार्थस्तेषां मनसा समर्पणमेवास्ति । यदा पुनः प्रेम्ण उत्कृष्टा दशा प्राप्ता भवति, तदा भक्तस्य विधिनिषेधेभ्योऽतीततयेमानि सर्वाणि कर्माणि तं स्वत एव विधिबन्धनान्मुक्त्वा पृथग् भवन्ति । तस्याः स्थितेरयमेव नियमः, परंतु यो ज्ञानपूर्वकं प्रेमव्याजेन शास्त्रविधिं त्यजति, तस्य भक्तेः सिद्धिरनायासेन न भवति । अतः सूत्रकारः कथयति यल्लोकव्यवहारस्य त्यागं ज्ञात्वा-बुद्ध्वा मा कुरु । फलस्य कामनां त्यक्त्वा कर्म कुर्वंस्तिष्ठ । निष्कामकर्मकर्ता स्वयमेव लोकहानिचिन्तातो मुच्यते तथा तस्य तानि भगवत्प्रीत्यर्थं निष्कामभावेन कृतानि लौकिकानि कर्माणि भक्तिप्राप्तौ साधकानि सम्पद्यन्ते ।

**स्त्रीधननास्तिकवैरिचरित्रं† न श्रवणीयम् ॥ ६३ ॥**

---

* पाठान्तरम्–'तत्सिद्धौ' ।

† पाठान्तरम्–'स्त्रीधननास्तिकचरित्रम् ।'

## ६३–स्त्रीणां धनस्य नास्तिकानां वैरिणां च चरित्रं न श्रोतव्यम् ।

द्विषष्टितमे सूत्रे लोकव्यवहारस्य त्यागो न विधेय इत्याज्ञा प्रदत्ता, अत एव लोकव्यवहारस्तु कर्तव्यः, परंतु प्रेमपथपथिकैर्लोकव्यवहारेऽपि स्त्रीणां धनस्य नास्तिकानां शत्रूणां च चरित्रस्य श्रवणात्तु दूरे स्थातव्यमेव ।

( १ ) यस्य मनः स्त्रियाश्चिन्तने संलग्नं स भगवतश्चिन्तनं कथमपि न कर्तुं शक्नोति । स्त्रीचिन्तनेन कामस्योत्पत्तिर्भवति तथा कामः प्रेममार्गे सर्वतो महान् बाधकोऽस्ति । स्त्रीसम्बन्धिनीनां वार्तानां श्रवणेन पठनेन दर्शनेन चैव स्त्रीचिन्तनं भवति । अतः साधकस्येद-मुचितं यत्स स्त्रीविषयकं वार्तालापं न कुर्यात्, स्त्रीसम्बन्धिनीं वार्तां गानं वा न शृणुयात्, स्त्रीसम्बन्धि चित्रं न पश्येत्, स्त्रीविषयकं पुस्तकं साहित्यं वा न पठेत् , ईदृशं नाटकं चलचित्रादिकं च नावलोकयेत्, स्त्रीचरितविषये किंचिदप्यालोचनं न कुर्यात्, स्त्रीणां सम्बन्धे निबन्धादि न लिखेत्, स्त्रीणां मध्ये न तिष्ठेत् तथा स्त्रीभिः सहानावश्यकं न संगच्छेत । ये साधका गृहस्थाः स्युस्तैरात्मनो विवाहितां पत्नीं विहाय यथासम्भव-मन्यासां स्त्रीणां सम्पर्कात् स्वात्मा रक्षणीयः । स्त्रीसम्बन्धिन्यां चर्चायां प्रवृत्तिस्तस्या श्रवणमथवा स्त्रीणां चित्रादिदर्शनं तु सर्वेषामेव हानिकारक-मस्ति । श्रीमद्भागवते तु कथितम्—

**न तथास्य भवेन्मोहो बन्धश्चान्यप्रसङ्गतः ।**
**योषित्सङ्गाद् यथा पुंसो यथा तत्सङ्गिसङ्गतः ॥**

( ३ । ३१ । ३५ )

'स्त्रीणां तथा स्त्रीसङ्गिनां सङ्गान्मनुष्यस्य यथा मोहो वन्धनं च प्राप्ते भवतस्तथा नान्येषां केषामपि सङ्गात् ।'

अग्रे पञ्चमस्कन्धे स्त्रीसक्तानां पुरुषाणां संगतिर्नरकद्वार-तया प्रतिपादिता। यथा पुरुषैः स्त्रीणां सङ्गस्त्याज्य एवमेव स्त्रीभिरपि पुरुषाणां सङ्गः सर्वथा त्याज्यः ।

( २ ) धनस्य चिन्तनाल्लोभ उत्पद्यते । यस्मिन् क्षणे चित्ते धनस्य लोभो जाग्रदभूत्, तस्मिन्नेव क्षणे न्यायान्यायबुद्धिर्विलुप्यते तथा मनुष्यः सत्पथं त्यक्त्वान्यायमार्गे प्रवर्तते; अत एव धनस्य चर्चां तथा धनिकानां भोगपरां गर्वपूर्णां च वार्तां न शृणुयान्न पश्येत् ।

( ३ ) येषामीश्वरे शास्त्रेषु च विश्वासो नास्ति त एव नास्तिकाः सन्ति । ईश्वरास्तित्वं नाङ्गीकुर्वद्भिर्नास्तिकैस्तुल्या जगतो जीवानां शत्रवो विरला एव सन्ति । 'अत्र किं सारम्? तत्र किमस्ति? ईश्वरः प्रतारणामात्रम्, केनेश्वरो दृष्टः? आत्मा तु कल्पितवस्तुमात्रमस्ति ।'—ईदृशीं वार्तां वदतां तथेश्वरं शास्त्राणि च निन्दतां कुतार्किकाणां सङ्गेन तेषां चरित्रश्रवणेन चेश्वरेऽश्रद्धोत्पद्यते तथेश्वरेऽश्रद्धया समं पतनस्य साधनमन्यत् किमपि नास्ति । अत एव नास्तिकेभ्यः सदा दूरे स्थातव्यम् ।

( ४ ) वस्तुतो भक्तस्य मनसि ( दृष्टौ वा ) तस्य कोऽपि शत्रुर्नास्ति । यः सर्वस्मिञ्जगति स्वप्राणारामं परमात्मानं व्याप्तं पश्यति, यो जगच्छ्रीकृष्णमयमवलोकयति, स कथं कं स्ववैरिणं मन्तुं शक्नोति? देवदेवेन श्रीमहादेवेन कथितम्—

गतकाममदक्रोधा ये रामाङ्घ्रिरता उमे।
पश्यन्तीष्टमयं विश्वं विरुन्ध्युः केन ते सह ॥*

परंतु यावद् भक्तेः सिद्धिर्न भवेत्तावत् साधकेनेदृशी भावना कर्तव्या तथा मनस्येवं निश्चयः करणीयो यत्सर्वं मम प्रभोरेव स्वरूपमस्ति। एतादृश्यामवस्थायां यदि कोऽप्यन्यो मनुष्यो भ्रमवशात्साधकं प्रति द्वेषं वैरं वा पुष्णीयात् तदा तस्य ता वैरसम्बन्धिनीर्वार्ता यथासम्भवं स साधकः शृणुयादेव न। यतस्तासां श्रवणेन क्रोधोत्पत्तेः सम्भावना तिष्ठति। अतएव स्वतस्तु स्वमविजितं मनो विहायान्यं कमपि शत्रुं मन्येतैव न; तथापरः कश्चिच्छत्रुतां पुष्णीयाच्चेत्तदा तदुपर्यपि विचारं न कुर्यात्।

स्त्रीचिन्तनेन कामो धनचिन्तनेन लोभो नास्तिकानां चिन्तनेनेश्वरेऽविश्वासो वैरिणां चिन्तनेन च क्रोधः संजायते। अत एवैषां चतुर्णां चरित्रं यथासम्भवं श्रोतव्यमेव न।

## अभिमानदम्भादिकं त्याज्यम् ॥ ६४ ॥

## ६४—अभिमानदम्भादेश्च त्यागः कर्तव्यः।

इतः पूर्वस्मिन् सूत्रे स्त्रीधननास्तिकवैरिचरित्रं न श्रोतव्यमित्यादेशो दत्तः। परंतु तथा कृत्वेदं न मन्तव्यं यदहं कामिनीकाञ्चनयोस्त्यागी संवृत्तः, अहं परम आस्तिकोऽस्मि, अहमजातशत्रुरस्मीति। अभिमानं सर्वथा पतनस्य हेतुरस्ति। सम्पत्तिसंततिशक्तिनैरुज्यविद्याबुद्धिकुल-

* उमा जे राम चरन रत बिगत काम मद क्रोध।
निज प्रभुमय देखहिं जगत केहि सन करहिं बिरोध ॥

वर्णाश्रमाचाररूपपदपुरुषार्थादीनां केषांचिदपि वस्तूनामभिमानो नोचितः । यत्किंचिदपि सद्वस्तु सद्गुणो वा प्राप्येताथवा साधनं सम्यक्तया प्रचलेत्तदा तत्र भगवतः कृपैव कारणत्वेन मन्तव्या । अभिमानान्महती हानिर्भवति । अतएवाभिमानः सर्वथा त्याज्यः । न केवलं वस्तुना मेवापितु निरभिमानिताभिमानोऽपि परिवर्जनीयः । अभिमाननाशस्योत्तम उपायो दैन्यं विनयो नम्रता च । नमनलक्षणया भक्त्याप्यभिमानस्य नाशो भवति । एवमेव दम्भस्यापि त्यागः कर्तव्यः । आत्मनि ये गुणा न भवेयुर्धनमानयोर्लोभेन स्वभावदोषेण वा तेषां गुणानां प्रदर्शनाय प्रयतनं बाह्यतः स्वं धर्मात्मानं भक्तं त्यागिनं च साधयितुमसत्प्रयासो 'दम्भः' कथ्यते । दाम्भिकपुरुषस्य साधन-पथो भृशमवरुद्धो भवति । स उपरितः स्वस्य कपटवेषस्य संरक्षण एवात्मनः समस्तां विद्यां बुद्धिं क्रियाकुशलतां च समापयति । निरभि-मानता सरलता चेत्युभे भक्तिसाधनविधौ परमसहायिके स्तस्तथाभिमानो दम्भश्च महाबाधकौ स्तः । एतौ द्वावासुर्याः सम्पत्तेर्दुर्गुणौ स्तः, एताभ्यां सह 'आदि'शब्दं योजयित्वा सूत्रकारेणासुरसम्पत्तेः* अन्यान्यदुर्गुणान्

---

* श्रीमद्भगवद्गीतायाः षोडशेऽध्याये सप्तमश्लोकादारभ्य विंश-श्लोकपर्यन्तं श्रीभगवतासुरसम्पत्तेर्यद् वर्णनं कृतं तस्य भावार्थ एवमस्ति—

आसुरा मनुष्या धर्माधर्मविषयिणीं प्रवृत्तिं निवृत्तिं च न जानन्ति, अतस्तेषु न शौचमस्ति, नाचारोऽस्ति, न च सत्यमेव तिष्ठति । ते आसुरा मनुष्याः कथयन्ति—यज्जगदसत्यमप्रतिष्ठं ( धर्माधर्मव्यवस्थारहितम् ) ईश्वररहित-मन्योन्यसम्भूतं चास्ति, स्त्रीपुरुषमिथुनजनितमस्तीत्यर्थः । अस्य जगतो नान्यत् किमपि कारणमस्ति, इदं केवलं स्त्रीपुरुषयोः कामजनितसंयोगादेवो-

प्रति संकेतः कृतः । अतएव सर्वेषामासुरदुर्गुणानां त्यागः करणीयः ।

## तदर्पिताखिलाचारः सन् कामक्रोधाभिमानादिकं तस्मिन्नेव करणीयम् ॥ ६५ ॥

---

कर्माणोऽहितकारिणश्च भूत्वा जगतो विनाशायैव जायन्ते । ते दुष्पूराः ( केनापि प्रकारेणापूरणीयाः ) कामना आश्रित्य दम्भाभिमानमदवशीभूता मोहाद् असद्ग्रहान् ( अनेन कपटप्रबन्धेनामुको मनोरथो पूर्णो भविष्यतीतीदृशीं वेदशास्त्रविरुद्धां दुराशां ) स्वीकृत्याशुचिव्रतानि ( मद्यमांसादिना तथा चौर्येणासत्येन कपटादिना सम्पादितानि नरकाद्युत्पादकानि कुव्रतानि ) परिगृह्य शास्त्रविरुद्धेषु कर्मसु—पापकर्मसु प्रवृत्ता भवन्ति। अन्तिमश्वासपर्यन्तमपारविषयचिन्ताभिरावृतास्ते 'कामोपभोग एव परमः पुरुषार्थः' इत्येवंरूपं स्थिरनिश्चयं कृत्वाऽऽशापाशशतैर्बद्धाः कामक्रोधपरायणा भूत्वा कामोपभोगार्थमन्यायेन ( चौर्येण विश्वासघातादिना) धनसंचयमीहन्ते। अद्य मयेदं प्राप्तम्, अयं मनोरथोऽपि पूर्णो भविष्यति, इदं धनं ममास्ति, पुनस्तद्धनमपि प्राप्तं भविष्यति । मयामुकः शत्रुर्हतः, अधुना तान् शत्रूनपि हनिष्यामि । अहमीश्वरः ( इव सर्वशक्तिमान् ) अस्मि, अहं भोगी, अहं सिद्धोऽहं बलवानहं सुखी, अहमाढ्योऽहमभिजनवानस्मि, कोऽन्यो मया सदृशोऽस्ति । अहं यज्ञं करिष्यामि, अहं ( नामख्यापनार्थं यशसे स्वार्थाय वा ) दानं करिष्यामि, अहं मोदिष्ये—इत्येवंरूपेणाज्ञानेन मोहितास्ते विविधविषयाणां चिन्तने संलग्ना विभ्रान्तचित्ता मोहजालसमावृताः कामभोगासक्ता भूत्वा महाक्लेशदायकेष्वपवित्रेषु नरकेषु पतन्ति । तेऽभिमानिनः स्वयमात्मानं श्रेष्ठं मन्यन्ते (स्वात्मनि पूज्यबुद्धिं दधति), स्तब्धास्तिष्ठन्ति, धनमानमदैर्मत्तास्ते केवलं दम्भपूर्वकं लोकानां समक्षे स्वीयधर्मात्मतां ख्यापयितुं ( न त्वीश्वरप्रीत्यर्थं श्रद्धाविश्वासपूर्वकम् ) अविधिपूर्वकं नाममात्रैर्यज्ञैर्यजन्ति । अहंकारं बलं दर्पं कामं

६५—निखिलेष्वाचारेषु भगवत्यर्पितेषु सत्सु यदि काम-क्रोधाभिमानादयः स्युस्तदा तानपि तं ( भगवन्तम् ) प्रत्येव कुर्यात् ।

यदा सर्वं भगवते समर्पितं तदा पुनः कामक्रोधादयोऽन्यस्मै कस्मै समर्प्येरन् ? प्रियतमो भगवान् यथाऽऽत्मनः प्रेमिभक्तस्य प्रेम्णो भाजनमस्ति, तथैव तस्य कामक्रोधादीनां पात्रमपि स एवास्ति । अन्यस्तु कश्चित्तस्य मनस्यस्त्येव न तदैषां पात्रमपरः कः स्यात् ? अस्य कथनस्येदं तात्पर्यं नास्ति यद् भगवतः प्रेमिभक्तेऽपि विषयिपुरुषेष्विवैव कामक्रोधाभिमानास्तिष्ठन्ति । आसुरसम्पत्तेर्दुर्गुणस्व-रूपाणां कामक्रोधाभिमानादिकानां त्यागस्तु प्रागेवोक्तः । प्रेमिभक्तेषु महात्मसु पुनरयं दूषितः कामः क्वास्ति । तेषु विषयासक्तिर्हिंसा द्वेषः क्रोधश्च कुत्र सन्ति ? तेष्वमानिषु मानस्य गन्धोऽपि क्व ? एषां तु तेषु बीजमपि नास्ति । आत्मनः सुखस्य यदा क्वापि वासनैव नास्ति, तदेमे दोषाः कुत आगच्छेयुः ? तेषां भक्तानां जीवनोद्देश्यं त्वेकमात्रं प्रियतमस्य सुखित्वसम्पादनमेवास्ति—'कृष्णसुखैकतात्पर्यो

---

क्रोधं च संश्रितास्ते स्वात्मपरदेहेषु ( आत्मरूपेण ) स्थितं मां ( भगवन्तम् ) द्विषन्ति तथा सत्यमार्गे विचरत्सु साधुषु दोषारोपणं कुर्वन्ति । अहं तान् मां द्विषतः क्रूरान् नराधमान् पापिनश्च मनुष्यान् संसारे भूयोभूय आसुरीषु योनिष्वेव क्षिपामि । हे अर्जुन ! ते मूढाः पुरुषा एवं जन्मनि जन्मनि बारंवारमासुरीं योनिमापन्ना मां ( भगवन्तम् ) अप्राप्य ( मम प्राप्तिस्तु दूरे तिष्ठतु, मत्प्राप्तियोग्यताश्रयं मनुष्यशरीरमपि न प्राप्य ) अतोऽप्यधमां योनिं प्राप्नुवन्ति ।

गोपीभाववर्षः ।' तेषां चित्ते जगतः संस्कार एव नास्ति; ते तु लज्जां घृणां कुलं शीलं मानं देहं गेहं भोगं मोक्षं च सर्वं विस्मृत्य केवले स्वप्रियतमे भगवत्येव कृतात्मनिर्मञ्छनाः सन्ति । अत एव यथेमे भक्ताः स्वयं दिव्यभावसम्पन्ना भवन्ति, तथैवैषां कामक्रोधाभिमाना अपि दिव्या भवन्ति । अस्मादेव हेतोः परमविरागिभिर्जीवन्मुक्तैर्मुनिभिरेतादृशानां भगवद्रङ्गरङ्गिणां प्रेमिणामीदृशीनां लीलानां गाने श्रवणे च स्वात्मा कृतार्थो मतः । येषां चित्तं सर्वतो विरतमस्ति, एको भगवानेव येषां कामनाया विषयः स्थितस्ते भक्ता आत्मनस्तस्य भगवतो दर्शनस्य कामनाया वेगेन पीडिता रोदं रोदमुल्लापयन्ति—

**हे देव हे दयित हे भुवनैकबन्धो**
**हे कृष्ण हे चपल हे करुणैकसिन्धो ।**
**हे नाथ हे रमण हे नयनाभिराम**
**हा हा कदा नु भवितासि पदं दृशोर्मे ॥**

( श्रीकृष्णकर्णामृते )

'हे देव ! हे प्रियतम ! हे विश्वस्यैकमात्रबन्धो ! हे अस्माकं मनसां बलादात्मानं प्रत्याकर्षणशील ! हे चपल ! हे करुणैकसिन्धो ! हे नाथ ! हे रमण ! हे नयनाभिराम ! हा ! हाहा !! त्वं कदास्माकं दृग्गोचरो भविष्यसि ।'

श्रीकृष्णगतप्राणा श्रीरुक्मिणी कथयति—

**श्रुत्वा गुणान् भुवनसुन्दर शृण्वतां ते**
**निर्विश्य कर्णविवरैर्हरतोऽङ्गतापम् ।**

रूपं दृशां दृशिमतामखिलार्थलाभं
त्वय्यच्युताविशति चित्तमपत्रपं मे ॥
का त्वा मुकुन्द महती कुलशीलरूप-
विद्यावयोद्रविणधामभिरात्मतुल्यम् ।
धीरा पतिं कुलवती न वृणीत कन्या
काले नृसिंह नरलोकमनोऽभिरामम् ॥
यस्याङ्घ्रिपङ्कजरजःस्नपनं महान्तो
वाञ्छन्त्युमापतिरिवात्मतमोऽपहत्यै ।
यर्ह्यम्बुजाक्ष न लभेय भवत्प्रसादं
जह्यामसून् व्रतकृशाञ्छतजन्मभिः स्यात् ॥
( श्रीमद्भाग० १० । ५२ । ३७-३८, ४३ )

'हे अच्युत ! हे त्रिभुवनसुन्दर ! ये कर्णद्वारेण हृदये प्रविश्य श्रृण्वतामङ्गतापं हरन्ति तेषां भवतो दिव्यगुणानां यन्नेत्रधारिणां दृष्टेः सर्वतः परमो लाभोऽस्ति तस्य भवतो दिव्यरूपस्य च प्रशंसां श्रुत्वा मम चित्तं सर्वां लोकलज्जां विहाय भवत्यत्यन्तमासक्तं संजातम्। हे मुकुन्द ! कुलशीलरूपविद्यावयोधनप्रभावैर्भवता सदृशो भवानेवास्ति। हे पुरुषोत्तम ! भवान्नरलोकमनोमोहनोऽस्ति । हे पुरुषसिंह ! विवाहकाले ( भवता सह संगमावसरे ) समुपस्थित ईदृशी का ( प्रेमिभक्तरूपा ) कुलवती गुणवती बुद्धिमती च कन्यास्ति या भवन्तं पतिरूपेणाप्तुमिच्छां न करिष्यति । हे कमललोचन ! उमापति-सदृशो महान् देवः स्वहृदयस्य तमसो दूरीकरणाय भवतो यस्यां चरणधूलौ स्नानं कर्तुं प्रार्थयमानस्तिष्ठति, सा ते चरणधूलि-

यदि प्रसादरूपेण मया नैव प्राप्ता भविष्यति तदेदं निश्चितं विद्धि यदहं व्रतादिद्वारा शरीरं शोषयित्वैतान् व्याकुलान् प्राणांस्त्यक्ष्यामि तथैवं कारं कारं कदापि शतजन्मभिस्तु भवतः प्रसादो मया प्राप्तो भविष्यत्येव ।

भगवतः श्रीकृष्णस्य पट्टमहिष्यो द्रौपदीं कथयन्ति—

**न वयं साध्वि साम्राज्यं स्वाराज्यं भौज्यमप्युत ।**
**वैराज्यं पारमेष्ठ्यं च आनन्त्यं वा हरेः पदम् ॥**
**कामयामह एतस्य श्रीमत्पादरजः श्रियः ।**
**कुचकुङ्कुमगन्धाढ्यं मूर्ध्ना वोढुं गदाभृतः ॥**
(१० । ८३ । ४१-४२)

'हे साध्वि ! अस्माकं मनसि पृथिव्याः साम्राज्यस्य, सुरेन्द्रराज्यस्याथवानयोर्द्वयोर्भोगस्याणिमाद्यैश्वर्यस्य ब्रह्मपदस्य मोक्षस्य वैकुण्ठस्य वेच्छा नास्ति । वयं तु केवलमेतदेवेच्छामो यद् भगवतः श्रीकृष्णस्य कमलाकुचकुङ्कुमसुगन्धाढ्यं पादरज एव सदा स्वमूर्धसु धारयेम ।' मुक्तिस्त्वीदृशानां भक्तानां चरणोपरि लुठन्ती तिष्ठति—

**यदि भवति मुकुन्दे भक्तिरानन्दसान्द्रा**
**विलुठति चरणाग्रे मोक्षसाम्राज्यलक्ष्मीः ॥**

'यस्य श्रीमुकुन्दचरणयोः परमानन्दरूपा भक्तिर्भवति, मोक्षसाम्राज्यश्रीस्तस्य चरणयोर्लुठति ।'

आदर्शप्रेममय्यो भक्तशिरोमणयो गोप्यः प्रियतमे भगवति नेत्राभ्यामदर्शने जाते विलपन्त्यः कथयन्ति—

विरचिताभयं वृष्णिधुर्य ते चरणमीयुषां संसृतेर्भयात् ।
करसरोरुहं कान्त कामदं शिरसि धेहि नः श्रीकरग्रहम् ॥
व्रजजनार्तिहन् वीर योषितां निजजनस्मयध्वंसनस्मित ।
भज सखे भवत्किंकरीः स्म नो जलरुहाननं चारु दर्शय ॥
प्रणतकामदं पद्मजार्चितं
धरणिमण्डनं ध्येयमापदि ।
चरणपङ्कजं शंतमं च ते
रमण नः स्तनेष्वर्पयाधिहन् ॥

(श्रीमद्भाग० १० । ३१ । ५-६, १३)

'हे यदुकुलशिरोमणे ! ये लोकाः संसृतेर्भयात् तव चरणौ शरणीकुर्वन्ति, तव करसरोरुहद्वयं तेभ्योऽभयं दत्त्वा तेषां मनोरथं पूरयति । हे प्रियतम ! स्वस्य तावेव करकमलौ याभ्यां त्वया लक्ष्म्याः करो गृहीतोऽस्माकं शिरसि निधेहि । हे व्रजजनार्तिहन् ! वीर ! तव मन्दमधुरस्मितं भक्तगर्वहरणशीलमस्ति । हे सखे ! वयं तव किंकर्यः स्मः कृपयास्मान् स्वीकुरुष्व तथा स्वीयं सुन्दरं मुखारविन्दं नो दर्शय । हे रमण ! हे आर्तिनाशन ! तव चरणपङ्कजयुगलं प्रणतजनानां कामपूरकमस्ति, श्रीलक्ष्म्या सदा सेवितमस्ति, पृथिव्या आभूषणमस्ति, विपत्तिकाले ध्यातं सत्कल्याणकारकमस्ति; हे प्रियतम ! तत् परमकल्याणमयं सुशीतलं चरणारविन्दद्वयमस्माकं तप्तहृदयेषु स्थापय ।'

एवं प्रेमिभक्ताः श्रीकृष्णकामनया पीडिताः सदा तदर्थमेव रुदन्ति तमाह्वयन्ति च । किं च दृकपिधानलीलां तन्वानो लीला-

विहारी भगवान् यदा तेषां प्रेमाह्वानं श्रुत्वा त्रिभुवनकमनीयं योगिजन-दुर्लभं देवदेवप्रत्याशितमृषिमहर्षिमहापुरुषचित्ताकर्षणशीलं निखिल-सौन्दर्यमाधुर्यरसामृतसारभूतमानन्दकन्दं मदनमोहनं मन्मथमन्मथरूप-मादाय मन्दं मन्दं स्मयंस्तथा मुरल्यामात्मनो दिव्यं मोहनं स्वरं पूरयन् सहसा प्रकटीभूय स्वकीयप्रेमानन्दरसमाधुरीं चतुर्दिक्षु विकिरति, यदाऽऽत्मनः सौन्दर्यमाधुर्यसुधासुशीतलस्य वदनविधोः शुभ्रां ज्योत्स्नां समन्ततः प्रसारयति तदा तत्र तेषां भाग्यवतां दिव्यचक्षुषां दिव्य-भावापन्नानां भक्तमहात्मनां चेतसां कावस्था भवतीति वर्णयितुं शक्तिः कस्मिन्नपि नास्ति । इदमनिर्वचनीयं रहस्यमस्ति ।

तस्मिन् समये भक्तस्यात्मनः सर्वस्वं तस्य चरणयोः स्वयमेव निर्मञ्छितं भवति तथा स आनन्दोल्लासेन मत्तो भूत्वा सर्वस्य जगतश्चिन्तां विहायोल्लापयति—

**गृहं जह्यां वनं जह्यां नागरं नगरं जह्यां**
**वंशीवटतटं जह्यां कस्मादपि न लज्जिष्ये ।**
**देहं गेहं जह्यां किंतु स्नेहं वद कथं जह्या-**
**मद्य प्रियहेतोः सर्वामेव सज्जां सज्जिष्ये ॥**
**वातुलोऽभूदेष लोको वातुलां वदति मां तु**
**'वातुला'कथनतोऽहं कमपि न वर्जिष्ये ।**
**वक्तारं श्रोतारं जह्यां तातं भ्रातरं च जह्यां**
**मातरं च दैव ! कृष्णं नाहं परिहरिष्ये ॥ ***

* घर तजौं, बन तजौं, नागर नगर तजौं,
बंसी बट तट तजौं, काहू पै न लजिहौं ।
देह तजौं, गेह तजौं, नेह कहो कैसे तजौं,
आज राज काज सब ऐसे साज सजिहौं ॥

जीवनं मरणं च त्वदर्थमेव भविष्यति तथा तवैव चरणयोर्भविष्यति। मम हृदयस्यैषैवैका कामनास्ति। यदा सर्वं निर्मञ्छितमभूत् तदा पुनर्मरणानन्तरं शरीरस्येमानि पञ्चभूतानि पृथक् पृथग् भूत्वापि तवैव सेवां करिष्यन्ति।

क्वचिदिमानि पञ्च भूतानि यदा मां विहाय पृथग् भवेयुस्तदा प्रियतमस्य सेवातो विरता न भवेयुरित्येतदर्थमेव भक्तो विह्वलचित्तेन विधातारं प्रार्थयते—

पञ्चत्वं तनुरेतु भूतनिवहाः स्वांशे विशन्तु स्फुटं
धातारं प्रणिपत्य हन्त शिरसा तत्रापि याचे वरम्।
तद्वापीषु पयस्तदीयमुकुरे ज्योतिस्तदीयाङ्गन-
व्योम्नि व्योम तदीयवर्त्मनि धरा तत्तालवृन्तेऽनिलः॥

अस्यैव श्लोकस्यानुवादं कुर्वतैकेन हिंदीकविना कथितम्—

विभेमि मृत्योर्न विधिं तु याचे
भूतानि मे पञ्च प्रिये वसेयुः।
भा दर्पणे क्ष्मा पथि चाम्बु वाप्यां
तस्यानिलः खं व्यजनेऽङ्गनाभ्रे॥*

पञ्च तत्त्वानि तु पृथक् पृथग् भविष्यन्त्येव, हे प्रभो! त्वमेतावत् कुरुष्व यज्जलस्य भागस्तस्मिन् कूपे गत्वा मिलितो भवेद् यस्य जलं

---

बावरौ भयौ है लोक, बावरी कहत मोकौं,
बावरी कहे ते मैं काहू ना बरजिहौं।
कहैया-सुनैया तजौं, बाप और भैया तजौं,
दैया तजौं मैया, पै कन्हैया नाहिं तजिहौं॥

* मरिबे डरौं न विधिहि बस, पंचभूत करि बास।
पी वापी, मारग, मुकुर, बीजन, अँगन, अकास॥

मम प्रियतमः स्नाने पाने च व्यवहरेत्; अग्नितत्त्वं तस्मिन् दर्पणे संयुज्येत यत्र प्रियतमः स्वमुखं पश्येत्, पृथ्वीतत्त्वं तस्मिन् मार्गे मिलितं स्याद् येन प्रियतमो गच्छेदागच्छेच्च, वायुतत्त्वं तस्मिन् भाग्यवति तालवृन्ते संयुज्येत येन प्रियतमः स्वात्मानं वीजयेत् तथाऽऽकाशतत्त्वं गत्वा तस्य प्राङ्गणस्य नभसि मिलेद् यत्र प्रियतम उपविशेत् ।

तथा जीवः ? स तु प्रभोश्चरणाभ्यां कदापि पृथग् भवितुमेव न शक्नोति । तं तु स स्वकीये हृदय एव गुप्तं रक्षिष्यति । इदमस्ति भक्तानां कामस्यैकं लघुचित्रम् । अधुना तेषां क्रोधो दृश्यताम् ।

एकदा श्रीकृष्णस्य केनापि रोषजनकेन कार्येण श्रीराधा रुष्टा-भूत्, सखी तस्याः प्रबोधनमारेभे; तदा सा क्रुद्धा भूत्वावदत्—'सखि ! त्वं तदीयं नामापि मत्समक्षे मा गृहाण । तस्य तु वार्तैव का, अहं कृष्णवर्णस्य वस्तुमात्रस्य त्यागं करिष्यामि । आजीवनं तदीयविरहतापेन दग्धा स्थास्यामि, किंतु तेन सह संगता न भविष्यामि ।

**अथ तेन मिलिष्यामि भ्रान्त्याप्याजीवनं नहि ।**
**सहिष्ये विरहोत्तापं कामं दह्यै तदर्चिषा ॥**
**चेतसा निश्चितं ह्येतत् पिबाम्यम्बु न तत्पथि ।**
**न दृशोरञ्जनं नाङ्गे कस्तूरीं कर्हिचिद् दधे ॥**
**नाकर्णयामि कर्णाभ्यां रवं कोकिलभृङ्गयोः ।**
**न च स्प्रक्ष्यामि पाणिभ्यां नीलं वापि सरोरुहम् ॥***

* मिलौं न तिन सौं भूल, अब जौलौं जीवन जियौं ।
सहौं बिरह कौ सूल, बरु ताकी ज्वाला जरौं ॥
मैं अब अपने मन यह ठानी । उन के पंथ पिऊँ नहिं पानी ॥
कबहूँ नैन न अंजन लाऊँ । मृगमदभूलि न अंग चढ़ाऊँ ॥
सुनौं न स्रवननि अलि पिक बानी । नील जलज परसौं नहिं पानी ॥

किंचिदवधाय दृश्यतामस्मिन् रोषे कियांस्तोषः परिपूर्णोऽस्ति ।

एकदा लीलामयः प्रभुर्भक्तानां सखीनां प्रणयकोपस्यानन्दमास्वादयितुं क्रीडायामव्यवस्थां कृत्वा सखीन् कोपयामास । ततः सखिभिर्मिलित्वा निश्चयः कृतो यदेष उपद्रवकारी धृष्टः क्रीडातः पृथक् क्रियताम् । श्यामसुन्दरस्य वियोगं तु क्षणमपि सोढुं तेष्वेकोऽपि समुद्यतो नासीद् यतस्तस्मिन् पृथक्कृते तत्कालमेव तेषां प्राणाः पृथग् भवन्ति; परंतूपरितो रोषं प्रदर्श्योचुः—'कृष्ण ! त्वं स्वयमेवाव्यवस्थामुत्पादयसि तथा पुनर्दृप्तो भूत्वा रुष्यसि; अपसरातः, न वयं त्वाऽऽत्मनां सह क्रीडितुमवसरं दास्यामः ।' अलम् । यदा भर्त्सना प्राप्ता तदैव प्राणधनं श्यामसुन्दरो नम्रो जातः । आरब्धं तेन पादयोः पतनं सशपथं क्षमाप्रार्थनं च । सूरदासमहाभागेन गीतमस्ति—

**क्रीडायां कस्य कः स्वामी वद त्वं नन्दनन्दन ।**
**श्रीदामा त्वां हरेऽजैषीद् बलात् किं तनुषे रुषम् ॥**
**नास्मभ्यं तेऽधिका जातिश्छायायामुषिता न ते ।**
**यस्मात्तवाधिका गावोऽधिकारं ज्ञपयस्यतः ॥**
**रुष्टः स्यात्तेन कः क्रीडेद् हा ! हा ! पतति पादयोः ।**
**पणं क्रीडेच्छुकः स्वामी सनन्दशपथं ददौ ॥***

---

* खेलन में को काको गुसैयाँ ।
हरि हारे, जीते श्रीदामा, बरबस ही कत करत रुसैयाँ ॥
जाति-पाँति हमते बड़ नाहीं, ना हम बसत तुम्हारी छैयाँ ।
अति अधिकार जनावत ताते, जाते अधिक तुम्हारे गैयाँ ॥
रूठ करै, ता सँग को खेलै, हा हा खात, परत तब पैयाँ ।
'सूरदास' प्रभु खेल्यौ ही चाहैं दाँव दियौ करि नंद दुहैयाँ ॥

अयमस्ति तेषां क्रोधः । अथावशिष्टा मानस्य वार्ता, तत्र दूषण-रहितो मानस्त्वस्याः प्रेमभक्तेरेकं भूषणमेवास्ति । एकदा श्रीराधा राज्ञी रुष्टा जाता, मानं कृतवती सखीरुक्तवती च--

नायातुं शक्नुयादत्र नन्दलाल्यः सखि क्वचित् ।
नान्तर्वेशं प्रदेह्यस्मै कियद् वापि विलोभयेत् ॥
ईदृशानां प्रतीतिः का सच्छलं ब्रुवते वचः ।
विहायैकं स मद्गेहं काममन्यत्र गच्छतु ॥*

भगवांस्तां प्रसादयितुं चेष्टां कारं कारं श्रान्तो जातस्तथान्ते प्रोवाच--

एतावांस्तु श्रमो नाभूत्तदानीमपि राधिके ।
यावान् मह्यं श्रमो दत्तो मानेनानेन ते शृणु ॥
धरां धृत्वा विधिर्वेदाश्चोद्धृता निहतो मधुः ।
विप्रो भूपः कृतो दुःखं दुस्सहं दलितं यदा ॥
आहृतं च बले राज्यं भग्नं शैवं धनुर्महत् ।
स्वयंवरः कृतः सिद्धो रावणोऽप्यजितो जितः ॥
हत्वा वत्सवकाघाश्ववृषान् पीतो दवानलः ।
धृतं नारीवपुर्मोहे मज्जिता असुराः सुराः ॥

---

* सखि नँदलाल न आवन पावैं ।
भीतर चरन धरन जिन दीजौ, चाहे जिते ललचावैं ॥
ऐसन कौ बिसवास कहा री, कपट बैन बतरावैं ।
'नारायन' इक मेरे भवन तजि अनत जहाँ जहँ जावैं ॥

को जगत्यां जनो यो न द्रुतोऽभून्मम रूपतः।
मृतस्य गुरुपुत्रस्योज्जीवनायाब्धिरीक्षितः॥
न जानेऽस्मिन् रसे किं वा नवीभवति योऽञ्जसा।
त्वां प्रसादयता सर्वं बलं तद् विस्मृतं मया॥*

धन्यस्तव मानः। महान्ति महानि कार्याणि सम्पादितानि, कुत्रापि पराजयो नाङ्गीकृतः; क्वापि विश्रान्तेरनुभवो नाभूत्। अद्य तव प्रसादने मम सर्वं बलं विलीनमभूत्। इयं भक्तानां भगवतश्च प्रणय-लीलास्ति—अस्यां लीलायां रागः कामः क्रोधो मानः सर्वे सन्ति, परंतु सर्वे रूपान्तरतां गताः सन्ति। सर्वे पवित्रप्रेम्णो नामान्तर-मात्रतां गताः सन्ति। अत्रत्यं सर्वधर्मत्याग एव परमो धर्मोऽस्ति। अत्रत्योऽविधिरेव सर्वोपरि प्रेमविधिरस्ति।

इयं त्वभूत् सिद्धभक्तानां वार्ता। भक्तेः साधनेऽपि यदि कदाचित् कामक्रोधलोभाः संतापयेयुस्तदा ते भगवन्तं प्रत्येव योजनीयाः।

---

* इतौ स्रम नाहिन तवहुँ भयौ।
सुनु राधिका! जितौ स्रम मोकौं तैं इहिं मान दयौ॥
धरनी धरि बिधि बेद उधारयौ मधु-सौ सत्रु हयौ।
द्विज नृप कियौ, दुसह दुख मेटे, बलि कौ राज लयौ॥
तोरयौ धनुष, सुयंबर कीन्हौ, रावन अजित जयौ।
अघ बक बच्छ अरिष्ट केसि मथि दावानल अँचयौ॥
तिय-बपु धरयौ, असुर-सुर मोहे, को जग जो न द्रयौ।
गुरु सुत मृतक ज्यायबे कारन सागर सोध लयौ॥
जानौं नहीं, कहा या रस मैं सहजहिं होत नयौ।
'सूर' सो बल अब तोहि मनावत मोहि सब बिसरि गयौ॥

यानि वस्तून्यस्माकं मार्गे बाधकानि भवन्ति तान्येव भगवन्तं प्रति प्रयुक्तानि चेत् साधकानि सम्पद्यन्त इति निश्चयो रक्षणीयः ।

श्रीमद्भागवते परमहंसश्रेष्ठस्य श्रीशुकदेवस्य वचनमस्ति—

**कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव च।**
**नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते॥**
( १० । २९ । १५ )

'ये कामं क्रोधं भयं स्नेहं तादात्म्यं मित्रतां च सर्वाणि श्रीहरिं प्रति प्रयुञ्जते, तेऽवश्यमेव भगवति तन्मयतां यान्ति ।'

तीव्रकामस्तस्मिन्नेव वस्तुनि समुत्पद्यते यः सर्वतः श्रेष्ठः स्यान्निखिलैश्वर्यमयं भवेत्, महता माधुर्येण पूर्णं सर्वाङ्गसुन्दरमानन्दमयं च स्यात्; भगवतीदं सर्वमस्ति । इति विचार्य भक्तः सदा सर्वदैकमात्रश्रीकृष्णसमागमस्य कामनया पीडितो भवेत् तथेयं तस्य कामवासनोत्तरोत्तरं वर्धमानैव भवेत् । प्रेमपूर्णं क्रोधमेवं प्रकटयेद् यत्—'त्वमतिनिष्ठुरोऽसि, एतावताऽऽह्वानेनापि नायासि, अवधेहि—इदानीं त्वहं त्वामुल्लापयामि, पश्चात्त्वं पृष्ठे पृष्ठे भ्रमणं कर्तुं विवशो भविष्यसि ।' अष्टौ प्रहरान् चिन्तननिरतः सन् प्रेमपूर्णं मानमेवं व्यक्तं कुर्याद् यन्मम पार्श्वे त्वक्षयं चिन्तनधनमस्ति, अहं तव कामप्यावश्यकतां न रक्षामि, त्वं शतधावश्यकतां विद्धि चेदागच्छ ।' इत्यादि ।

भगवन्तं प्रति कामः क्रोधोऽभिमानश्च कथं कर्तुं शक्यन्ते ? अस्यैकमपरं सुन्दरमुदाहरणं मातृपरायणः शिशुरस्ति । लघुशिशवे भवान् बहुमूल्यं रत्नं दद्यात्, तस्मा उत्तमोत्तमानि वस्तूनि भोजनार्थ-

ददातु, तस्य भृशं सम्मानं करोतु, यशो गायतु, तं प्रति स्वर्गमोक्षलाभस्य वार्तां कथयतु, स मातरं मातुः स्तनौ च विहायापरं किमपि नेच्छति । इच्छेत् किम् ? सोऽन्यत् किमपि वस्तु जानात्येव न, तस्य दृष्टौ ज्ञातव्यमेषणीयं चैकमात्रं वस्त्वस्ति माता। मातुर्विनिमयेन स केनाप्यन्येन वस्तुना संतुष्टो न भवितुं शक्नोति । एवं भक्तस्य कामना केवलं भगवत्येव भवितुमुचिता । एको भगवानेव तस्य कामनाविषयो भवेत् ।

शिशुः किंचिद्वृद्धिमुपागमत्, इतस्ततो चलनमारब्धवान्; चलंश्चलन् पादयोः प्रतिघातं प्राप्य पतितो रोदनमारब्धवान् । शिशो रोदनं श्रुत्वा माता धावन्ती समायाता । शिशुरमर्षितोऽभूत् । पतितस्तु स्वयम्, परंतु क्रोधस्तस्य मातरं प्रति संजातः, स आत्मनः स्खलिताक्षरया वाचा वारं वारं कथयति—'त्वयाहमेकाकी कथं परित्यक्तः ?' पुनरभिमानं कृत्वा रुष्टो भवति । कथयति—'याहि, नाहं त्वां ब्रवीमि । तवाङ्कं नैवायास्यामि ।' माता प्रसादयति, क्रोडे ग्रहीतुमिच्छति, स्तनौ पाययितुं वाञ्छति, किंतु स रुदन्नग्रेऽग्रे पलायते । स एवं कथं करोति ? एतदर्थं यत्स स्वभावादेव मातुरुपरि स्वस्याधिकारं बुद्ध्यति । मातरमेवात्मनः सर्वं जानाति । स बुभुक्षितस्तिष्ठेत्तदा मातुर्दोषः, स पतेत्तदा मातुरपराधः, स शयितुं न शक्नुयात्तदा मातुरेवागः; अपराधस्य च दण्डोऽस्ति—अमर्षो रोषश्च—क्रोधोऽतिमानश्च । एवं निर्भरो भक्तोऽप्यात्मनो भगवन्तं प्रति कामं क्रोधमभिमानादिकं च कर्तुं शक्नोति ।

# प्रेमिभक्तानां महिमा

त्रिरूपभङ्गपूर्वकं नित्यदासनित्यकान्ताभजनात्मकं वा प्रेमैव कार्यम्, प्रेमैव कार्यम् ॥ ६६ ॥

६६—त्रीणि ( स्वामिसेवकसेवालक्षणानि ) रूपाणि भङ्क्त्वा नित्यदासभक्त्या नित्यकान्ताभक्त्या वा प्रेमैव करणीयम्, प्रेमैव करणीयम् ।

स्वामी, सेवकः, सेवा चाथवा पतिः पत्नी पतिसेवा च—इत्येतानि त्रीणि त्रीणि रूपाणि विलोप्य नित्यदासभावेन नित्यकान्ताभावेन वा भगवन्तं प्रति प्रेमैव करणीयम् । दास्यभावे कान्ताभावे चानयोर्द्वयोरेवाग्रगतौ सत्यां भगवता सह तन्मयता भवति । निष्कामभावेन शरीरं मनो वाणीं सर्वमेव स्वामिनेऽर्पयित्वैकमात्मनः स्वामिनं विहाय जगति द्वितीयस्य कस्यापि ज्ञानाभावः—अयं दास्यभक्तेरादर्शस्तथा—पतिरेव मम तनुर्मनो धनं मतिर्गतिराश्रयो जीवनं प्राणा धर्मो मोक्षो भगवांश्चास्ति । एकं पतिं विहायान्यः कोऽपि पुरुष एव जगति नास्ति, पत्युर्धनं मम धनम्, पत्युस्तनुर्मम तनुः, पत्युर्मनो मम मनः, पत्युः सेवा मम सेवा, पत्युरैश्वर्यं ममैश्वर्यं पत्युर्मानो मम मानः, पत्युरपमानो ममापमानः, पत्युः प्राणा मम प्राणाः—एवमेकमात्रपति-

गतप्राणा भूत्वा निष्कामेनानन्यभावेन निरन्तरं सेवायां संलग्ना भवेत्—अयं कान्ताभक्तेरादर्शः । वस्तुत उभे एकरूपे स्तः । द्वयोरेव साम्यमस्ति, द्वयोरेवाभिन्नतास्ति । दास्यभक्तावपि सेवकः स्वीयं सर्वं विस्मृत्य स्वामिनो नामगोत्रवान् सम्पद्यते तथा कान्ताभक्तौ तु स्वकीये नामगोत्रे पत्युर्नामगोत्रयोर्मेलयित्वैव कान्ताभावस्य प्राप्तिर्भवति । दास्यभावमधिकृत्य श्रीगोस्वामिमहोदयः कथयति—

**मम जातिः पङ्क्तिर्न कस्यापि जातिं पङ्क्तिं नेहे**
**मम कोऽपि कार्याय न कस्याप्यहं कर्मिणः ।**
**लोकः परलोको रघुनाथस्यैव हस्ते सर्वं**
**तुलस्यवलम्बो महानेकं नाम नामिनः ॥**
**अतिमात्रमज्ञा वस्तुतत्त्वं न विदन्ति लोकाः**
**सेवकस्य गोत्रमस्ति गोत्रमेव स्वामिनः ।**
**साधुर्वाप्यसाधुः सुष्ठु दुःष्ठु वा का चिन्ता यामि—**
**किं कस्यापि द्वारं योऽहं सोऽहं सीतास्वामिनः ॥***

स्वामिनः सेवकस्य च कुलगोत्रे एकीभूते आस्ताम् । अस्य दास्यभावस्य महिमानं गायन्ती भगवती श्रीराधिका भक्तवरमुद्धवं कथयति—

* मेरे जाति-पाँति न चहौं काहू की जाति-पाँति,
मेरे कोऊ काम को न हौं काहू के काम को ।
लोक-परलोक रघुनाथ ही के हाथ सब,
भारी है भरोसो तुलसी के एक नाम को ॥
अति ही अयाने, उपखाने नहीं बूझैं लोग
साहही को गोत, गोत होत है गुलाम को ।
साधु कै असाधु, कै भलो कै पोच, सोच कहा,
का काहू के द्वार परौं, जो हौं सो हौं राम को ॥

कृष्णभक्तिः कृष्णदास्यं वरेषु च वरं वरम् ।
श्रेष्ठा पञ्चविधामुक्तेर्हरिभक्तिर्गरीयसी ॥
ब्रह्मत्वादपि देवत्वादिन्द्रत्वादमरादपि ।
अमृतात् सिद्धिलाभाच्च हरिदास्यं सुदुर्लभम् ॥
( ब्रह्मवैवर्त कृ० ९७ । ८-९ )

'सर्वेषु वरेषु श्रेष्ठतमो वरः श्रीकृष्णभक्तिः—श्रीकृष्णदास्यमेवास्ति । पञ्चविधाभ्यो मुक्तिभ्यो हरिभक्तिरेव श्रेष्ठा गुरुतरा चास्ति। ब्रह्मत्वाद् देवत्वाद् अमरत्वादिन्द्रत्वादमृतत्वप्राप्तेः सिद्धिलाभात्—एभ्यः सर्वेभ्य एव श्रीहरेर्दास्यप्राप्तिः सुदुर्लभास्ति ।'

कान्ताभक्तौ त्वेकात्मतास्त्येव—

मम प्रेष्ठस्य प्रीतिर्यन्मनःपिञ्जरमास्थिता ।
रोम रोम प्रियोल्लापि 'दादू' वक्तीह नापरम् ॥
प्रेयसे पत्रिका लेख्या विदेशे चेत् क्वचिद् भवेत् ।
तनौ चित्ते दृशोर्योऽस्ति संदेशः कोऽस्तु तं प्रति ॥*

कान्ताकान्तौ तु परस्परं संसृष्टौ भूत्वैकीभवतः—अत एवात्र त्रिरूपभङ्गः स्वत एव सम्पद्यते । सूत्रकारः कथयति—इमामेकात्मतामादर्शरूपेण सम्मुखे निधाय, एनं भावं मनसि संस्थाप्य दास्यभावेन कान्ताभावेन वा भगवन्तं प्रति केवलं प्रेमैव कुरु ।

---

* प्रीति जो मेरे पीव की बैठी पिंजर माहिं ।
रोम-रोम पिउ-पिउ करै 'दादू' दूसर नाहिं ॥
प्रीतम को पतियाँ लिखूँ, जो कहुँ होय विदेस ।
तन में, मन में, नैन में, ताको कहा सँदेस ॥

## भक्ता एकान्तिनो मुख्याः ॥ ६७ ॥

**६७—एकान्तिनः ( अनन्याः ) भक्ता एव श्रेष्ठाः सन्ति ।**

एतत्पूर्वसूत्रानुसारेण भजमानो भगवतोऽनन्यभक्त एव सर्वतः श्रेष्ठोऽस्ति, यतस्तस्य तनुर्मनो धनं च सर्वं परमात्मनो वस्तु भवति । स परमात्मनो यन्त्रवद् भूत्वा संसारे तिष्ठति । तस्यात्मा परमात्मनैकीभवति, तस्य मनः परमात्मनो मनसि रतं भवति । तस्य नेत्रे सर्वत्र सर्वदा परमात्मानमेव पश्यतः—

( रहीमः कथयति— )

**नेत्रयोरवसत्प्रेष्ठच्छविः कुत्र परा विशेत् ।**
**पूर्णां शालां समालक्ष्य स्वयं पान्थो निवर्तते ॥***

( कबीरः कथयति— )

**दृशोः कज्जलरेखापीदानीं दातुं न पार्यते ।**
**रमते तत्र प्रेयांस्तु परः कुत्र समाविशेत् ॥†**
**यामानष्टौ चतुःषष्टिघटिका मम नापरः ।**
**नेत्रयोरुषितस्त्वं वै निद्रायै न स्थलं भवेत् ॥‡**

## कण्ठावरोधरोमाञ्चाश्रुभिः परस्परं लपमानाः पावयन्ति कुलानि पृथिवीं च ॥ ६८ ॥

---

* प्रीतम छवि नैनन बसी, पर छवि कहाँ समाय ।
भरी सराय 'रहीम' लखि आप पथिक फिरि जाय ॥
† 'कबिरा' काजर रेखहू अब तो दई न जाय ।
नैननि प्रीतम रमि रहा, दूजा कहाँ समाय ॥
‡ आठ पहर चौंसठ घरी मेरे और न कोय ।
नैना माहीं तू बसै, नींद कौ ठौर न होय ॥

६८—एवंविधा अनन्यभक्ता रुद्धकण्ठा रोमाञ्चयुताः साश्रुनेत्राश्च भूत्वा परस्परं सम्भाषमाणा आत्मनः कुलानि पृथ्वीं च पुनन्ति ।

अनन्यभक्तगणा यदैकत्र सम्मिलिता भूत्वाऽऽत्मनः प्राणस्वरूपस्य प्रियतमस्य चर्चां कुर्वन्ति तदा तेषां प्रेमसिन्धुरुद्वेलितो भवति । तदानीं ते चेष्टमाना अपि न वक्तुं शक्नुवन्ति, तेषां कण्ठा अवरुद्धा भवन्ति, शरीरं पुलकितं जायते, रोमरोमतः प्रेम्णः किरणधारा निस्सृत्य तस्मिन् स्थाने निर्मलं प्रेमज्योतिः प्रसारयन्ति । तत्रत्यं वायुमण्डलमत्यन्त-विशुद्धं प्रेममयं च भवति । तस्मिन् काले ते भक्तगणाः प्रेमविह्वला भूत्वा नेत्राभ्यां प्रेमाश्रुधारा वाहयन्तः परमानन्दे निमग्ना भवन्ति । इयं स्थितिरत्यन्तदुर्लभा परमपवित्रा च भवति । येषां भाग्यवतामियमवस्था प्राप्ता भवति, तेषां सर्वेषां कुलानि तु पवित्राणि भवन्त्येव—

उमे शृणु कुलं धन्यं जगत्पूज्यं च तच्छुचि ।
यत्रोत्पन्नो नरो नम्रो रघुवीरपरायणः ॥*

तेषामस्तित्वेन वसुधापि पूता भवति। तस्मिन् समये तस्य पवित्रप्रेमस्वरूपस्य भक्तस्य शरीरेण स्पृष्टः स्वल्पोऽपि वायुर्यस्य शरीरं स्पृशति सोऽपि पवित्रो भवति । शास्त्रे कथितम्—

कुलं पवित्रं जननी कृतार्था
वसुंधरा पुण्यवती च तेन ।

---

* सो कुल धन्य उमा सुनु, जगत पूज्य सुपुनीत ।
श्रीरघुबीर परायन जेहिं नर उपज बिनीत ॥

अपारसंवित्सुखसागरेऽस्मिन्
लीनं परे ब्रह्मणि यस्य चेतः ॥
( स्क० पुरा० माहे० ख० कौ० ख० ५५ । १४० )

'यस्य चित्तमपारसंवित्सुखसागरे परब्रह्मणि लीनं जातं तस्य जन्मना कुलं पवित्रं जननी कृतार्था तथा पृथ्वी पुण्यवती भवति ।'

श्रीमद्भागवते भगवान् कथयति—

वाग् गद्गदा द्रवते यस्य चित्तं
रुदत्यभीक्ष्णं हसति क्वचिच्च ।
विलज्ज उद्गायति नृत्यते च
मद्भक्तियुक्तो भुवनं पुनाति ॥
( ११ । १४ । २४ )

'प्रेम्णः प्राकट्येन यस्य वाणी गद्गदा चित्तं च द्रुतं भवति, यः प्रेम्णाऽऽविष्टो वारं वारं रोदिति, क्वचन हसति, कदाचिल्लज्जां त्यक्त्वोच्चस्वरेण गानं नर्तनं चारभते, ईदृशो मे परमभक्तस्त्रिलोकीं पवित्रां करोति ।'

**तीर्थीकुर्वन्ति तीर्थानि सुकर्मीकुर्वन्ति कर्माणि सच्छास्त्रीकुर्वन्ति शास्त्राणि ॥ ६९ ॥**

**६९—ईदृशा भक्तास्तीर्थानि सुतीर्थानि कर्माणि सुकर्माणि तथा शास्त्राणि सच्छास्त्राणि कुर्वन्ति ।**

तीर्थानि पापिनो नरान् नारीश्च निष्पापान् पवित्रांश्च ( निष्पापाः पवित्राश्च ) कुर्वन्ति, परंतु पापात्मनां संततं समागमेन तेषु मालिन्यमाविशति । तीर्थानां तन्मालिन्यं भक्तानां समागमेन नष्टं

भवति । दिलीपकुमारस्य महाराजभगीरथस्य घोरेण तपसा प्रसन्ना भूत्वा तस्मै वरं दातुमाविर्भूता भगवती श्रीगङ्गा तमुवाच––'भगीरथ ! अहं पृथ्वीतलं कथमायामि ? संसारस्य सर्वे पापिनस्त्वागत्य मयि स्वानि पापानि क्षालयिष्यन्ति । परंतु तेषां पापिनामपारं पापपङ्कमहं कुत्र क्षालयितुं यास्यामि ? अस्मिन् विषये भवता किं विचारितम् ?' अस्य प्रश्नस्योत्तररूपेण भगीरथेनोक्तम्––

**साधवो न्यासिनः शान्ता ब्रह्मिष्ठा लोकपावनाः ।**
**हरन्त्यघं तेऽङ्गसङ्गात् तेष्वास्ते ह्यघभिद्धरिः ॥**

( श्रीमद्भाग० ९ । ९ । ६ )

'मातः ! समस्तविश्वस्य पावना विषयत्यागिनः शान्तस्वरूपा ब्रह्मनिष्ठाः साधुमहात्मानः समागत्य तव स्रोतसि स्नानं करिष्यन्ति, तदा तेषामङ्गस्पर्शेन तव समस्तानि पापानि क्षालितानि भविष्यन्ति; यतस्तेषां हृदये सर्वपापविनाशनः श्रीहरिर्निवसति ।'

प्रचेतसो भगवन्तं स्तुवन्ति––

**तेषां विचरतां पद्भ्यां तीर्थानां पावनेच्छया ।**
**भीतस्य किं न रोचेत तावकानां समागमः ॥**

( श्रीमद्भाग० ४ । ३० । ३७ )

'भवतो ये भक्तगणास्तीर्थानि पवित्रीकर्तुमेव भूमौ विचरन्ति, तेषां समागमः संसारभयाद् भीतस्य पुरुषस्य कथं न प्रियो भविष्यति ?'

धर्मराजो युधिष्ठिरो भक्तराजं विदुरं कथयति––

**भवद्विधा भागवतास्तीर्थभूताः स्वयं विभो ।**
**तीर्थीकुर्वन्ति तीर्थानि स्वान्तःस्थेन गदाभृता ॥**

( श्रीमद्भाग० १ । १३ । १० )

'हे प्रभो ! भवद्विधा भगवद्भक्ताः स्वयं तीर्थभूताः सन्ति, (पापिभिः कलुषितानि) तीर्थानि भवन्तः स्वहृदये विराजमानस्य भगवतः श्रीगदाधरस्य प्रभावेण तीर्थीकुर्वन्ति। (तेभ्यस्तीर्थेभ्यः पुनस्तीर्थत्वं प्रदापयन्तीत्यर्थः।)

एवमेव यानि शास्त्रोक्तानि कर्माणि भक्तगणाः कर्तुमारभन्ते तान्येव सत्कर्माणि सम्पद्यन्ते, तथा ते येभ्यः शास्त्रेभ्यः समादरं ददति तान्येव सच्छास्त्राणि स्वीक्रियन्ते। किं चेदं कथनमपि नात्युक्तिर्यद् भक्ता यस्मिन् स्थाने निवसन्ति, यस्मिन् सरोवरे नद्यां वा स्नानं कुर्वन्ति, तान्येव तीर्थानि सम्पद्यन्ते। भक्ता यत्किंचित् कर्म कुर्वन्ति तदेवादर्शभूतं सत्कर्म कथ्यते तथा भक्ता यत्किंचिदुपदिशन्ति तदेव सच्छास्त्रं मतम्। तेषां निवासस्थानमेव तीर्थं तेषां कर्मैव सत्कर्म तथा तेषां वागेव सच्छास्त्रमस्ति। तीर्थानां सत्कर्मणां शास्त्राणां च रहस्ये विज्ञाते सतीदं कथनं सम्यक्तया बुद्धिगम्यं भवति।

## तन्मयाः ॥ ७० ॥

## ७०–(यतः) ते तन्मयाः सन्ति।

यथा नदी समुद्रेण संगता समुद्ररूपा भवति, तथैव भक्तोऽप्यात्मनस्तनुं मनो बुद्धिमहंकारं च सर्वमेव प्रियतमाय भगवते समर्प्य भगवन्मयो भवति। ईदृशो भक्तः साक्षाद् भगवत्स्वरूप एव भवति। स यत्र निवसति तत्रत्यं सर्वं सूक्ष्मं स्थूलं च वायुमण्डलं शुद्धं भवति। अत एव तस्य समागममात्रेण तीर्थं कर्म शास्त्रं च पवित्राणि भवन्ति। एतादृशैरेव भक्तैर्भगवतो भगवन्नाम्नो भगवद्भक्तेश्च महिमा वर्धते

तथैषां सम्पर्के समायाताः पापिनोऽपि पापीयांसो नरा नार्यश्च घोरसंसार-सागरस्यानायासेन पारं गच्छन्ति ।

**मोदन्ते पितरो नृत्यन्ति देवताः सनाथा चेयं भूर्भवति ॥ ७१ ॥**

**७१–( ईदृशानां भक्तानामाविर्भावं दृष्ट्वा ) पितरः प्रमोदन्ते, देवा नर्तनमारभन्ते तथेयं पृथिवी सनाथा भवति ।**

भक्तानामाविर्भावः सर्वेषामेव शुभो भवति । यतस्तेषां सर्वाण्येव कर्माणि स्वभावादेव लोककल्याणकारीणि भवन्ति । तेषां प्रभावेण लोकेषु धर्मं प्रति श्रद्धा वर्द्धते । पितृकार्येषु देवकार्येषु च विश्वास उत्पन्नो भवति । अतो धर्मपथाद् विचलिता जनाः पुनर्धर्ममार्गमारुह्य यज्ञं दानं श्राद्धं तर्पणादिकं च कर्म कर्तुमारभन्ते, येन देवैः पितृभिश्च परमं सुखं लभ्यते । भक्तेः प्रभावेण भक्तस्य पूर्वजानि पश्चाद्भवानि चानेकानि कुलानि तरन्ति । अतः स्वकुले भक्तमुत्पन्नं दृष्ट्वा पितृगणा आत्मनो मुक्तेः सुदृढाशया हर्षोत्फुल्ला भवन्ति । पद्म-पुराणे कथितमस्ति ।

**आस्फोटयन्ति पितरो नृत्यन्ति च पितामहाः ।**
**मद्वंशे वैष्णवो जातः स नस्त्राता भविष्यति ॥**

'पितृपितामहगणाः स्वकीये वंशे भगवद्भक्तस्य जन्म संवृत्तं ज्ञात्वा—अयमस्माकमुद्धारं करिष्यतीत्याशया प्रसन्ना भूत्वा नर्तन-मास्फोटनं चारभन्ते ।

दर्शनार्थं हठं कुर्वाणा दर्शनाकाङ्क्षिणो भक्ताः कयाप्यन्यया वार्तया

न संतुष्यन्ति, अतः स्नेहमयी जननीव तान् स्वीये क्रोडे क्रीडयित्वा सुखिनः कर्तुं सच्चिदानन्दघनो भगवान् दिव्यरूपेण प्रत्यक्षं प्रकटीभवति। तस्मिन् प्रादुर्भवत्येव देवानामहितमाचरतामसुराणां विनाश आरभ्यते। एवं भक्तस्याविर्भावमेव भगवतः प्राकट्ये कारणं मत्वा देवगणा अपि नर्तनमारभन्ते। यावद् भगवतोऽथवा भगवतः प्रियाणां धर्मात्मनां भक्तानामाविर्भावो न भवति तावत् पृथिवी देव्यनाथा तिष्ठति यदा च भक्तः प्रकटीभवति तदा वत्समनु स्नेहवशाद् धावन्ती गौरिव भगवानपि प्रकटीभवति। अत एव भक्तस्याविर्भावेनैव पृथ्वी सनाथा भवति।

**नास्ति तेषु जातिविद्यारूपकुलधनक्रियादिभेदः ॥ ७२ ॥**

**७२–तेषु (भक्तेषु) जातिविद्यारूपकुलधनक्रियादिप्रयुक्तो भेदो नास्ति।**

सूत्रकारोऽत्रेदं बोधयति यद् भक्तौ जातिविद्यारूपकुलधनक्रियादीनां प्राधान्यं नास्ति। ब्राह्मणः शूद्रो वा साक्षरो निरक्षरो वा सुन्दरः कुरूपो वा महाकुलीनो नीचकुलोत्पन्नो वा, धनवान् दरिद्रो वा तथातिक्रियाशीलो निष्क्रियो वा स्याद् यः स्वीयं सर्वस्वं प्रभौ निर्मञ्छितं कृत्वा सततं प्रेमपूर्वकं तस्य स्मरणे स्वं चित्तं लीनं करोति, तस्यैव भक्तिरूपं परमं दुर्लभं धनं प्राप्तं भवति। निषादस्य जन्म नीचजातावभूत्, सदननामा कश्चित्पशुघ्नकुले समुत्पन्न आसीत्, शबरी ग्राम्या (प्राकृता मूढा वा) नार्यासीत्, ध्रुवोऽपठितो बालक आसीत्, विभीषणहनुमदादयः कुरूपा अकुलीनाश्च राक्षसा वानराश्चासन्,

विदुरः सुदामा च निर्धनावास्ताम्, गोपीजनाः क्रियाहीना आसन्; परंत्वेतैः सर्वैर्भक्तैः प्रपत्तेश्च बलेन भगवतः प्रेम प्राप्तं तथैते भगवतः परमप्रिया अभवन् । सर्वसत्कर्मणां फलरूपा भक्तिर्यस्य हृदये विद्यते स एव भक्तः, स एव सर्वगुणसम्पन्नोऽस्ति, कामं पुनरसौ कोऽपि स्यात् । इदमेव श्रीरामचरितमानसे कथितम्—

स एव गुणवाञ्ज्ञाता सर्वज्ञोऽपि स एव हि ।
स दाता स पृथिव्याश्च मण्डनः पण्डितः स वै ॥
स धर्मपरमो ज्ञेयः कुलत्राता स एव च ।
श्रीरामचरणद्वन्द्वे मनो यस्य रतं सदा ॥
स एव नीतौ निष्णातो बुद्धिमान् परमः स वै ।
श्रुतेस्तेनैव सिद्धान्तः सम्यग् ज्ञातोऽस्ति धीमता ॥
स एव सत्कविर्विद्वान् रणे धीरः स एव च ।
भजते कपटं त्यक्त्वा रघुवीरं सदैव यः ॥*
रघुनाथोऽवदद् वार्तां शृणु भामिनि मेऽधुना ।
स्वीकरोम्येकमेवाहं सम्बन्धं भक्तिहेतुकम् ॥
जातिः पङ्क्तिः कुलं धर्मो महत्त्वं वैभवं बलम् ।
गुणाः कुटुम्बं चातुर्यं सर्वेष्वेतेषु सत्स्वपि ॥
भक्तिहीनो नरो यस्तु स कथं नाम शोभते ।
विलोक्यते श्रिया हीनो निर्जलो जलदो यथा ॥†

---

* सोइ सर्बग्य गुनी सोइ ग्याता । सोइ महि मंडित पंडित दाता ॥
धर्म परायन सोइ कुल त्राता । राम चरन जाकर मन राता ॥
नीति निपुन सोइ परम सयाना । श्रुति सिद्धांत नीक तेहिं जाना ॥
सोइ कबि कोबिद सोइ रनधीरा । जो छल छाड़ि भजइ रघुबीरा ॥

† कह रघुपति सुनु भामिनि बाता । मानउँ एक भगति कर नाता ॥
जाति पाँति कुल धर्म बड़ाई । धन बल परिजन गुन चतुराई ॥
भगति हीन नर सोहइ कैसा । बिनु जल बारिद देखिअ जैसा ॥

अस्य कथनस्येदं तात्पर्यं नास्ति यद् भक्त आत्मानं सर्वस्मादुत्कृष्टं सर्वगुणसम्पन्नं च ज्ञात्वा सर्वैः स्वकीयां पूजां कारयत्यथवा समाजे जातौ वर्ण आश्रमे च महद्भिः सह भोजने पाने विवाहे व्यवहारे वर्तनप्रकार आचारे विचारे कुलपरम्परादौ चात्मनः समानमधिकारं प्राप्तुमिच्छति । भक्तस्त्वभिमानस्य सर्वथा त्यागी भवति, स पुनर्नूतनं मिथ्याभिमानं शिरसि धारयित्वा कथमेवं कुर्यात् ? य इत्थमाचरन्ति ते भक्ता न सन्ति । वर्णाश्रमधर्मे तथा भक्तौ भेदोऽस्ति । ये भक्तेर्व्यपदेशेन वर्णाश्रममर्यादां लोपयितुमिच्छन्ति ते तु भक्तिं लाञ्छयन्ति । अतएव भक्तिमार्गे चलनशीलैः साधकैः शास्त्रत्यागस्य कदापि भावनैव न कर्तव्या । इदं सत्यमस्ति यत् प्रारब्धे नास्ति चेद् विद्या धनं वा न प्राप्तुं शक्यते नापि चास्मिञ्जन्मनि रूपं जातिस्तथा कुलमेव परिवर्तयितुं शक्यन्ते । परंत्वेतेषां सर्वेषां वस्तूनां भावेनाभावेन न्यूनाधिकभावेन वा भक्त उच्चनीचभावो न कर्तव्यः—भक्तिसंयोगाज्जातिभेदादिहेतुना भक्तो नीचः कदापि न मन्तव्यः । अतएव वैष्णवशास्त्रेषु भक्तविषया जातिभेदबुद्धिरेकोऽपराध इति कथितम् ।*

---

* वैष्णवग्रन्थेषु निम्नाङ्किताश्चतुःषष्टिरपराधाः प्रतिपादिताः सन्ति । एषु मनो निधाय वर्तनेन बहवो लाभा भवितुं शक्नुवन्ति—१ श्रीभगवान् काचिद् देवता तत्त्वविशेषो वेति मान्यता, २ वेदेषु ग्रन्थबुद्धिः पौरुषेयत्वबुद्धिर्वा, ३ भक्तेषु जातिभेदबुद्धिः, ४ गुरौ साधारणमनुष्य इति बुद्धिः, ५ भगवतः प्रतिमा काष्ठं प्रस्तरो धातुः पत्रं मृत्तिका वेति धारणा, ६ भगवतः प्रसादः साधारणं खाद्यवस्तु—इति बुद्धिः, ७ भगवतश्चरणोदकं साधारणं जलमिति धारणा,

यतस्तदीयाः ॥ ७३ ॥

८ तुलसी साधारणवृक्षविशेष इति मान्यता, ९ गौः साधारणः पशुरितिबुद्धिः, १० श्रीमद्भागवतं श्रीमद्भगवद्गीता वा साधारणं पुस्तकमिति बोधः, ११ भगवतो लीला मानवकृतय इति मान्यता, १२ सांसारिकप्रेम्णा स्त्रीसुखेन वा सह भगवतो लीलायास्तुल्यतापादनम्, १३ गोप्यः ( भगवतो दृष्टौ ) परस्त्रिय इति धारणा, १४ रासलीलायां कामचेष्टाबुद्धिः, १५ भगवतो महोत्सवसमये स्पर्शास्पर्शबुद्धिः, १६ ईश्वरं शास्त्राणि च न स्वीकृत्य नास्तिकतावलम्बनम्, १७ संदेहपूर्वकं धर्मस्याचरणम्, १८ धर्मपालन आलस्यम्, १९ बाह्यवृत्तेन भक्तानां परीक्षणम्, २० साधुमहात्मनां गुणदोषाणामालोचनम्, २१ अहमुत्तमोऽस्मीति मान्यता, २२ कस्यापि देवस्य शास्त्रस्य वा निन्दा, २३ भगवतो विग्रहं पृष्ठतः कृत्वोपवेशनम्, २४ भगवतो विग्रहस्य समक्षे उपानहौ पादयोः कृत्वा गमनम्, २५ भगवतो विग्रहस्य समक्षे मालाधारणम्, २६ भगवतो विग्रहस्य समक्षे यष्टिं गृहीत्वा गमनम्, २७ भगवतो विग्रहस्य समक्षे नीलं वस्त्रं परिधाय गमनम्, २८ दन्तधावनं गण्डूषांश्चाकृत्वैव भगवद्विग्रहस्य समक्षे गमनम्, २९ मलत्यागान्मैथुनादेर्वा पश्चाद् वस्त्रपरिवर्तनं विनैव मन्दिरे प्रवेशः, ३० भगवतो विग्रहस्य समक्षे हस्तपादप्रसारणम्, ३१ भगवतो विग्रहस्य समक्षे ताम्बूलचर्वणम्, ३२ भगवतो विग्रहस्य समक्ष उच्चैः स्वरेण हसनम्, ३३ कुचेष्टाकरणं च, ३४ स्त्रीणां चतुर्दिक्षु भ्रमणम्, ३५ क्रोधव्यापारः, ३६ भगवतो विग्रहस्य समक्षे कस्याप्यन्यस्याभिवादनम्, ३७ दुर्गन्धं वस्तु भुक्त्वा दुर्गन्धदूरीभवनात्प्रागेव मन्दिरे गमनम्, ३८ मादकद्रव्याणां सेवनम्, ३९ कस्याप्यवमानना हननं वा, ४० कामक्रोधादीनां चेष्टा, ४१ अतिथेः साधोर्वा समादरे प्रमादः, ४२ अहं भक्तो धर्मात्मा पण्डितः पुण्यात्मा वेति मान्यता, ४३ नास्तिकानां व्यभिचारिणां हिंसकानां लोभिनां मिथ्याभाषिणां च मनुष्याणां संगतिः, ४४ विपत्तावीश्वरे दोषारोपणम्, ४५ पापाय धर्मस्यानुष्ठानम्, ४६ कस्मैचित् किंचिदपि कष्टं दत्त्वा 'अहं

## ७३–यतः ( भक्ताः सर्वे ) तस्य ( भगवतः ) एव सन्ति ।

भक्ताः स्वभक्तेः प्रभावेण भगवद्रूपा एव भवन्ति अत एव तेषां मिथो भेदबुद्धिर्न भवति तथा तेषु कोऽप्यात्मानं केनापि हेतुनोच्चं न मन्यते ।



---

धार्मिकः' इति मान्यता, ४७ स्त्रियाः पुत्रस्य परिवारस्याश्रितानां दीनानां साधूनां च पालनपोषणयोरुपेक्षणम्, ४८ किमपि वस्तु स्वीयं भोग्यं मत्वा तस्य भगवते निवेदनमनिवेदितस्य वा वस्तुनो भोगः, ४९ निजेष्टदेवस्य नाम्नः शपथीकरणम्, ५० धर्मं भगवतो नाम च विक्रीय धनोपार्जनम्, ५१ स्वीयमिष्टदेवं विहायान्यस्मादाशाकरणम्, ५२ शास्त्रमर्यादाया भञ्जनम्, ५३ ब्रह्मज्ञानाभावेऽपि ब्रह्मज्ञानिवदाचरणम्, ५४ सम्प्रदायभेदेन वैष्णवानां कतमस्मिन्नुच्चनीचबुद्धिः, ५५ देववदाचरणम्, ५६ अवताराणां लीलासु तारतम्यं स्थापयित्वा तासां निन्दनम्, ५७ परिहासेऽपि कंचित् प्रति भवानेव भगवानस्तीति कथनम्, ५८ भगवान् कस्यापि मुखापेक्ष्यस्तीति भ्रान्त्यापि मनसि धारणम्, ५९ लोभवशात् कस्मैचिद् भगवत्प्रसादस्य चरणोदकस्य वा दानम्, ६० भगवतश्चित्रपटस्य प्रतिमाया नाम्नो वावमानना, ६१ कस्यापि जीवस्य केनापि प्रकारेण संतापनं भयदर्शनमथवा कस्याप्यहिताचरणम्, ६२ तर्कवितर्कयोः पराजये सति सिद्धान्तस्थापनक्षमताया अभावे सति वाऽऽस्तिकतायास्त्यागः, ६३ भगवदवताराणां जन्मकर्मसु साधारणत्वबुद्धिः ६४ भगवतो युगलरूपे द्वैतबुद्धिकरणम् ।

# वादविवादरूपा विघ्नाः

## वादो नावलम्ब्यः ॥ ७४ ॥

७४–( भक्तैः केनापि ) वादो विवादो वा न कर्तव्यः ।

भक्तेः साधकानां कृत इदं सूत्रं परममहत्त्वपूर्णमस्ति । भक्तस्य तर्कवितर्के पक्षग्रहणं नावश्यकम् । इदं बोध्यं यन्मम तु प्रत्येकक्षणः स्वप्रियतमस्य भगवतो भजनाय समर्पितोऽभूत्, तस्य कार्यान्तरे नियोजनाय ममाधिकार एव नास्ति । स पुनस्तर्क वितर्क कुर्यादपि कस्मिन् विषये ? सृष्टिः कदाभूत् ? कथमभूत् ? किमभूत् ? एतस्या मूलं तत्त्वं किमस्ति ? एतेषां सर्वेषां विषयाणां ज्ञानं तस्य नापेक्षितम् । स तु श्रीभगवन्तमेव सर्वं ज्ञात्वा मत्वाऽऽत्मन एकमात्रं लक्ष्यं निर्धारितवानस्ति । भगवान् यदेच्छेत्तदाऽऽत्मनस्तत्त्वं स्वयमेव बोधयिष्यति । कदा बोधयिष्यति ? बोधयिष्यति वा न बोधयिष्यति ? इत्येतदपि तेन न चिन्तनीयम् । स्वप्रियतमस्य भगवतश्चिन्तनं त्यक्त्वा कस्यापि वस्त्वन्तरस्य चिन्तनार्थं तस्य मनसि स्थानमेव न भवेत् । तथेदमपि निश्चितमस्ति यत्तर्केण तत्त्वस्योपलब्धिरपि न भवति । अत एव ब्रह्मसूत्रे कथितम्—'तर्काप्रतिष्ठानात्' ( ब्र० सू० १ । १ । ११ )—यतस्तर्कस्य प्रतिष्ठा नास्ति । कठोपनिषदि

कथितम्—'नैषा तर्केण मतिरापनेया' ( १ । २ । ९ ) अर्थाद् बुद्धेस्तर्केण तस्य तत्त्वस्य प्राप्तिर्न भवति । तत् सत्यं तत्त्वं तु शुद्ध-चित्तस्य सात्त्विकपुरुषस्य समक्षे स्वयमेवाविर्भूतं भवति । आंशिकरूपेणे-दमपि सत्यमस्ति यत् 'वादे वादे जायते तत्त्वबोधः' परंतु स वादोऽन्यो भवति । श्रद्धालुः शिष्यो जिज्ञासुभावेन गुरोः समक्षे तर्कमुपस्थापयति तथा गुरुस्तस्य शङ्कां निवार्य ततोऽपि प्रबलेन तर्केण तं सिद्धान्तं बोधयति । ईदृशो वादो दूषितो नास्ति । परंतु यो वाद आग्रहपूर्वकं भवति स तु दुष्परिणाममेवोत्पादयति तथा वादे स्वमतस्याग्रहो भवत्येव । तदा पुनः सिद्धान्तस्यानुसंधानं परित्यक्तं भवति तथा व्यक्तिगतदोष-निरीक्षणं मिथो दोषारोपणं परस्परं दुर्वचनप्रयोगाश्चारभ्यन्ते । विवेको नश्यति, क्रोधश्छादयत्यन्तरम्, वाग् विवशा भवति तथा शाश्वतिकं वैरं बद्धं भवति । अत एवोच्यते—'वादे वादे वर्द्धते वैरवह्निः'—वादविवादाभ्यां वैराग्निः प्रज्वलितो भवति । भक्तेः पथिक-स्त्वेतावन्तमवकाशमेव न प्राप्नुयात्, येनासौ वादं विवादं कर्तुं शक्नुयात् । यथासम्भवं तेन तर्कस्थानात् पृथग्भूतेनैव भवितव्यम् । यदि प्रारब्धवशात् कदाचित् तर्कवादिभिः समागमो भवेत्तदा तेन विनीत-भावमाश्रित्य तेषां वार्ता श्रोतव्या तथा किमपि प्रत्युत्तरं दत्त्वा वादो न वर्धनीयः । 'अतृणे पतितो वह्निः स्वयमेवोपशाम्यति ।'—यद्यग्नाविन्धनं न पतेत्तदा स स्वयमेव शान्तो भविष्यति । वक्तारः स्वयमेव श्रान्ता भविष्यन्ति । अत एव भक्तस्य कृते सर्वतः श्रेष्ठं मौनमेवास्ति । 'मौनं सर्वार्थसाधनम्' इति वाक्यं सदा मनसि धारणीयम् । अन्यत्त्वेदृशीं वार्तां शृणुयादेव न ययाऽऽत्मन इष्टदेवे मार्गे विश्वासे साधने च संशयो भवेत्, तथा स्वयमीदृशीं कामपि वार्तां कमपि न कथयेद्

यया कस्यापि चित्तं खिद्येत । परस्य वार्तावसरेऽनवसरे वा श्रोतुमापद्येत चेत्तदा तां शृणुयात्परंतु स्वयं तु तर्कस्येच्छयान्यमभिभावयितुं स्वमतं स्थापयितुं विवादेऽवतरेदेव न । अस्य कथनस्येदं तात्पर्यं नास्ति यच्छ्रद्धया सह पृच्छन्तं किमपि न ब्रूयादथवावसरे प्राप्तेऽपृष्टोऽपि हितवार्तां न कथयेत् । तात्पर्यं त्विदमेवास्ति यद् विवादे नावतरेत् । अनावश्यकं ब्रूयादेव न । यदा किंचित्कथनं विना कार्यं न सरेत्तदाऽऽवश्यकं मत्वैयदेव वदेद् यावता कार्यं चलेत् । वार्तां वर्धयित्वा न कथयेत्, विवादभावेन न कथयेत्, कस्यापि विरोधं न कुर्यात्, केनापि परिहासं न कुर्यात्, कस्यापि दोषं न वदेत्, कस्यापि हृदये आघातं न कुर्यात्, आत्मनः स्वमतस्य वा प्रशंसां न कुर्यात्, कस्यापि निन्दां न कुर्यात्, कटु न वदेत्, वचने आशायाः कामनाया वा भावं न दध्यात्, वाचा कमपि न वञ्चयेत्, कस्यचिद् बुद्धिभेदं नोत्पादयेत्, यत्किंचिद् वदेत् सत्यं मधुरं प्रियमनुद्वेगकरं तथा हितं वाक्यमेव वदेत् । शिष्टे समये भगवन्नामस्मरणे संलग्नस्तिष्ठेत् । अनावश्यकस्यैकशब्दस्योच्चारणेऽपि महतीं हानिं मन्येत, यतस्तावान्समयो वृथा यातः; तावत्कालं जिह्वातो नामजपःपरित्यक्तस्तथानावश्यकशब्दस्य वायुमण्डले यः प्रभावोऽभूत्स पृथक् ( हानिविषयः ) ।

इदं निश्चितं मन्येत यत्तर्केण वादविवादाभ्यां च कदापि भगवत्प्रेम्णो ज्ञानस्य भगवतो वा प्राप्तिर्न भवति । तर्केण त्वहंकारद्वेषक्रोधहिंसावैराणामेव समुदायः समाहृतो भवति । अत एव वादविवादाभ्यां सदा पृथक् तिष्ठेत् ।

**एवं विचार्य सद्बुद्ध्या ये च तज्ज्ञा विरागिणः ।**
**राममेव भजन्ते ते त्यक्त्वा तर्कमशेषतः ॥**

विचार्य चैवं किल धीरबुद्धिना
त्यक्त्वा कुतर्कं सकलं च संशयम्।
रामो रणे धीर उपास्यतां सदा
कृपानिधिः सुन्दर इष्टसौख्यदः ॥*

बाहुल्यावकाशादनियतत्वाच्च ॥ ७५ ॥

७५—यतः (वादे विवादे च) बाहुल्यावकाशोऽस्ति तथा सोऽनियतमस्ति।

सूत्रकारः कारणं प्रदर्शयन् कथयति यद् वादविवादयोरुत्तर-प्रत्युत्तरं भवति तथा तत् क्रमशो वृद्धिंगतमेव भवति। उभयपक्षतः स्वस्वमतस्य स्थापनाय शब्दानामजस्रवृष्टिः प्रवर्तते। यो विषयो. भगवत्कृपयैव ज्ञातुं शक्यते स तर्केण तु लब्धुं शक्यत एव न। अत एव तर्कवितर्कयोः किमपि सुफलमपि न भवति। यदि विवादे वादं वादं श्रान्ततयावसरे तर्कस्य स्मृतेरभावाद्वा कतरस्याप्येकस्य पक्षस्य विजयो भवति तदा तस्य मतमपि सिद्धान्तत्वेन नाङ्गीक्रियते, यतस्तत् सिद्धान्तकोटौ नायाति। तस्माद् विवादे समयापव्ययं न कृत्वा भक्तः सर्वथाऽऽत्मनो भगवति निर्भरस्तिष्ठन् निरन्तरं निष्कपटेन निष्कामेन च भावेन परमश्रद्धापूर्वकं भगवतो भजनं कुर्यात्। भगवत्प्रेमप्राप्तिस्तर्केण न भवति, भक्त्यैव भवति।

---

* अस बिचारि जे तग्य बिरागी। रामहि भजहिं तरक सब त्यागी॥
अस बिचारि मतिधीर तजि कुतर्क संसय सकल।
भजिअ राम रनधीर करुनाकर सुंदर सुखद॥

## भक्तेः प्रधानाः सहायकाः

**भक्तिशास्त्राणि मननीयानि तदुद्बोधककर्माण्यपि करणीयानि ॥ ७६ ॥**

**७६–( तस्याः प्रेमभक्तेः प्राप्तये ) भक्तिशास्त्रस्य मननं कुर्वता स्थातव्यम्, तथेदृशानि कर्माण्यपि करणीयानि यैर्भक्ते-र्वृद्धिः स्यात् ।**

भक्तिमिच्छद्भिर्न कोऽपि ग्रन्थो द्रष्टव्यः, न च किमपि कर्म कर्तव्यम्, इति न । तैस्तर्कवितर्कयोस्त्यागं कृत्वा पुनः पुनरेतादृशा ग्रन्था अवश्यं द्रष्टव्या येषु भगवतो भक्तेर्निरूपणं स्याद्भक्ते-र्माहात्म्यं वर्णितं भवेद्भक्तेः साधनानि प्रतिपादितानि स्युर्भगवतः प्रियभक्तानां पुण्यचरित्राणामाख्यानानि स्युस्तथा भक्तेर्वशे तिष्ठतो भगवतः प्रभावरहस्ययोर्गुणानां च वर्णनं स्यात् । ईदृशानां भक्ति-शास्त्राणामध्ययनेन महात्मनां भक्तानां सतां वचनावलीनां श्रवणेन पठनेन च भगवद्विषयायाः प्रेमभक्तेरुदयो भवति ।

अवश्यमेव भक्तिमिच्छद्भिः पुरुषैरीदृशानि पुस्तकानि कदापि न पठनीयानि श्रवणीयानि च येषु श्रीभगवतस्तद्भक्तेश्च खण्डनं स्यात्, तयोर्महत्त्वं न्यूनत्वेन कथितं स्यात् तथा भक्तानां निन्दा भवेदथवा येषु लौकिकानां विषयाणां महत्त्वस्यैव वर्णनं स्यात् । ईदृशानि पुस्तकान्यपि तेषां कृते लाभप्रदानि न भवन्ति येषु भगवतो भक्तेर्भक्तानां च महत्त्वं न स्यात् । किंच रागद्वेषयोः कामक्रोधयोर्वैरविरोधयोश्चोत्पादकं

साहित्यं तु भक्तैः स्प्रष्टुमपि नोचितम् । अत एवेदं कथितमस्ति—

**यस्मिञ्छास्त्रे पुराणे वा हरिभक्तिर्न दृश्यते ।**
**श्रोतव्यं नैव तच्छास्त्रं यदि ब्रह्मा स्वयं वदेत् ॥**

'यस्मिन् शास्त्रे पुराणे वा भगवतो भक्तिर्न दृश्येत, ब्रह्मणा वर्णितमपि तच्छास्त्रं तेन भक्तेन न श्रोतव्यम् ।'

सहैव कर्माण्यपीदृशानि कर्तव्यानि यैर्भक्तेर्जागर्तिर्वृद्धिश्च भवेताम् । भक्तिकामैः पुरुषैर्निषिद्धानां ( पापलक्षणानां ) कर्मणां तु सर्वथैव त्यागः कर्तव्यः । यो विषयासक्तिवशात् पापकर्माणि न त्यक्तुमिच्छति तथाऽऽत्मानं भक्त इति व्यपदेशयितुमपीच्छति, स स्वयं वा भ्रमे पतितोऽस्ति, अथवा ज्ञानपूर्वकं भ्रमं प्रसारयितुमिच्छति ।

भक्तिप्राप्तौ सहायकानां कर्मणां मध्ये यानि प्रधानानि तान्यधोलिखितानि सन्ति—

१—आत्मनो वर्णस्याश्रमस्य च धर्माणां यथासम्भवं पूर्णतया पालनम् । ब्रह्मचारिवानप्रस्थसंन्यासिनां पक्षे त्यागपूर्णमाचरणम्, गृहस्थस्य च पक्षे भगवत्प्रीत्यर्थं मातुः पितुः स्त्रियाः पुत्राणां परिवारप्रभृतीनामाश्रितजनानां प्रेमसत्कारपूर्वकं पालनम्, न्यायसत्यपुरस्सरं जीवननिर्वाहस्तथा शास्त्रोक्तानि यज्ञदानतपांसि——इत्यादि ।

२—सदाचारस्य पालनम् ।

३—सत्सङ्गस्तथा भगवद्गुणानुवादस्य श्रवणं चिन्तनं कीर्तनं च ।

४—भगवन्नाम्नां जपः स्मरणं कीर्तनं च ।

५—भगवतः पूजनं स्तुतिः प्रार्थनं नमस्करणं च ।

६—सतां भक्तानां सेवा तथा श्रद्धापूर्वकं तेषामाज्ञायाः पालनम् ।

७—तीर्थसेवनम् ।

८—दीनेषु प्राणिषु दया तथा यथासम्भवं तन्वा मनसा धनेन च तेषां सेवा ।

९—सर्वकर्मणां भगवते समर्पणम् ।

१०—सर्वेषु प्राणिषु भगवतो दर्शनस्याभ्यासः ।

श्रीभगवान् स्वयं कथयति—

श्रद्धामृतकथायां मे शश्वन्मदनुकीर्तनम् ।
परिनिष्ठा च पूजायां स्तुतिभिः स्तवनं मम ॥
आदरः परिचर्यायां सर्वाङ्गैरभिवन्दनम् ।
मद्भक्तपूजाभ्यधिका सर्वभूतेषु मन्मतिः ॥
मदर्थेष्वङ्गचेष्टा च वचसा मद्गुणेरणम् ।
मय्यर्पणं च मनसः सर्वकामविवर्जनम् ॥
मदर्थेऽर्थपरित्यागो भोगस्य च सुखस्य च ।
इष्टं दत्तं हुतं जप्तं मदर्थं यद् व्रतं तपः ॥
एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनाम् ।
मयि संजायते भक्तिः कोऽन्योऽर्थोऽस्यावशिष्यते ॥

( श्रीमद्भाग० ११ । १९ । २०-२४ )

'ममामृततुल्यायां कल्याणमय्यां कथायां श्रद्धा, निरन्तरं मम नाम्नां गुणानां च कीर्तनम्, मम पूजायां पूर्णा निष्ठा, स्तोत्रद्वारा मम स्तुतिः, मम सेवायां निरन्तरं समादरः, सर्वैरङ्गैर्ममाभिवादनम्, मम भक्तानां विशेषरूपेण पूजनम्, सर्वेषु प्राणिषु मम दर्शनम्, मदर्थमेव सर्वेषां लौकिककर्मणामाचरणम्, वार्तालापे केवलानां ममैव गुणानां

चर्चा, मनसो मय्येवार्पणम्, सर्वासां कामनानां त्यागः, मदर्थं धनस्य भोगानां सुखानां च परित्यागः, तथा मदर्थमेव यज्ञदानहोमजपतपोव्रतादीनां शास्त्रोक्तकर्मणामनुष्ठानम्—हे उद्धव ! आत्मनिवेदनपूर्वकमेभिर्धर्मैर्मामुपास्य मनुष्यैर्मम प्रेमरूपा भक्तिः प्राप्यते। पुनस्तेषां किमपि प्राप्तव्यं नावशिष्यते।'

प्रबुद्धनामकेन योगीश्वरेण महाराजं निमिं प्रति प्रेमरूपाया भक्तेः प्राप्तिसाधनान्येवं प्रतिपादितानि—

तस्माद् गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम्।
शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयम्॥
तत्र भागवतान् धर्मान् शिक्षेद् गुर्वात्मदैवतः।
अमाययानुवृत्त्या यैस्तुष्येदात्माऽऽत्मदो हरिः॥
सर्वतो मनसोऽसङ्गमादौ सङ्गं च साधुषु।
दयां मैत्रीं प्रश्रयं च भूतेष्वद्धा यथोचितम्॥
शौचं तपस्तितिक्षां च मौनं स्वाध्यायमार्जवम्।
ब्रह्मचर्यमहिंसां च समत्वं द्वन्द्वसंज्ञयोः॥
सर्वत्रात्मेश्वरान्वीक्षां कैवल्यमनिकेतताम्।
विविक्तचीरवसनं संतोषं येन केनचित्॥
श्रद्धां भागवते शास्त्रेऽनिन्दामन्यत्र चापि हि।
मनोवाक्कर्मदण्डं च सत्यं शमदमावपि॥
श्रवणं कीर्तनं ध्यानं हरेरद्भुतकर्मणः।
जन्मकर्मगुणानां च तदर्थेऽखिलचेष्टितम्॥
इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रियम्।
दारान् सुतान् गृहान् प्राणान् यत् परस्मै निवेदनम्॥
एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदम्।
परिचर्यां चोभयत्र महत्सु नृषु साधुषु॥

परस्परानुकथनं पावनं भगवद्यशः ।
मिथो रतिर्मिथस्तुष्टिर्निवृत्तिर्मिथ आत्मनः ॥
स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिम् ।
भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुम् ॥
( श्रीमद्भाग० ११ । ३ । २१–३१ )

'यः स्वीयं परमं कल्याणं ज्ञातुमिच्छेत्स वेदज्ञं परब्रह्मनिष्ठं च शान्तस्वरूपं गुरुं प्रपद्येत तथा गुरुमेवात्मानमिष्टदेवं च मत्वा निष्कपटभावेन तस्य सेवां कृत्वा तान् भागवतधर्मान् शिक्षेत यैरात्मप्रदः परमात्मा श्रीहरिः प्रसीदति । मनसः सर्वेभ्यो विषयभोगेभ्यो वैराग्यम्, साधुमहात्मनां सङ्गः, सर्वेषु प्राणिषु यथायोग्यं ( दीनेषु ) दया, ( समानवयस्कैः सह ) मित्रता तथा ( गुरुजनेषु ) विनयस्य व्यवहारः, तनुमनोधनैः पवित्रतयावस्थानम्, कष्टं सहित्वापि स्ववर्णाश्रमधर्मपालनरूपस्य तपसोऽनुष्ठानम्, शीतोष्णादिसहनम्, व्यर्थालापस्य त्यागोऽथवा भगवतो मननम्, स्वाध्यायः, सरलता, ब्रह्मचर्यम्, अहिंसा, सुखदुःखादिद्वन्द्वेषु समत्वम्, सर्वत्र सर्वेषु जीवेष्वात्मनस्तथेश्वरस्य दर्शनम्, एकान्तेऽवस्थानम्, गृहादीनां भगवद्वस्तुतास्वीकरणम्, शुद्धसाधारणवस्त्रपरिधानम्, यत् किमपि लभ्येत तेनैव संतोषः, भगवद्गुणगानपरेषु भागवतादिषु शास्त्रेषु श्रद्धा, अन्येषां शास्त्राणामनिन्दनम्, मनोवाक्कर्मणां संयमः, सत्यभाषणम्, मनस इन्द्रियाणां च वशीकरणम्, अद्भुतलीलाविधायकस्य श्रीहरेर्जन्मकर्मगुणानां श्रवणं कीर्तनं ध्यानं च, भगवदर्थ एव सर्वेषां विहितकर्मणामनुष्ठानम्, यज्ञदानतपोजपादीनां सदाचाराणामात्मप्रियाणां सकलपदार्थानां स्त्रीपुत्रगृहप्राणानामपि परमात्मने समर्पणं तथैवं भगवदात्मनाथेषु भक्तेषु

सौहृदम्, जडचेतनानां भूतानां मनुष्याणां तेष्वपि च साधुस्वभावानां महापुरुषाणां विशेषरूपेण परिचरणम्, परस्परं भगवतः पवित्रयशसामनुकथनं तथैतेन भगवद्गुणगानेनैव परस्परं प्रीतिस्तुष्टिस्तथा दुःखानां निवृत्तिः—एतानि सर्वाणि साधनानि सद्गुरोः समीपे स्थित्वा शिक्षणीयानि। एवं वर्तमानानां तथा पापसमूहविनाशनस्य श्रीहरेः स्वयं स्मरणं कुर्वतामन्यैश्चास्य स्मरणं कारयतां भक्तानां हृदयेऽनया साधनरूपया भक्त्या प्रेमलक्षणा भक्तिरुत्पद्यते तथा तेषां शरीराणि पुलकितानि भवन्ति, ते पुनः प्रेममग्ना भवन्ति।'

एवं श्रीमद्भागवतस्य श्रीमद्भगवद्गीतायाः श्रीरामायणप्रभृतीनां च भक्तिप्रधानानां ग्रन्थानां श्रवणेन पठनेन च तथोपर्युक्तदिशा सत्सङ्गस्य नामजपस्य नामकीर्तनादीनां च भक्तिवर्धकानां सत्कार्याणां भगवत्प्रीत्यर्थमनुष्ठानेन भक्तेर्वृद्धिर्भवति। भक्तेन सदा साधुस्वभावेन सत्कार्येष्वेव निरतेन च भवितव्यम्, तदैव तस्य भक्तिर्वर्धते।

श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेनात्मनः प्रियभक्तानां लक्षणानि वर्णयता कथितम्—

**अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।**
**निर्ममो निरहंकारः समदुःखसुखः क्षमी॥**
**संतुष्टः सततं योगी यतात्मा दृढनिश्चयः।**
**मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥**
**यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।**
**हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः॥**
**अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः।**
**सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः॥**
**यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।**
**शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः॥**

समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥
तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येन केनचित् ।
अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो नरः ॥
ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥
( १२ । १३--२० )

'यः कंचिदपि जीवं न द्वेष्टि, यः सर्वेषां मित्रं दयालुश्चास्ति, यो ममताहंकाराभ्यां रहितः सुखदुःखप्राप्तौ समः क्षमाशीलश्चास्ति, यस्य चित्तं निरन्तरं मयि संलग्नम्, यः सदा संतुष्टः मनसश्चेन्द्रियाणां च विजेता, मयि दृढनिश्चयस्तथा यो मयि समर्पितमनोबुद्धिरस्ति, स मद्भक्तो मम प्रियोऽस्ति ।

'यस्मात् कोऽपि जीवो नोद्विग्नो भवति, तथा यः स्वयमपि कस्माच्चिदपि जीवादुद्विग्नो न भवति, यो हर्षामर्षभयोद्वेगैर्मुक्तोऽस्ति स भक्तो मे प्रियः ।

'यः किमपि वस्तु नापेक्षते, यः शुद्धश्चतुर उदासीनश्चास्ति, यो दुःखेभ्यो मुक्तोऽस्ति तथा कर्ताहमस्मीत्यभिमानेन कस्यापि कार्यस्यारम्भं न करोति ( सर्वं भगवत्कृतमेव मन्यते ) स मद्भक्तो मे प्रियः ।

'यो न हृष्टो भवति, न द्वेषं करोति, न शोचति न च किमपि काङ्क्षत्येव, यः शुभमशुभं च किमपि कर्मासक्त्या फलेच्छया वा न करोति, स भक्तिमान् पुरुषो मम प्रियः ।

'यः शत्रुमित्रयोर्मानापमानयोस्तथा शीतोष्णयोः सुखदुःखादिषु च द्वन्द्वेषु समानं भावं दधाति, यस्य ( मां विहाय ) कस्मिंश्चिदपि पदार्थे नासक्तिरस्ति, यो निन्दां स्तुतिं तुल्ये मन्यते, यश्चित्तेन वाचा च केवलं ममैव मननं कथनं च करोति तथा यः केनापि प्रकारेण जीवननिर्वाहे संतोषं धत्ते यस्यात्मनः कीदृशमपि गृहं नास्ति—यो गृहे ममत्वरहित इत्यर्थः, यो गृहं द्वारं सर्वं भगवत इति कृतमतिः, स स्थिरबुद्धिर्भक्तपुरुषो मम प्रियोऽस्ति ।

'ये श्रद्धालवः पुरुषा मत्परायणा भूत्वोपर्युक्तं धर्ममयममृतं सम्यक्तया सेवन्ते ते भक्तास्तु मेऽत्यन्तं प्रियाः सन्ति ।'

श्रीभगवता प्रतिपादितानीमानि लक्षणानि सिद्धेषु भक्तेषु तु स्वभावादेव भवन्ति, तथा भक्तिसाधकैरेतान्यात्मन आदर्शभूतानि मत्वैतदनुसारेणाचरणं कर्तुं चेष्टा विधातव्या ।

एवं भक्तिशास्त्रस्याध्ययनेन मननेन च भक्तिवर्धकेषु साधनेषु संलग्नेन भक्तैर्योगिजनदुर्लभा प्रेमरूपा भक्तिः प्राप्यते ।

## सुखदुःखेच्छालाभादित्यक्ते काले प्रतीक्ष्यमाणे क्षणार्धमपि व्यर्थं न नेयम् ॥ ७७ ॥

**७७—सुखदुःखेच्छालाभादीनां ( पूर्णतया ) त्यागो यस्मिन् भवेदित्येतादृशं कालं प्रतीक्षमाणेन साधकेन क्षणार्धमपि ( भजनं विना ) व्यर्थं न यापनीयम् ।**

अत्र कोऽपि संदेहो नास्ति यद् भक्तेः सिद्धौ सत्यां सुखदुःख-लाभालाभादीनि सर्वाणि द्वन्द्वानि स्वयमेव बिलीयन्ते तथा पुनः

कस्यापि पदार्थस्येच्छा न तिष्ठति । परंत्वीदृशस्य शुभसमयस्य प्रतीक्षणमेव क्रियेत, साधनं किमपि न क्रियेत चेत्तदा वर्तमानाया हीनदशाया विनाशसमनन्तरं सहसा तादृशी शुभदशा स्वयमेव प्राप्ता भविष्यत्येव कथम् ? किंच मनुष्यस्य जीवनस्यैकक्षणमात्रावस्थितेरपि निश्चयो नास्ति, न जाने कस्मिन् पले प्रलयो भवेत् ? कदा मृत्युरुपस्थितो भवेत् ? अतोऽमुकस्थितौ प्राप्तायां भगवतो भजनं करिष्यामीत्येतादृशी धारणा त्यक्तव्या । तथाधुनैव यो यस्यामवस्थायामस्ति तेनास्यामेवावस्थायां भगवतः कृपामाश्रित्य साधनमारम्भणीयम् । क्षणार्धमपि विलम्बो न कर्तव्यः । कबीरः कथयति—

**श्वःकार्यमद्य कुर्वीथा अद्यकार्यं तु साम्प्रतम् ।**
**पलके प्रलयो भावी करिष्यसि पुनः कदा ॥***

निमेषमात्र एव मृत्योर्ग्रासो भविष्यसि, पुनः कदा करिष्यसि ? इदं न विजानीहि यदधुना स्वल्पं वयः, खेलनखादनयोर्विषयभोगस्य चं समयोऽस्ति, वृद्धावस्थायां भजनं करिष्याम इति । को वक्तुं शक्नुयाद् यत्त्वं वृद्धावस्थाया आगमनात् प्रागेव न पञ्चत्वं प्राप्स्यसीति ? कालस्य नग्नः करवालस्तु सदैव शिरसि लम्बते । अस्मिन् विषय एको दृष्टान्तो वर्तते । आसीदेको भ्रमरः, स कमलपुष्पान्तरुपविष्टः कमलस्य रसं पिबन्नासीत्तथा तस्य सुगन्धेन मत्तोऽभवत् । एतावत्येव काले संध्याभूत् । सूर्येऽस्तं गतवत्येव कमलं

---

* काल करै सो आज कर, आज करै सो अब ।
पलमें परलै होयगी, फेरि करैगा कब ॥

संकुचितं भवति, अतएव कमलं निमीलितमभवत्तथा स्थूलस्थूलानां शालानां शिंशपानां च वृक्षाणां छेदने क्षमो भ्रमरो विषयासक्त्या तदन्तरेवातिष्ठदचिन्तयच्च—

रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः।
इत्थं विचिन्तयति कोशगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार॥

रात्रिर्गमिष्यति, प्रातःकालो भविष्यति, सूर्य उदेष्यति तथा यर्हि तदीयकिरणेषु पतत्स्वेव कमलं पुनः प्रफुल्लं भविष्यति तदाहमस्माद् बहिर्निर्गमिष्यामि। तावत्सानन्दं मकरन्दस्यास्वादनं कुर्वंस्तिष्ठेयम्। स एवं विचारयन्नेवासीदित्येतस्मिन्नन्तर एकेन मत्तेन गजराजेनागत्य कमलमुत्पाट्य मुखे क्षिप्तं तथा कमलेन सहैव भ्रमरोऽपि गजदन्तेषु पिष्टोऽभवत्। तस्य मनोरथो मनस्येवातिष्ठत्। अतएवेदशा विचारास्तु त्यक्तव्या एव यदमुके कार्ये सम्पन्ने भजनं करिष्यामः। प्रथमं तु मनोऽनुकूलानां कामानां पूर्तिर्भवत्येव नहि, तथा यदि भवेत् तदैकस्याः कामनायाः पूर्तिरात्मना सह बहून् नवान् नवानभावान् समादायायाति; पुनस्तासां पूर्तेः प्रयत्ने संलग्नताऽऽपद्यते। अपूर्णैरभावमयैश्च क्षणभङ्गुरैः सांसारिकपदार्थैः कदापि पूर्णा तृप्तिर्भवितुमेव न शक्नोति। कियत्यपि प्राप्तिर्भवेत्, स्थास्यति त्वभाव एव, तथाभावदुःखाग्निना दह्यमानस्यैव विषयकामिनो मनुष्यस्य मृत्युरापत्स्यते। अतएव विषयाणां पूर्णतः प्राप्तिः स्याद् विषयभोगेन पूर्णतस्तृप्तिश्च सम्पद्येतेतीदृशस्य समयस्याशां त्यक्त्वा पूर्वत एव भजने प्रवर्तितव्यम्।

किंचैका वार्तापरापि विचारणीयास्ति यदद्य सत्सङ्गेनास्माकं मनसि भगवन्तं भगवतो भक्तिं वा प्राप्तुमिच्छा संजाता तथास्माभिः क्षणमपि स्वजीवनस्य ध्येयतया भगवत्प्राप्तिः स्वीकृता; परंतु वयं विचारयामो यदमुकस्थितौ प्राप्तायामस्य ध्येयस्य प्राप्तये साधनं करिष्यते। किमस्माकमयं विचारो वञ्चनापूर्णो नास्ति ? प्रथमं त्वयमेव निश्चयो नास्ति यदमुकस्थितिः प्राप्ता भवेत्तथा पुनरिदं को वक्तुं शक्नुयाद् यत्तावत्कालपर्यन्तमस्माकं ध्येयमेव परिवर्तितं न भविष्यति ? परंतु यद्यधुना वयमात्मनो ध्येयरूपाया भगवत्प्राप्तेः साधने संलग्ना भवामस्तदा साधनमार्गे यथा यथाग्रे प्रसरिष्यामस्तथा तथास्माकं तस्मिन् विशिष्टोऽनुरागो भविष्यति, लाभोऽपि प्रतीतो भविष्यति तथाभ्यासोऽपि क्रमेण दृढो भविष्यति। एतद्वैपरीत्ये यदि वयं केवलं ध्येयमात्रमङ्गीकृत्यैव तूष्णीमास्महे तदा क्षणान्तर एवान्यस्मिन् सङ्गे प्राप्तेऽस्माकमिदं ध्येयं परिवर्तिष्यते; अतः कालस्य प्रतीक्षामकृत्वाद्यत एव भजनसाधने प्रारम्भणीये। सत्सङ्गात् प्राप्तायाः सदिच्छायाः शुभावसरो नापहारणीयः। स्वास्थ्यमपि सदा सुष्ठु स्थास्यतीत्यपि निश्चितं नास्ति। यावत् स्वास्थ्यं साध्वस्ति तावदेव साधनभजने भवतः। स्वास्थ्ये विकृते जाते, इन्द्रियेष्वशक्तेषु संजातेषु तथा वृद्धावस्थायामागतायां यदि पूर्वत एव पूर्णोऽभ्यासो न विहितस्तदा भजने मन एव न लगिष्यति। अतएव महाराजेन भर्तृहरिणा कथितम्—

**यावत्स्वस्थमिदं कलेवरगृहं यावच्च दूरे जरा**
**यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः।**

**आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्**
**प्रोद्दीप्ते भवने च कूपखननं प्रत्युद्यमः कीदृशः ॥**

( वैराग्यशतके )

'यावच्छरीरं स्वस्थमस्ति, जरा नायातास्ति, इन्द्रियाणां शक्तिः पूर्णतः स्थितास्ति, आयुषो दिनान्यवशिष्टानि सन्ति तावदेव बुद्धिमता पुरुषेणात्मनः श्रेयसि सम्यक्तया यत्नः करणीयः । गृहेऽग्निनाऽऽत्मसात्कृते कूपस्य खननेन किं भविष्यति ?'

अतएव भक्तगणा भगवन्तं शरणं प्रपद्य तमाह्वयन्तः कथयन्ति—

**आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं**
**प्रत्यायान्ति गताः पुनर्न दिवसाः कालो जगद्भक्षकः ।**
**लक्ष्मीस्तोयतरङ्गभङ्गचपला विद्युच्चलं जीवितं**
**तस्मान्मां शरणागतं शरणद त्वं रक्ष रक्षाधुना ॥**

'आयुः प्रतिदिनं दृश्यमानमेव नष्टं भवति, यौवनं व्यतिगच्छति, गतानि दिनानि पुनर्निवृत्य नायान्ति, कालो जगद् भक्षयति, लक्ष्मीस्तोयतरङ्गभङ्गीव चपलास्ति तथा जीवनं तु विद्युद्विद्योतनमिवास्थिरमस्ति; अतएव हे शरणद प्रभो ! मां शरणागतं त्वमधुनैव रक्ष ।'

**कृष्ण त्वदीयपदपङ्कजपञ्जरान्ते**
**अद्यैव मे विशतु मानसराजहंसः ।**
**प्राणप्रयाणसमये कफवातपित्तैः**
**कण्ठावरोधनविधौ स्मरणं कुतस्ते ॥**

'हे कृष्ण ! तव पदकमलरूपे पिञ्जरे ममायं मनोरूपो राजहंसो

ऽप्यैव प्रवेशं करोतु । प्राणनिष्क्रमणसमये यदा कफवातपित्तेषु वृद्धेषु सत्सु कण्ठोऽवरुद्धो भविष्यति तदा तत्र स्मरणं कुतो भविष्यति ।'

अतएव स्वल्पोऽपि कालो भगवद्भजनं विना न व्यतिगमनीयः । यः कालो भगवद्भजनेन व्यतियाति स एव सार्थकोऽस्ति, शिष्टः सर्वो व्यर्थोऽस्ति । समयस्य मूल्यं ज्ञात्वैकैकं श्वासमतिसावधानतया कृपणस्य परिमितं पणपुञ्जमिव केवले भगवच्चिन्तन एव नियोजयेत् । भजन-विरहितः काल एव वस्तुतोऽस्माकं कृते भयंकरः कालोऽस्ति । सैव सर्वतो महती विपत्तिरस्ति ।

**हनूमानवदन्नाथ विपत्तिः सैव दुस्सहा ।**
**यदा भगवतो नैव स्मरणं भजनं भवेत् ॥***
**सा हानिस्तन्महच्छिद्रं स मोहः स च विभ्रमः ।**
**यन्मुहूर्तं क्षणं वापि वासुदेवं न कीर्तयेत् ॥**

'यन्मुहूर्तमथवैकं क्षणमपि श्रीभगवत्कीर्तनं विना व्यतीतमभूत् सैव सर्वतो महती हानिरज्ञानं मोहश्चास्तीति ज्ञातव्यम् ।'

भगवतो भजनाय कस्यापि सुविधापूर्णस्य समयस्य प्रतीक्षा न कर्तव्या । अन्यथास्माकममूल्यं मनुष्यजीवनमेव वृथा नष्टं भविष्यति । भगवतो भजनमेव मनुष्यजीवनस्य सर्वोत्तमं समादरणीयं च कर्मास्ति । भजनं कारं कारं भगवतः कृपयैकदास्माकं सर्वेषां सुखदुःखादि-द्वन्द्वानां स्वयमेव नाशो भविष्यति तथा भगवत्प्रेम्णो निर्मलज्योतिषा-स्माकं हृदयं प्रकाशमानं भविष्यति सर्वा दिशः समस्तं ब्रह्माण्डं च तेन

* कह हनुमान बिपति प्रभु सोई । जब तव सुमिरन भजन न होई ॥

निर्मलेन शीतलेन स्निग्धेन ज्योतिषा पूर्णानि भविष्यन्ति तथा तदास्माकमानन्दस्य कापि सीमा न स्थास्यति ।

वस्तुतो भक्तस्य कार्यं त्विदमालोचनमपि नास्ति यद् भजनस्य कः परिणामो भविष्यति ? तस्य कार्यं तु केवलं प्रेमपूर्वकं भजनमेवास्ति । प्रेम्णः कृत एव प्रेमकरणं भजनायैव भजनकरणमस्ति । भजनं तस्य स्वभाव एव सम्पद्यते । भजनं विना तेनावस्थातुमेव न पार्यते । स सर्वं सहिष्यते, किंतु भजनस्य वियोगस्तस्य कृतेऽसह्योऽस्ति ।

श्रीमद्भागवते कथितमस्ति—

**त्रिभुवनविभवहेतवेऽप्यकुण्ठ-**
**स्मृतिरजितात्मसुरादिभिर्विमृग्यात् ।**
**न चलति भगवत्पदारविन्दा-**
**ल्लवनिमिषार्द्धमपि यः स वैष्णवाग्र्यः ॥**
**( ११ । २ । ५३ )**

'यदि भगवतो भक्तं प्रत्युच्येत यत्त्वं क्षणार्धं निमेषार्धमपि वा भगवच्चरणचिन्तनं त्यज तथा त्रिलोक्याः सम्पूर्णं वैभवं गृहाण तदा स इमां वार्तां न स्वीकरोति । तस्य चित्तरूपो भ्रमरस्त्वचञ्चलरूपेण भगवतस्तयोश्चारुचरणारविन्दयोरेव संलग्नस्तिष्ठति, ययोर्निरन्तरं ध्यानपूर्वकमन्वेषणेऽपि देवास्ते न प्राप्तुं शक्नुवन्ति । एतादृशः स भक्तः किमपि न वाञ्छति ।'

स वारं वारं कातरकण्ठेनेदमेव वदति यन्मे मोक्षो नाभीष्टः, ज्ञानं नाकाङ्क्षणीयम्, वैभवं नैषणीयम्, नापि चर्द्धिसिद्धी अभीष्टे

नैवापि च महती कीर्तिरेव कमनीया । कस्यामपि योनौ गमनमापद्येत, किंचिदपि स्यात्, एतत्कृतेऽपि स्वल्पापि चिन्ता नास्ति । हे मम प्रियतम ! तव चरणयोर्मम प्रेम, निर्हेतुकं प्रेम, उन्मत्तं प्रेम, अन्धं प्रेम, प्रेममयं प्रेम, प्रियतममयं प्रेम दिनमनुदिनं वर्धमानमेव तिष्ठेत् ।

**प्रतिजन्म रती रामपादयोर्नापरो वरः ।***

श्रीशंकराचार्यो जगज्जननीरूपं भगवन्तं प्रार्थयते—

**न मोक्षस्याकाङ्क्षा वरविभववाञ्छापि च न मे**
**न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः ।**
**अतस्त्वां संयाचे जननि जननं यातु मम वै**
**मृडानी रुद्राणी शिव शिव भवानीति जपतः ॥**

## अहिंसासत्यशौचदयास्तिक्यादिचारित्र्याणि परिपालनीयानि ॥ ७८ ॥

**७८–( भक्तैः साधकेन ) अहिंसासत्यशौचदयास्तिक्यादय आचरणीयाः सदाचाराः सम्यग्रूपेण पालनीयाः ।**

षट्सप्ततितमे सूत्रे भक्तिवर्धकानां कर्मणामाचरणं कर्तव्यमिति वार्ता निवेदिता । अस्मिन् सूत्रे ताभ्यः क्रियाभ्यः सद्गुणेभ्यश्च पञ्चानां प्रधानानामाचाराणां नामनिर्देशं कृत्वा सूत्रकार एतेषां पालनस्यात्यन्त-मावश्यकतां प्रतिपादयति ।

दैव्याः सम्पत्तेर्गुणा भक्तस्यापरिहार्याणि लक्षणानि सन्ति । यत्र

---

* जनम जनम रति रामपद यह बरदान न आन ।।

भक्तिरस्ति तत्र दैव्याः सम्पत्तेः सद्भावोऽनिवार्यः । कियन्तो जना भ्रान्तिवशादेवं कथयन्ति यद् 'भक्तिं कुरु, भक्तजने सद्गुणो न भवेच्चेन्मा भूत् । मनुष्यः कामं यावन्ति पापानि कुर्याद् भक्तो भवेत्, पुनः कापि चिन्ता नास्ति' परंतु तेषामिदं कथनं तथैव युक्तिविरुद्धमस्ति, यथेदं वचनं यत् 'सूर्य उदितो भवेत् पुनः कामं तत्रान्धकारस्तिष्ठेत् ।' यत्र सूर्योदयोऽभवत्तत्रान्धकारो विलीयते प्रकाशो विकीर्यत एव । एवमेव यत्र भक्तिरूपस्य सूर्यस्योदयो जातस्तत्र तस्य प्रकाशलक्षणा दैवी सम्पत्तिरवश्यं वितता भविष्यति । इदं कस्मिंश्चिदंशे सत्यमस्ति यद् भगवत्प्राप्तानां महात्मनां भक्तपुरुषाणां बाह्यैराचरणैस्तेषां परीक्षा न भवति । परंतु कतिपये गुणास्त्वीदृशाः सन्त्येव, तेषां तेषु प्राकट्यमत्यन्तमेवावश्यकमस्ति । आवश्यकमेव न, अनिवार्यमस्ति । तेष्वेव गुणेषु—इमे पञ्चगुणा अपि सन्ति । यस्मिन् पुरुषे गुणा इमे न स्युः स यदि कदाचित्साधुर्वा भक्तोऽपि वा भवेत् तदापि तस्माद् भेतव्यमेव । अपि त्वधिकांशतस्त्वेतैर्गुणै रहिता मनुष्याः साधवो भक्ता वा भवन्त्येव न । आत्मनः परीक्षा तु साधकेनैतानेव गुणानवलम्ब्य कर्तव्या । अयं निश्चयो रक्षणीयो यद् यदि भगवतश्चिन्तनं दैवी सम्पत्तिश्च वर्धते तदास्माकं भक्तिमार्गे समुन्नतिर्भवति । यदि जगतश्चिन्तनं भवति तथा दैवीसम्पत्तिर्न वर्धते तदास्माकमुन्नतिर्न भवति । किंच यदि विषयाणां चिन्तनं वर्धते तथासुरी सम्पत्तिर्वर्धमाना भवति तदास्माकं नूनमेवावनतिर्भवति । भगवतः प्रेमपूर्वकं चिन्तनं भक्तस्य धर्मोऽस्ति । तथा दैव्याः सम्पदो गुणास्तस्य जीवनपद्धतिरूपाः सन्ति । स सर्वं त्यजति परंतूभयमप्येतन्न विजहाति । अवश्यमेव लीलामयस्य भगवत

आज्ञां रुचिं वानुसृत्य सिद्धेन भक्तेन क्वचित्क्वचिज्जीवनपद्धतिः परिवर्तनीया भवति । परंत्वेष नियमो नास्त्यपवादो वर्तते ।

इदं निश्चितमस्ति यत्स कथंचिद्विधयाप्यासक्त्या ममतया कामनया वासनयाहंकारेण मोहवशाद् वा जीवनपद्धतिं न परिवर्तयति। यत्र केनापि कारणेन कस्मिंश्चित् काले तस्य जीवनपद्धतौ तस्य स्वाभाविके स्वधर्मे भगवत्प्रेम्णि च विरोधः समागच्छन् दृश्यते तत्रैव भगवत आज्ञामादाय स स्वधर्मस्य रक्षणाय नीतिं परित्यजति । एतादृशानां स्थलानामेव कृते—भरतस्य प्रह्लादस्य विभीषणस्य श्रीगोपीजनादीनामुदाहरणानि लभ्यन्ते, यत्र तैर्भगवतः कृते मातुः पितुर्भ्रातुः पतिप्रभृतीनां चाज्ञानामुल्लङ्घनं कृतम् । परंतु तत्रापि दृष्टिपातः क्रियेत चेत्तदा सदाचारनीतेस्त्यागो नाभूदित्येव सिद्ध्यति । प्रेमधर्मस्य पालनार्थं भक्तैः प्रायः स्वयमेव कष्टं सोढम् । तस्या अवस्थाया वार्ता त्वन्यास्ति, यत्र सर्वेषां निषेधानां भगवच्चरणयोः समर्पणं भवति । परंतु स्मरणीयम्—यत् तादृशं समर्पणं भवति, न तु क्रियते । विधिनिषेधानां भारस्तस्य प्रेमोन्मत्तस्य भक्तस्य शिरसः समवतार्यते, स ज्ञानपूर्वकं नावतारयति । तथा तस्यां मत्तावस्थायामपि तस्मिन् कोऽपि दुर्गुणस्तिष्ठेदिति वार्ता नास्ति । परंत्वत्र तु साधकस्य चर्चा भवति तथा साधकेन परमसावधानतया शास्त्रविहितानां सद्गुणानां सदाचाराणां च रक्षणं कर्तव्यं पालनं च । सूत्रकारेण येषां पञ्चानां गुणानां नामानि गृहीतानि तेषां स्वरूपं संक्षेपेणैवं बोद्धव्यम् ।

*अहिंसा*—शरीरेण मनसा वाचा च कंचिदपि जीवं प्रति केनापि प्रकारेण वर्तमाने भविष्यति वा काले दुःखस्य न

प्रापणम्, अपि तु सदा सर्वेषां सुखप्रापणचेष्टायां संलग्नतयावस्थानम् ।

*सत्यम्*—यथा दृष्टं श्रुतं ज्ञात वा स्याद् वचनेन लेखनेन संकेतेन वा वस्तुतस्तादृशमेव वृत्तं परं बोधयितुं मनोवृत्ते रक्षणम् । वाचैतादृशानामेव शब्दानामुच्चारणं ये सत्या भवेयुस्तथा सहैव मधुरा हितकारकाश्च भवेयुः । कियन्तो जनाः सत्यभाषणे कठोरभाषायाः प्रयोगमावश्यकं मन्यन्ते तथाभिमानवशात् कथयन्ति यद् 'वयं तु सत्यभाषिणः स्मः कामं तेन सत्यभाषणेन कस्यचिद् हृदयं खिन्नं सुखितं वा स्यात् ।' परंत्वीदृशी वार्ता नास्ति । द्वेषवैरनिन्दापैशुन्यादिभावेभ्यो दूरे रक्षित्वा वाचमात्मनः परेषां च हितदृष्ट्या सदा मधुरतायां सत्य एव च निमग्नां रक्षेत् । यथा चन्द्रमसश्चन्द्रिका प्रकाशदातृत्वगुणेन सहैव शीतलापि भवति तथैव भक्तस्य वाचापि सत्यया मधुरया च—प्रकाशप्रदया शान्तिदायिन्या च भवितव्यम् । येनापरस्याहितं भवेत्तत्सत्यमपि वाञ्छनीयं नास्ति ।

*शौचम्*—बाह्यमाभ्यन्तरं चोभयविधमेव शौचमावश्यकमस्ति । तत्र बाह्यं यथा——

( क ) जलेन मृत्तिकादिना च शरीरस्य पवित्रीकरणम् ।

( ख ) अन्यस्य स्वत्वमनाच्छिद्य सत्यतापूर्वकं निर्दोषरूपेणार्जनस्य चेष्टां कृत्वा धनस्य शुद्धताया रक्षणम् ।

( ग ) शुद्धे स्थाने शुद्धेन स्नातेन मनुष्येण शुद्धनिरामिषान्नद्वारा सात्त्विकानां पदार्थानां भगवतेऽर्पणं कृत्वा भोजनस्य शुद्धिः ।

( घ ) शुद्धेन निष्कपटेन प्रेमपूर्णेन च वृत्तेन व्यवहारस्य शुद्धताया रक्षणम् ।

( ङ ) अतिथिसत्कारेण भगवन्नामध्वनिना च गृहस्य पवित्रीकरणम् ।

( च ) शास्त्रविहितैराचरणैरन्येषां सर्वेषामेव बाह्यकर्मणां शुद्धेः रक्षणम् ।

*अथाभ्यन्तरं शौचम्*—

दम्भवैराभिमानासक्तीर्ष्याद्वेषशोकपापचिन्तनव्यर्थविषयचिन्तनादिभ्यो दोषेभ्यो मनसि यथासाध्यं प्रवेशावसरं न दत्त्वा सरलताविनयवैराग्याद्वेषप्रसन्नतासच्चिन्तनभगवच्चिन्तनद्वारा मनसः पवित्रताया रक्षणम् ।

*दया*—दुःखी मनुष्यो गृहजनो वा स्यात् परो वा, मित्रं शत्रुर्वा स्यात्, तं दुःखदशायां पतितं दृष्ट्वा कंचिद् भेदभावं विना मनसो व्याकुलभावस्तथा यथासाध्यं क्लेशं सहित्वा त्यागं कृत्वा चापि तस्य दुःखस्य दूरीकरणाय प्रयतनम् । अयं भावः सर्वान् भूतान् प्रति तथा सर्वस्मिन्नेव काले भवितुमर्हति । याभिः क्रियाभिर्भूतानामहितं भवेत्तथा तेषां दुःखस्य प्राप्तिर्भवेत्तासां क्रियाणां त्यागो विधातव्यः । एवमेव देशे समाजे वा याभिः प्रथाभिः कृत्यैश्च जीवानामहितं भवेत्तेषामवरोधं कारयितुं चेष्टा करणीया ।

*आस्तिकता*—ईश्वरे शास्त्रेषु च प्रत्यक्षगते वस्तुनीव पूर्णो विश्वासो भवितुं युक्तः । भगवानस्ति, स सर्वव्यापी, सर्वेश्वरः, सर्वशक्तिमान्, सर्वज्ञः, परमदयालुः, परमसुहृद्, भक्तवत्सलो दीनबन्धुस्तथा सदा सर्वत्र विराजमानोऽस्ति; आसु वार्तासु विश्वाससमकालमेव सर्वेषां पापतापानां स्वयमेव नाशो भवति । भगवति विश्वासं कर्तुमावश्यकता सर्वतः प्राक् सर्वतोऽधिका चास्ति । भगवतोऽस्तित्वे प्रभावे

गुणेषु च विश्वासो भविष्यति चेत्तदा मनः स्वत एव भगवति संलग्नं भविष्यति । मनुष्येण यत्किंचिदेवणीयं तस्य सर्वस्यैव निधिर्भगवानस्ति । ज्ञानमभीष्टं चेद् भगवाञ्ज्ञानस्वरूपोऽस्ति, प्रेमापेक्ष्यं चेद् भगवान् प्रेममयोऽस्ति, आनन्दो वाञ्छनीयश्चेद् भगवानानन्दघनोऽस्ति, वैराग्यमिष्यते चेद् भगवान् परमविरागमयोऽस्ति, धनस्यापेक्षास्ति चेद् धनस्वामिनी तत्रभगवती लक्ष्मीश्चाञ्चल्यं विहाय निरन्तरं तदीयां चरणसेवां करोति; ऐश्वर्यमभीष्टं चेत् सर्वं जगत्तस्यैवैश्वर्यस्यैककणस्य प्रकाशोऽस्ति, यशः काङ्क्ष्यते चेद् यशसो धारा तत एव निर्गच्छति । सारांशोऽयमस्ति यत्संसारे वयं यत् किंचिदपि सौन्दर्यं माधुर्यं प्रेम स्नेहं ज्ञानं वैराग्यमैश्वर्यं धनं भोगं सुखादिकं च पश्यामस्तथैषां सर्वेषां वस्तूनां सम्बन्धे यत्रपर्यन्तमस्माकमुच्चादप्युच्चतमा कल्पना भवति सा सर्वा भगवत एकस्मिन् क्षुद्रेंऽशे एव तिष्ठति । अस्माकमस्य जगतः पदार्थास्तथा पदार्थानां सम्बन्धेऽस्माकं कल्पना च तस्याखिलसौन्दर्यमाधुर्यैश्वर्यादिसद्गुणसागरस्यैकेन बिन्दुनापि तुलनां कर्तुं न शक्नुवन्ति । एवं भगवन्तं जानाति तत्र विश्वासं च करोति स भगवन्तं त्यक्त्वा क्षणार्धमप्यन्यतो मनो न नियोजयितुं शक्नोति । न चासौ जगतः क्षणिकानां भोगानामुद्भवे विनाशे च हर्षं शोकं चाप्नोति । अवश्यमेवास्तिकतायां सत्येन विश्वासेन भवितव्यम् । भगवतः सत्तायां विश्वासेऽस्माभिः प्रह्लादस्येतिहासः सदा स्मरणीयः । हिरण्यकशिपोराज्ञया शतशः सहस्रशश्च दुर्दम्या दानवा महान्ति महान्त्यस्त्रशस्त्राणि गृहीत्वा प्रह्लादं हन्तुं धावन्ति । तदानीं स कथयति—

**विष्णुः शस्त्रेषु युष्मासु मयि चासौ व्यवस्थितः।**
**दैतेयास्तेन सत्येन माऽऽक्रमन्त्वायुधानि च॥**

(विष्णुपुराणे १।१७।३३)

'अरे दैत्याः! मम भगवान् विष्णुरेषु शस्त्रेष्वप्यस्ति, युष्मास्वप्यस्ति तथा मयि चाप्यस्ति; स सर्वत्रास्ति। अस्य परमसत्यस्य प्रभावेण युष्माकमेषां शस्त्रास्त्राणां मयि कोऽपि प्रभावो न भवेत्।'

दैत्यानां शस्त्राणि व्यर्थान्यभवन्, तेषामाघातेन प्रह्लादस्य स्वल्पापि वेदना नाभवत्।

विषधरसर्पेषु तथा तेषां विषे, विशालकायेषु मत्तेषु गजेषु तथा तेषां वज्रोपमेषु दन्तेष्वपि प्रह्लादेनात्मनो भगवान् दृष्टः। प्रह्लादस्य तेभ्यः कापि हानिर्न जाता। प्रह्लादोऽग्नौ निक्षिप्तस्तत्र तेन भगवतो नवनीलनीरदमूर्तिर्दृष्टा। तेन कथितम्—

**तातैष वह्निः पवनेरितोऽपि**
**न मां दहत्यत्र समन्ततोऽहम्।**
**पश्यामि पद्मास्तरणास्तृतानि**
**शीतानि सर्वाणि दिशां मुखानि॥**

(विष्णुपुराणे १।१७।४७)

'हे तात! पवनेन प्रेरितोऽयमग्निरपि मां न दहति मया तु सर्वा दिश एवं शीतलाः प्रतीयन्ते, मन्ये मम चतुर्दिक्षु कमलमयान्यास्तरणान्यास्तृतानि सन्ति (पद्ममयान्यावरणानि वा लम्बमानानि भवन्ति)।'

प्रह्लादं हन्तुं पुरोहितैः कृत्योत्पादिता तथा यदा प्रह्लादं हन्तुं विफलप्रयासा भूत्वा कृत्या पुरोहितानेवाजघान तदा प्रह्लाद उवाच—

**यथा सर्वेषु भूतेषु सर्वव्यापी जगद्गुरुः ।**
**विष्णुरेव तथा सर्वे जीवन्त्वेते पुरोहिताः ॥**
**यथा सर्वगतं विष्णुं मन्यमानोऽनपायिनम् ।**
**चिन्तयाम्यरिपक्षेऽपि जीवन्त्वेते पुरोहिताः ॥**

( विष्णुपुराणे १ । १८ । ४०-४१ )

'सर्वव्यापी जगद्गुरुर्भगवान् विष्णुः सर्वेषु प्राणिषु व्याप्तोऽस्ति, अस्य सत्यस्य प्रभावेणैते पुरोहिता जीवन्तु । यद्यहं सर्वगतमक्षयं च भगवन्तं विष्णुं मां हन्तुं चेष्टमानेष्वपि पश्यामि तर्ह्येते पुरोहिता जीवन्तु ।'

प्रह्लादस्य सुदृढेनास्तिक्येन पुरोहिता जीवितवन्तः ।

अन्ततो गत्वा हिरण्यकशिपुना पृष्टेन प्रह्लादेन महता दार्ढ्येन सहाविचलेन निश्चयेन वक्ष अस्फोट्योक्तम्—'ओम्, मम प्रभुः सर्वत्रास्ति, विद्यते चास्मिन् स्तम्भेऽपि ।' आत्मनः सेवकस्येदं वचनं प्रत्यक्षतः सत्यं कर्तुं भगवान् स्तम्भं विदार्य प्रादुरभूत् । अहो निश्चयः ! अहो तस्याद्भुतः परिणामश्च !! इयमस्त्यास्तिकता ।

भक्तैर्यथासाध्यमास्तिकीभवितुं तथाऽऽस्तिकतायां निरन्तरमग्रेसरीभवितुं चेष्टा कर्तव्या ।

सूत्रकारेणास्तिक्यशब्देन सहादिशब्दं योजयित्वा दैव्याः सम्पदोऽन्यान्यदिव्यगुणान् प्रति संकेतः कृतः । श्रीमद्भगवद्गीतायां दैव्याः सम्पत्तेः षड्विंशतिर्गुणाः प्रतिपादिताः सन्ति । भगवान् कथयति—

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥
अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥
( १६ । १—३ )

'हे भारत ! निर्भयतान्तःकरणशुद्धिर्भगवतः स्वरूपे निरन्तरं दृढस्थितिः ( आस्तिकता ) दानमिन्द्रियसंयमो यज्ञः स्वाध्यायस्तपः सरलताहिंसा सत्यं क्रोधहीनता त्यागः शान्तिः कस्यापि निन्दायाः पैशुन्यस्य वा न करणं सर्वेषु प्राणिषु दया लोभराहित्यं कोमलतेश्वरे शास्त्रविरुद्धेषु कर्मसु च लज्जाचाञ्चल्यं तेजः क्षमा धैर्यं शौचमद्रोहोऽभिमानशून्यता चैते सर्वे गुणा दैवीसम्पदं प्राप्ते पुरुषे निवसन्ति ।' इयं दैवी सम्पद् भक्त एव तिष्ठति; अत एव भक्ता देवाः कथिताः ।

द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ।
विष्णुभक्तः[1] स्मृतो दैव आसुरस्तद्विपर्ययः ॥
( पद्मपुराणे )

'अस्मिन् जगति द्विविधा जीवाः सन्ति—एको दैवोऽन्यश्चासुरः । ये भगवतो भक्ताः सन्ति ते दैव पदवाच्याः, ये भक्ता न सन्ति त एवासुराः ।'

---

१–अत्र 'विष्णुभक्तः' इति पदेन शास्त्रानुसारेण भगवतः केषांचिदपि नामरूपाणां सात्त्विको भक्तो बोद्धव्यः । भगवतो नामरूपेषु भेदबुद्धिस्त्वपराध एव मता ।

सर्वदा सर्वभावेन निश्चिन्तितैर्भगवानेव भजनीयः ॥ ७९ ॥

७९—सर्वस्मिन् समये सर्वभावेन निश्चिन्तैर्भक्तैः (केवलः) भगवानेव भजनीयः।

इदं सूत्रं परममहत्त्वपूर्णमस्ति। अस्मिन् देवर्षिणा प्रेममार्गिणो भक्तस्य भगवद्भजनस्य परमः सुन्दरः प्रकारो वर्णितः। वस्तुतो यः पुरुषो भगवतो दिव्यं गुणं रहस्यं प्रभावं च यथार्थरूपेण जानाति—ज्ञानं तु दूरे तिष्ठतु, सतां मुखाच्छ्रुत्वापि तेषामुपरि विश्वासं करोति स भगवन्तं विहाय कस्मिन्नपि काले मनसा वाचा शरीरेण कार्यान्तरं न कर्तुं शक्नोति। भगवाञ्छंकरः कथयति—

स्वभावं रघुनाथस्य ये शिवे तत्त्वतो विदुः।
तेभ्यस्तु भजनं त्यक्त्वा कार्यमन्यन्न रोचते ॥*

दरिद्रेण मनुष्येण कुत्रचित् स्पर्शमणिर्लभ्येत चेत्तदा सोऽन्यत्र कथं दृष्टिपातं करिष्यति। एको भगवानेव परमं तत्त्वमस्ति, भगवानेव सर्वेषां गतिरस्ति, भगवानेव सर्वाधारोऽस्ति, भगवानेव सर्वशक्तिमान् सकलदिव्यगुणनिधिः सौन्दर्यमाधुर्यैश्वर्यनिधिर्ज्ञानवैराग्यस्वरूप आनन्दकन्दविग्रहोऽस्ति। तथैवैतावत्सु सर्वेषु गुणेषु सत्स्वपि सोऽस्माकं परमः सुहृदस्ति, अस्मान् कण्ठे लगयितुं सदा हस्तौ प्रसार्य स्थितोऽस्माकं पन्थानं



* राम सुभाउ जिन्ह जाना। तिन्हहि भजन तजि भाव न आना ॥

पश्यति—इति वार्तां विज्ञाय सकामो निष्कामो वा विषयी मुमुक्षुर्वा साधकः सिद्धो वा क ईदृशः पुरुषोऽस्ति, यो भगवन्तं विहाय क्षणार्धमप्यन्यं भजेत् ? वयं क भजामः, अत्रैतदेव कारणमस्ति यदस्माभिस्तस्य प्रभावो न ज्ञातः। श्रुतश्चेत्तदुपरि विश्वासो न कृतः। देवर्षिः कथयति यद् विश्वासं कुरु तथा निरन्तरं मनसा वाचा शरीरेण केवलं तमेव परमं प्रियतमं भगवन्तं भजस्व, मनसः समस्ताश्चिन्ता दूरीकुरु। समस्तचिन्तनेभ्यश्चित्तं मोचय। यथा लघुः शिशुर्मातुरङ्कं गत्वा निश्चिन्तो भवति तथैव प्रभोर्दासो भूत्वा निश्चिन्तो भव। यस्य रक्षको रामोऽस्ति तस्य कस्या वार्तायाश्चिन्ता भवितुमुचिता ? सर्वं त्यक्त्वा सर्वस्याशां विहाय भगवतः समक्षे सर्वं तुच्छं मत्वा तस्य दिव्यातिदिव्यस्य मधुरसुधारसस्य समक्षे जगतः सर्वान् रसान् विरसान् मत्वा तस्य कोटिकोटिकंदर्पदर्पदलनस्य सौन्दर्यसारस्य श्यामसुन्दरस्य स्वरूपस्य समक्षे जगतः समग्रं रूपराशिं नगण्यं मत्वा तस्यैव भजने संलग्नो भव, चित्तं तस्मा एव समर्पय, सर्वथा तस्मिन्नेव निर्भरो भव, मनसा तमेव स्मर, बुद्ध्या तमेव विचारय, वाण्या तस्यैव गुणानुवादं गाय, कर्णाभ्यां तस्यैव गुणान् लीलाश्च श्रृणु, जिह्वया तस्यैव प्रसादस्य रसमास्वादय, नासिकया तस्यैव पदपद्मपरागगन्धं जिघ्र, शरीरेण सर्वत्र तस्यैव स्पर्शमनुभव, नेत्राभ्यां तस्यैवच्छविधाम्नश्छविं सर्वत्र सर्वदा पश्य, हस्ताभ्यां तस्यैव सेवां कुरु, तनुमनोधनानि सर्वाणि वस्तूनि तस्मा एव समर्पितानि कुरु।

यावत्त्वं जगतः पदार्थानात्मीयान् मन्यमानः स्थास्यसि तेषु ममत्वं रक्षिष्यसि, तावत्कदापि निश्चिन्तो भवितुं न शक्ष्यसि। इमे

नाशवन्तः क्षणभङ्गुराः परिवर्तनशीलाः पदार्थाः कदापि तुभ्यं निश्चिन्ततयावस्थातुमवसरं न दास्यन्ति, एतेभ्यो ममतामासक्तिं च परावर्तय, इमे पदार्था यस्य वस्तूनि सन्ति तस्मा एवैनान् समर्पय। अलम्। यदैव त्वयेमे भगवते समर्पिताःस्युस्तदैव त्वं निश्चिन्तो भविष्यति। तदा पुनर्न नाशाद् भयमस्ति, न चाभावस्य चिन्ता, नापि च कामनाजनितो दाहो भविष्यति। तथा यदा निश्चिन्तो भूत्वा त्वं भजने संलग्नस्तदैव त्वया तस्य दिव्यानन्दमाधुर्यसौन्दर्यसागरस्य रूपं मध्ये मध्ये दृश्यमानं भविष्यति। तदा पुनस्तत्र चित्तमन्यतो गन्तुमेव न वाञ्छिष्यति। ऐश्वर्यं प्रति दृष्टिरेव न गमिष्यति—तथा कुत्रचिदैश्वर्यस्य कापि वासना स्थितापि स्यात्तदा समस्तैश्वर्याणां निधिस्तस्य चरणयोरेव त्वया प्राप्स्यते। अतएव विषयासक्तिलक्षणं व्यभिचारं त्यक्त्वा तस्यैकमात्रप्राणारामस्य प्रियतमस्य प्रभोः प्रिया पतिव्रता पत्नी भव। अतएव श्रीसुन्दरदासाख्येन महात्मना कथितम्—

**पत्यावेव प्रेम भवेत् पत्यावेव नियमः स्यात्**
**पत्या चैव क्षेमो भवेत् पत्या चैव रतमस्ति।**
**पतिरेव यज्ञो योगः पतिरेव रसभोगः**
**पत्या चैव शोको नश्येत् पत्युरेव यावदस्ति॥**
**पत्युरेव ज्ञानं ध्यानं पत्युः कृते पुण्यं दानं**
**पतिरेव तीर्थस्नानं पत्युरेव मतमस्ति।**
**अपतेः प्रतिष्ठा नास्ति पतिं विना गतिर्नास्ति**
**'सुन्दर' सकलविधिरेकं पतिव्रतमस्ति॥**

जलस्नेही मीनो जलविरहात्त्यजति प्राणान्
मणिं विना नागो यथा जीवितो न लभ्यते ।
स्वातिबिन्दुस्नेहिनौ च प्रकटौ जगति यथा
एका तत्र शुक्तिरन्यश्चातकस्तु कथ्यते ॥
स्नेही भास्करस्य पुनः कमलं सरसि यथा
शशिनोऽपि स्नेही स चकोरो यथा विद्यते ।
सुन्दरो वदति तथैकस्मिन्नेव प्रभौ स्निह्य
दृष्ट्वा त्वन्यद् गतिः कुत्राप्यन्यतो न युज्यते ॥*

---

* पतिही सूँ प्रेम होय, पतिही सूँ नेम होय,
पतिही सूँ छेम होय, पतिही सूँ रत है ।
पतिही है जग्य-जोग, पति ही है रसभोग,
पतिही सूँ मिटै सोग, पतिही कौ जत है ॥
पतिही कौ ग्यान-ध्यान पतिही कौ पुन्न-दान,
पति ही है तीर्थस्नान, पतिही कौ मत है ।
पति बिनु पति नाहिं, पति बिनु गति नाहिं,
'सुंदर' सकल बिधि एक पतिव्रत है ॥
जल कौ सनेही मीन बिछुरत तजै प्रान,
मनि बिनु अहि जैसैं जीवत न लहिये ।
स्वातिबिंदु कौ सनेही प्रगट जगत माँहि,
एक सीप, दूसरौ सु चातकहू कहिये ॥
रबि कौ सनेही पुनि कमल सरोवर मैं,
ससि कौ सनेही हू चकोर जैसैं रहिये ।
तैसैं ही 'सुंदर' एक प्रभु सूँ सनेह जोर,
और कछु देखि काहू ओर नाहिं बहिये ॥

भगवान् स्वयमेव कथयति—

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे॥
सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥

( गीता १८ । ६५-६६ )

'हे अर्जुन ! त्वं मय्येव मनो योजय, ममैव भक्तो भव, ममैव पूजां कुरु, मामेव नमस्कुरु, पुनरवश्यं मामेव प्राप्स्यति । इदमहं तव सत्यं प्रतिजाने, यतस्त्वं ममात्यन्तं प्रियोऽसि । अन्येषां सर्वेषां धर्माणमाश्रयं त्यक्त्वा केवलमेकं मामेव शरणं व्रज । अहं त्वां सर्वेभ्यः पापेभ्यः स्वयमेव मोचयिष्यामि त्वं चिन्तां न कुरु ।'

भगवत एतावत्प्रतिज्ञायुक्तमाश्वासनं प्राप्यापि यदि वयं सर्वदा सर्वभावेन निश्चिन्ता भूत्वा भगवन्तं न भजामस्तदास्मादृशो भाग्यहीनोऽपरः को भविष्यति ?

अतएवास्यां वार्तायामेवात्मनः परमं कल्याणं मत्वोत्थान उपवेशने शयने जागरणे सर्वदा सर्वकार्येष्वस्माभिः श्रीभगवतः पवित्रसत्ताया दर्शनं कुर्वद्भिर्लाभालाभयोर्जन्ममरणयोश्च चिन्तां विहाय निश्चिन्तेनानन्यचेतसा श्रीहरेरेव भजनं कीर्तनं च करणीयम् ।

---

## प्रेमभक्तेः फलं भक्तेः सर्वश्रेष्ठता च

**स कीर्त्यमानः शीघ्रमेवाविर्भवति अनुभावयति च भक्तान् ॥ ८० ॥**

**८०–स भगवान् प्रेमपूर्वकं कीर्तितः सन् शीघ्रमेव प्रकटीभवति तथा भक्तान् प्रत्यात्मानमनुभावयति ।**

इतः प्राक्तनसूत्रानुसारमनन्यभजने भगवाञ्छीघ्रमेव साक्षात् प्रकटीभूय भक्तान् प्रत्यात्मनः स्वरूपस्यानुभवं कारयति । अत्र 'आविर्भवति' इति पदेन भगवतोऽखिलदिव्यसौन्दर्यमाधुर्यरस-सारसाकाररूपेण प्रकटीभवनं बोद्धव्यम् । वस्तुतो निर्गुणे सगुणे तथा निराकारे साकारे कोऽपि भेदो नास्ति । स एव मनोबुद्ध्योरगोचरं ब्रह्म, स एव सृष्टिकर्ता सगुणनिराकारो विभुः, स एव जगदात्मा, स एव श्रीरामः श्रीकृष्णश्चास्ति । स एव महाशिवो महाविष्णुर्महादेवी चास्ति, स एवायं विराट् पुरुषोऽस्ति । तस्माद् भिन्नं किंचिदप्यस्त्येव न । यदा रसिकस्य हठान्वितस्य च भक्तस्य प्रेम्ण आकर्षणं भवति तदा स आत्मनो दिव्याह्लादिनीं शक्तिं निमित्तीकृत्य दिव्यचिन्मयवस्त्र-मालागन्धायुधाभूषणादिभिः सुसज्जितः सौन्दर्यनिधिरूपेण प्रकटीभूय भक्तं कृतार्थयति ।

सगुणे निर्गुणे वापि कश्चिद् भेदो न विद्यते ।
गायन्ति मुनयो वेदाः पुराणानि बुधा इति ॥
अरूपो निर्गुणोऽलक्ष्यो य एवाजो निगद्यते ।
भक्तप्रेमवशादीशः स एव सगुणो भवेत् ॥*

परंत्वियं वार्ता नास्ति यदिदं रूपं जगत्प्रसविन्या मायया निर्मितं भवति । अत्र सर्वाणि वस्तूनि दिव्यानि शुद्धानि नित्यानि चिन्मयानि भगवत्स्वरूपाणि च भवन्ति । अत एवास्य दिव्यरसमयस्वरूपे समक्षमागच्छत्येवात्मज्ञानिनां मुनीनां मृतान्यपि मनांसि जीवितानि भूत्वास्य स्वरूपस्यैकैकं वस्तु दृष्ट्वा मुग्धानि भवन्ति । येभ्य इन्द्रियविकाररूपेभ्यो रूपरसगन्धस्पर्शशब्देभ्यो मुमुक्षावस्थायामेव चित्तमुपरतं भवति, तानेव रूपरसगन्धस्पर्शशब्दान् प्रति मुनीनामात्मज्ञानिनां चाकर्षणमिदं सिद्धं करोति यद् भगवतो दिव्यस्वरूपस्येमे रूपरसगन्धशब्दस्पर्शादयो विषया मायाकार्येभ्यस्त्रिभ्यो गुणेभ्यो नोत्पन्नाः सन्ति । इमे सर्वगुणसम्पन्नस्य सदा निर्गुणस्य च प्रभोः स्वरूपभूता एव सन्ति । अत एव मुनिगणा एतान् प्रति मोहिता भवन्ति । अतः कारणादेव वेदान्तस्य प्रधानाचार्यः श्रीशंकराचार्यो भगवन्तं श्रीकृष्णमधिकृत्य कथयति—

ब्रह्माण्डानि बहूनि पङ्कजभवान् प्रत्यण्डमत्यद्भुतान्
गोपान् वत्सयुतानदर्शयदजं विष्णूनशेषांश्च यः ।

* सगुनहि अगुनहि नहिं कछु भेदा । गावहिं मुनि पुरान बुध बेदा ॥
अगुन अरूप अलख अज जोई । भगत प्रेम बस सगुन सो होई ॥

शम्भुर्यच्चरणोदकं स्वशिरसा धत्ते च मूर्तित्रयात्
कृष्णो वै पृथगस्ति कोऽप्यविकृतः सच्चिन्मयो नीलिमा ॥
( प्रबोधसुधाकरे २४२ )

'यो ब्रह्माणमनेकानि ब्रह्माण्डानि प्रतिब्रह्माण्डं पृथक्-पृथगद्भुतान् ब्रह्मणः, वत्सयुतान् समस्तान् गोपांस्तथा विभिन्नब्रह्माण्डानामशेषान् विष्णून् दर्शयामास, यस्य चरणोदकं श्रीशम्भुरात्मनः शिरसि धारयति स श्रीकृष्णस्त्रिमूर्तिभ्यः ( ब्रह्माण्डेषु त्रिभिन्नस्वरूपैः शासनं कुर्वद्भ्यो ब्रह्मविष्णुमहेशेभ्यः ) पृथगेव कोऽप्यविकारी सच्चिदानन्दमयो नीलिमास्ति ।'

एकदा दिव्ये वैकुण्ठलोके भगवतः श्रीमहाविष्णोः समीपं नित्यात्मनिष्ठाः सनकादयो महर्षयो जग्मुः । यदैव ते भगवतः समक्षं गतास्तथा तस्य स्वरूपं विलोकयामासुस्तदैव मुग्धाः संजाताः । भगवतः सौन्दर्यं दर्शं दर्शं तेषां नेत्राणि कथमपि तृप्तान्येव न भवन्ति स्म । भगवतः सौन्दर्येणैव ते मोहमापादिता इति नैव, प्रणामकाले कमलनयनस्य श्रीहरेः पादपद्मपरागमिश्रितायास्तुलसीमञ्जर्याः सुगन्धो वायुना सह नासिकामार्गेण यदैव मुनीनामन्तरं प्रविष्टस्तदैव तेषां नित्याविचलरूपतया ब्रह्मानन्दमनुभवतां मुनीनां हृदयं क्षुब्धमभवत्, तं सुगन्धं प्रत्याकृष्टमभूत्तदुपरि मोहितमभवत्तथानन्दातिरेकेण तेषां शरीरे रोमाञ्चः संजातः ।

तस्यारविन्दनयनस्य पदारविन्द-
किञ्जल्कमिश्रतुलसीमकरन्दवायुः ।
अन्तर्गतः स्वविवरेण चकार तेषां
संक्षोभमक्षरजुषामपि चित्ततन्वोः ॥
( श्रीमद्भागवत ३ । १५ । ४३ )

इयमेव दशा भगवतोः श्रीरामलक्ष्मणयोः स्वरूपं दृष्ट्वा ब्रह्मविद्वरिष्ठस्य ज्ञानिश्रेष्ठस्य विदेहजनकस्याभूत्—

विलोक्य मधुरां मूर्तिं तथा चातिमनोहराम् ।
तस्मिन् काले विदेहस्तु विदेहोऽभूद् विशेषतः ॥
प्रेममग्नं मनो ज्ञात्वा धैर्यं धृत्वा विवेकतः ।
नृपोऽवोचन्मुनिं नत्वा गम्भीरं रुद्धया गिरा ॥*

तस्मिन् रूपराशौ समक्षमागच्छत्येव विदेहस्य ज्ञानं मूर्च्छितमिवाभवत्, देहस्य स्मृतिर्विलुप्ता नेत्रयोरश्रूणि सम्भृतानि । जनकेन दृष्टं किमिदमभूत् ? बालकयोः सौन्दर्ये—नेत्रयोर्विषये रूपे जनकस्य मनसि मोहः कीदृशः ? विवेकेन धैर्येणात्मानमवष्टम्भयामास, परंतु पृच्छां विना न स्थातुं शक्तः । विश्वामित्रस्य चरणयोः प्रणामं कृत्वा राजा वक्तुमैच्छत्, परंतु विवेको हृदयस्य द्रवीभावं दूरयितुं न शशाक । वाचं वाचमेव वाणी गद्गदाश्रुपूर्णाविरुद्धा चाभवत् । राज्ञाऽऽत्मनो दशां वर्णयता किं पृष्टमिति मनाक्छ्रूयताम्—

मुनिनाथोच्यतामेतौ सुन्दरौ बालकावुभौ ।
मुनिवंशावतंसौ वा नरेशकुलपालकौ ॥
निगमो नेति नेत्युक्त्वा सदा यद् ब्रह्म गायति ।
वेषं धृत्वोभयं ब्रह्मंस्तदेवात्रागतं नु किम् ॥
स्वभावादेव वैराग्यरूपं मम मनोऽधुना ।
मुग्धं जातं निरूप्येमौ चकोरः शशिनं यथा ॥

---

* मूरति मधुर मनोहर देखी । भयउ बिदेहु बिदेहु बिसेषी ॥
प्रेम मगन मनु जानि नृपु करि बिबेकु धरि धीर ।
बोलेउ मुनिपद नाइ सिरु गदगद गिरा गभीर ॥

तस्मात् प्रभो मयेदानीं सद्भावादेव पृच्छ्यते ।
कथ्यतां मुनिनाथैतद् गोपायस्व न किंचन ॥
इदानीं पश्यदेतौ द्वावत्यन्तमनुरागतः ।
मनो मम बलादेव ब्रह्मानन्दं विमुञ्चति ॥*

मुनिः स्मयमानो राज्ञोऽनुमानं समर्थयामास ।

एवं यत् स्वरूपं वारंवारं दृष्ट्वापि दर्शनेच्छा वर्धमानैव तिष्ठति, तत् किमपि विलक्षणमेव वस्तु । संसारे कोऽपि पदार्थ एतादृशो नास्ति यं भूयो भूयो विलोक्यापि तदवलोकनेच्छा वर्धेत । अनुभवस्त्विदं कथयति यद् यस्य वस्तुनो दिदृक्षा प्रबला भवति तस्मिन् प्राप्ते सति प्रथमे दर्शने तु महानेवानन्दो भवति । परंतु पुनर्यथा यथा तद्दर्शनं सुलभं भवति तथा तथा तत्प्रत्याकर्षणं क्रमशो न्यूनतामापद्यते । परंतु भगवतः सौन्दर्यमीदृशमस्ति यद् दर्शं दर्शं कदापि तृप्तिरेव न भवति । यथा प्रेमिभक्तस्य प्रेम प्रतिक्षणं वर्धमानं तिष्ठति तथैव भगवतः सौन्दर्यच्छटापि प्रतिक्षणमधिकाधिकं वर्धमानैव तिष्ठति । प्रतिपलं नवं नवं सौन्दर्यमधिकाधिकमाकर्षकं माधुर्यं दृश्यते । ईदृशं तद् भगवतः स्वरूपं मायिकं न भवति । तत् सर्वथा दिव्यं भवति तथा यस्मिन् क्षणे तद् भक्तस्य समक्षं तदीयप्रेमाकर्षणेन प्रकटीभवति, तस्मिन्नेव क्षणे तं दिव्यभावापन्नं कृत्वाऽऽत्मनः स्वरूपस्यानुभवं कारयति । यावत्

---

* कहहु नाथ सुंदर दोउ बालक । मुनि कुल तिलक कि नृप कुल पालक ॥
ब्रह्म जो निगम नेति कहि गावा । उभय बेष धरि की सोइ आवा ॥
सहज बिरागरूप मनु मोरा । थकित होत जिमि चंद चकोरा ॥
ताते प्रभु पूछउँ सतिभाऊ । कहहु नाथ जनि करहु दुराऊ ॥
इन्हहि बिलोकत अति अनुरागा । बरबस ब्रह्मसुखहिं मन त्यागा ॥

सा रूपमाधुरी समक्षे तिष्ठति तावद् भक्तः कस्मिंश्चिद् दिव्ये राज्ये निवसति । तस्य सर्वं दिव्यभावापन्नं तिष्ठति । तस्मिन् काले स भगवतो माधुर्यं विहायान्यत् किमपि नैव पश्यति, न शृणोति, स तन्मयो भवति तथा तस्य भगवत्तत्त्वस्य यथार्थोऽनुभवो भवति ।

**त्रिसत्यस्य भक्तिरेव गरीयसी भक्तिरेव गरीयसी ॥ ८१ ॥**

**८१–त्रिषु ( कायिकवाचिकमानसिकेषु ) सत्येषु ( अथवा त्रिषु कालेषु सत्यस्य भगवतः ) भक्तिरेव श्रेष्ठास्ति, भक्तिरेव श्रेष्ठास्ति ।**

कायिकवाचिकमानसिकसत्यानि त्रिसत्यानीति कथ्यन्ते । देवर्षे-र्नारदस्य त्रिषु सत्येषु भक्तेः श्रेष्ठताया अनुभवः प्रत्यक्षमुपलब्धोऽस्ति । अतः स भूयोभूय इदमुद्घोषयति यद् भक्तिरेव श्रेष्ठा । वस्तु-स्थितिरप्येतादृश्येवास्ति । उपनिषद्यपीदृशी घोषणा विहिता वर्तते—

**सर्वोपायान् परित्यज्य भक्तिमाश्रय । भक्तिनिष्ठो भव भक्तिनिष्ठो भव । भक्त्या सर्वसिद्धयः सिद्ध्यन्ति भक्त्यासाध्यं न किंचिदस्ति ।**

( त्रिपाद्विभूतिनारायणोपनिषदि ).

'सर्वानुपायान् परित्यज्य भक्तिमेवाश्रयस्व, भक्तिनिष्ठो भव, भक्तिनिष्ठो भव । भक्त्या सर्वाः सिद्धयः सफला भवन्ति । ईदृशं किमपि कार्यं नास्ति यद् भक्त्या न सिद्ध्येत् ।'

मुक्तिरपि लभ्यते मुक्तिदाता भगवांश्च सगुणं रूपं धृत्वा ( भक्तेन ) सह खेलति । इदं भगवतः श्रीमुखस्य वचनमस्ति—

यथाग्निः सुसमृद्धार्चिः करोत्येधांसि भस्मसात् ।
तथा मद्विषया भक्तिरुद्धवैनांसि कृत्स्नशः ॥
( श्रीमद्भा० ११ । १४ । १९ )

'हे उद्धव ! यथा वेगेन प्रज्वलितो वह्निः काष्ठस्य समूहमपि भस्मसात् करोति तथैव मद्विषया भक्तिः सर्वेषां ( लघूनां महतां च ) पापानां राशिं दहति ।'

भक्तस्य साधनं भगवान् रक्षति तथा तत्फलस्वरूपस्यात्मनः प्राप्तिमपि स्वयमेव कारयति । किंचात्र सर्वेषामधिकारोऽस्ति । अत एव भक्तेः श्रेष्ठं किमपरं भविष्यति ? अत एव कारणाद् भगवता श्रीमद्भगवद्गीतायामपि स्थाने स्थाने भक्तेः प्रशंसा कृता । तथा द्वादशेऽध्याये तु भक्तो युक्ततमोऽपि कथितः । अतएवात्र देवर्षिर्नारदस्तलमास्फोट्यास्फोट्य मुक्तकण्ठतो वज्रगम्भीरस्वरेण घोषणां करोति यत् कायिकवाचिकमानसिकेषु त्रिषु सत्येष्वथवा त्रिकालसत्यस्य भगवतो भक्तिरेव सर्वश्रेष्ठास्ति ।

**गुणमाहात्म्यासक्तिरूपासक्तिपूजासक्तिस्मरणासक्तिदास्यासक्तिसख्यासक्तिकान्तासक्तिवात्सल्यासक्त्यात्मनिवेदनासक्तितन्मयतासक्तिपरमविरहासक्तिरूपा एकधाप्येकादशधा भवति ॥ ८२ ॥**

८२—इयं प्रेमरूपा भक्तिरेका भूत्वापि ( १ ) गुणमाहात्म्यासक्तिः, ( २ ) रूपासक्तिः, ( ३ ) पूजासक्तिः, ( ४ ) स्मरणासक्तिः, ( ५ ) दास्यासक्तिः, ( ६ ) सख्यासक्तिः, ( ७ )

कान्तासक्तिः, (८) वात्सल्यासक्तिः, (९) आत्मनिवेदनासक्तिः, (१०) तन्मयतासक्तिस्तथा (११) परमविरहासक्तिः—इत्येवं प्रकारभेदेनैकादशधा भवति ।

ये महात्मानो जनाः प्रेमरूपाया भक्तेः पूर्णतां प्राप्ता भवन्ति तेषु त्वेताः सर्वा एवासक्तयस्तिष्ठन्ति, यथा व्रजगोपिकास्त्वासन्, यासामुदाहरणरूपतया निर्देशो देवर्षिणा नारदेन प्रागेव कृतः । सर्वासां विकासो न भवति चेत्तर्ह्यात्मनो रुचिमनुसृत्यैतासु केवलयैकयाऽऽसक्त्यैकाधिकाभिर्वाऽऽसक्तिभिर्भावैर्भगवता सह प्रेम क्रियते । प्रेमैकमेव वस्त्वस्त्यत एतेषु प्रेमिषु प्रेमासक्तिभेदेन कतमस्मिन्नप्युच्चनीचभावना न कर्तव्या ।

आभिर्विभिन्नाभिरासक्तिभिर्भगवन्तं भजमानाः संख्यातीता भक्ताः समभूवन् । उदाहरणार्थं कतिचिन्नामान्यत्रोपनिबद्ध्यन्ते ।

*१—गुणमाहात्म्यासक्ता भक्ताः*—देवर्षिर्नारदो महर्षिर्वेदव्यासः शुकदेवो याज्ञवल्क्यः काकभुशुण्डिः शेषः सूतः शौनकः शाण्डिल्यः परीक्षित प्रभुस्तथा जनमेजयप्रभृतयः ।

*२—रूपासक्ता भक्ताः*—मिथिलावासिनो नरा नार्यश्च, राजा जनको दण्डकारण्यस्था मुनयो व्रजाङ्गना प्रभृतयः ।

*३—पूजासक्ता भक्ताः*—श्रीलक्ष्मी राजा पृथुरम्बरीषो भरतादयश्च ।

*४—स्मरणासक्ता भक्ताः*—प्रह्लादो ध्रुवः सनकादयश्च ।

*५—दास्यासक्ता भक्ताः*—श्रीहनूमानक्रूरो विदुरादयश्च ।

*६—सख्यासक्ता भक्ताः*—अर्जुन उद्धवः संजयः श्रीदामा सुदामादयः ।

७–*कान्तासक्ता भक्ताः*–अष्टपट्टमहिषीप्रभृतयः ।

८–*वात्सल्यासक्ता भक्ताः*–कश्यपोऽदितिः सुतपाः पृश्निर्मनुः शतरूपा दशरथः कौसल्या नन्दो यशोदा वासुदेवदेवकीप्रभृतयश्च ।

९–*आत्मनिवेदनासक्ता भक्ताः*–श्रीहनूमान् राजाम्बरीषो राजा बलिर्विभीषणः शिबिप्रभृतयः ।

१०–*तन्मयतासक्ता भक्ताः*–याज्ञवल्क्यः शुकदेवसनकादयो ज्ञानिगणा अथवा कौण्डिन्यसुतीक्ष्णप्रभृतयः प्रेमिमुनिगणाः ।

११–*परमविरहासक्ता भक्ताः*–उद्धवोऽर्जुनो व्रजवासिनरनार्यः ।

श्रीगोपीजनेष्वेकादशविधानामेव प्रेम्णां विकास आसीत् । परंतूपर्युक्तेषु भक्तेष्वेकैकप्रकारस्यैव प्रेम्णो विकास आसीदिति स्थितिर्नास्ति । येषु यस्य भावस्य प्राधान्यमासीत्तत्रैव तेषां नामानि लिखितानि सन्ति ।

**इत्येवं वदन्ति जनजल्पनिर्भया एकमताः कुमारव्यासशुकशाण्डिल्यगर्गविष्णुकौण्डिन्यशेषोद्धवारुणिबलिहनुमद्विभीषणादयो भक्त्याचार्याः ॥८३॥**

८३–कुमाराः (सनत्कुमारादयः), वेदव्यासः, शुकदेवः, शाण्डिल्यः, गर्गः, विष्णुः, कौण्डिन्यः, शेषः, उद्धवः, आरुणिः, बलिः, हनुमान्, विभीषण इत्यादयो भक्तितत्त्वस्याचार्यगणा लोकैः कृताभ्यां निन्दास्तुतिभ्यां किंचिदपि भयं न मत्वा (सर्वे) ऐकमत्येनैवमेव कथयन्ति (यद् भक्तिरेव सर्वश्रेष्ठा अस्ति) ।

देवर्षिर्नारदो भक्तितत्त्वस्य प्रधानप्रधानाचार्याणां मतमुपस्थाप्य स्वकथनस्य पुष्टिं करोति। एते सर्वे महापुरुषा भक्तितत्त्वस्य ज्ञातार आचार्याश्चाभूवन्। सनत्कुमारो नित्यं 'हरिः शरणम्' इति मन्त्रस्य जपं कुर्वंस्तिष्ठति तथा स भक्तिमार्गस्य प्रधानः प्रवर्तकोऽस्ति। भगवता श्रीवेदव्यासेनाष्टादशस्वपि महापुराणेषु भक्तेरेव मुख्यत्वं प्रतिपादितम्, तत्प्रणीतं श्रीमद्भागवतं तु भक्तेः खनिरेवास्ति। श्रीशुकदेवस्य भक्तिः किं वर्ण्यताम्? भक्तिरसप्रधानं श्रीमद्भागवतं तस्य मुखादेव निर्गतः सुधासागरोऽस्ति। महर्षिशाण्डिल्यकृतानि भक्तिसूत्राण्येव तस्य भक्तितत्त्वैकप्रधानाचार्यतायाः प्रमाणमुपस्थापयन्ति। महर्षिगर्गप्रणीतायां गर्गसंहितायां तु भक्तेः स्रोतः प्रवहति। महर्षिर्विष्णुः प्रधानः स्मृतिकार आसीत्। एको विष्णुस्वामी भक्तिसम्प्रदायस्य सुविख्यात आचार्योऽभूत्। महात्मना कौण्डिन्येन तन्मयतासक्तौ सिद्धिः समासादितेति स्वीक्रियते। भगवाञ्छेषस्त्वहर्निशं सहस्रमुखैर्हरिगुणगानमेव करोति। तत्रभवान् दास्यभावस्य परम आचार्योऽस्ति। दास्यस्वरूपलक्ष्मणात्मना तत्रभवानेवावततार। श्रीमानुद्धवो महात्मा भगवतः श्रीकृष्णस्य मुख्यः सखाऽऽसीत्। आरुणिर्निम्बार्कस्यैव नामान्तरमिति मन्यन्ते तत्सम्प्रदायविदः। तत्रभवानाचार्यो निम्बार्को राधाकृष्णाद्वययुगलस्वरूपस्योपासक आसीत्। राजा बलिः सर्वात्मनिवेदनासक्तेर्मूर्तिमान् विग्रहोऽस्ति, एतस्य भक्तिबलेन भगवता स्वयमस्य द्वारपालत्वमङ्गीकृतम्। प्रातःस्मरणीयस्य भक्तराजस्य श्रीहनुमतो दास्यभावः सुप्रसिद्धोऽस्ति। महाभागेन विभीषणेन भक्तेः प्रभावेण भगवतः श्रीरामचन्द्रस्य सख्यमवाप्तम्। भक्तिशास्त्रस्यैतैः सर्वैराचार्यैर्लोककृताभ्यां निन्दास्तुतिभ्यां किंचिदपि भयं न कृत्वा भक्तिमहिमा गीतस्तथाऽऽत्मनः

सम्पूर्णजीवनद्वारा भक्तेः सर्वश्रेष्ठता साधिता । एतेषामेव मतमनुसृत्य श्रीनारदोऽपि निर्भयः सन् भक्तेर्डिण्डिमघोषं करोति ।

**य इदं नारदप्रोक्तं शिवानुशासनं विश्वसिति श्रद्धत्ते स प्रेष्ठं लभते स प्रेष्ठं लभत इति ॥८४॥**

८४—येऽस्मिन् नारदप्रोक्ते शिवानुशासने विश्वासं श्रद्धां च कुर्वन्ति ते प्रियतमं प्राप्नुवन्ति ते प्रियतमं प्राप्नुवन्ति ।

इतः पूर्वं भक्तिशास्त्रस्य व्याख्यां कृत्वाधुना सूत्रकारस्तस्य फलं वर्णयति । देवर्षिः कथयति यद् येऽस्मिन् मया प्रोक्ते परमकल्याणमय उपदेशेऽथवा भक्तितत्त्वस्यादिनाऽऽचार्येण साक्षाद् भगवता श्रीशिवेन विहित उपदेशे विश्वासं श्रद्धां च विदधति ते भगवन्तं प्रियतमरूपेण प्राप्नुवन्ति । विश्वासं तथा श्रद्धां विना तु किंचिदपि न भवति । संशयात्मनस्तु पतनमेव भवति—'संशयात्मा विनश्यति ।' ( गीतायाम् ४ । ४० )

पुनर्विश्वासस्य श्रद्धायाश्चावलम्बनेनैव तदर्थं साधनं भवति, अत एव विश्वासं श्रद्धां च कृत्वा भक्तिर्विधेया । अन्यान्यसाधनद्वारा भगवानन्यान्यरूपैः प्राप्यते, परन्तु भक्त्या तु स प्रियतमरूपेणोपलभ्यते । अयं प्रेमैव चतुर्थः पञ्चमो वा पुरुषार्थोऽस्ति, यत्र मोक्षस्यापि संन्यासः सम्पद्यते । इदमेव जीवनस्य परमं फलमस्ति ।

भक्तेर्भक्तस्य भगवतश्च विजयघोषः क्रियताम् ।

श्रीकृष्णार्पणमस्तु

प्राप्तिस्थानम्

गीताप्रेस, पो० गीताप्रेस ( गोरखपुर )



## Honours

Honorary D.Litt by National Sanskrit University, Tirupati AP. for his unique contribution in Indian Philosophy.

-Vachaspati

-Yoga Ratna

-Shastra nidhi

-Utkrisht Sanskrit Pandit

-Yajna Surabhi

-Shastri (Karavir Peeth)

-Shastra Ratnakara

## Awards

- Sahitya Academy award

- Maharashtra govt sadhana award

- Pt. Satvalekar award

- Pt. Latkar shastri award

- Pt. Ghatate award

- Somnath Trust Award with Gold Medal and title of Best Scholar

- Sribhashyam national award

and many other.

Foreign Travel

The Netherlands, Canada for World Sanskrit Conference 2018.

Indian embassy, Nepal 2023

DVDs on yoga, Indian philosophy and Sanskrit Literature.

mspenna67@gmail.com

Digitization by eGangotri Trust/Sarayu Trust, New Delhi

Funding for Digitization: Shri Ravi Parimi, Hyderabad